Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिरिसिरिवालकहा

श्री शंखेश्वर पार्श्वनाथाय नमः
॥ श्री दान-प्रेम-रामचन्द्र-हीरसूरि सद्‌गुरुभ्यो नमः ॥

આચાર્ય શ્રી રત્નશેખર સૂરિ વિરચિત
મહોપાધ્યાયશ્રી ક્ષમાકલ્યાણક વિરચિત-અવચૂર્ણિ-સમલંકૃત

સિરિસિરિવાલકહા

: સંપાદક :

પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મ.સા.ના
પટ્ટાલંકાર પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજય હીરસૂરીશ્વરજી મ.સા.ના
શિષ્યરત્ન પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજય લલિતશેખર સૂરીશ્વરજી મ.સા.ના વિનેય

આચાર્યદેવશ્રી રાજશેખર સૂરીશ્વરજી મહારાજ

કિંમત : ૭૫-૦૦

: પ્રકાશક :

સિસોદરા શ્વે. મૂ. જૈન સંઘ
વિ. સં. ૨૦૪૮
નકલ : ૧૦૦૦
વીર સં. ૨૫૧૮

: પ્રાપ્તિસ્થાનો :

સિસોદરા શ્વે. મૂ. જૈન સંઘ
મુ. સિસોદરા (ગણેશ)
સ્ટે. નવસારી,
જી. વલસાડ પીન - ૩૯૬૪૬૩

સરસ્વતી પુસ્તક ભંડાર
હાથીખાના, રતનપોળ,
અમદાવાદ-૩૮૦૦૦૧
તથા અન્ય પ્રસિદ્ધ બુકસેલરો

For Private and Personal Use Only

सि रि सि रि वा ल क हा

● સંપાદકીય વક્તવ્ય ●

આજથી બે વર્ષ પહેલાં સુશ્રાવક પંડિત (મુંબઈ દાદર નિવાસી) શ્રી નાનાલાલભાઈએ ''પ્રાકૃત શ્રીપાલચરિત્રની પ્રતો અપ્રાપ્ય હોવાથી આપ તેનું સંપાદન કાર્ય કરી આપો'' એવી વિનંતિ મને કરી. આથી મેં આ ગ્રંથનું સંપાદન કરવાનો નિર્ણય કર્યો. પૂર્વે દેવચંદ લાલભાઈ જૈન પુસ્તકોદ્ધાર સંસ્થા દ્વારા પ્રકાશિત થયેલી પ્રત મેળવીને તેના આધારે સંપાદન કરવાનું વિચાર્યું. તે પ્રતમાં જે અશુદ્ધિઓ હતી તે આમાં દૂર કરવામાં આવી છે. એ પ્રતમાં મહત્ત્વની ભૂલ એ હતી કે અનુસ્વાર પછી સ્વર આવે તો અનુસ્વારના બદલે **म्** લખાય. જેમ કે **स्वकीयं एव** એમ ન લખાય, કિંતુ **स्वकीयमेव** એમ લખાય. આમાં આવી ભૂલો અનેક સ્થળે હતી. તે ભૂલો આ પ્રકાશનમાં લગભગ સુધારી લેવામાં આવી છે. આ સિવાય બીજી પણ અનેક અશુદ્ધિઓ આમાં સુધારવામાં આવી છે. આમાં અશુદ્ધિ ન રહે એ માટે ખુબ જ કાળજી રાખવામાં આવી છે. પ્રુફ સંશોધનમાં પૂ. ગુરુદેવશ્રી (આચાર્યદેવ શ્રીમદ્વિજય લલિતશેખર સૂ. મ. સા.) તથા મુ. શ્રી ધર્મશેખર વિજયજી મદદરૂપ બન્યા છે. આ પ્રસંગે સુરત-ગોપીપુરા શ્રી રામચંદ્ર સૂરીશ્વરજી આરાધના ભવનના ટ્રસ્ટી શ્રી રમેશભાઈ સંઘવી સ્મૃતિપથમાં આવ્યા વિના રહેતા નથી. તેમણે પ્રેસ વગેરેની બધી જ જવાબદારી સંભાળીને આમાં ઘણો ભોગ આપ્યો છે. તેમના આત્મીયભાવથી મળેલા સહકારથી જ હું આ ગ્રંથનું આ રીતે સંપાદન કરી શક્યો છું. જ્ઞાન ખાતાની રકમમાંથી સિસોદરા શ્વે. મૂ. જૈન સંઘ તરફથી આ ગ્રંથનું પ્રકાશન કરવા બદલ સિસોદરા જૈન સંઘના આગેવાનો તથા કાર્યકર્તાઓ ધન્યવાદને પાત્ર છે.

ગ્રંથકાર માહિતી : આ ગ્રંથના કર્તા આચાર્ય શ્રી રત્નશેખરસૂરિ મ. વિક્રમની પંદરમી સદીમાં થઈ ગયા. તેઓશ્રી બૃહત્તપાગચ્છીય આચાર્ય શ્રી હેમતિલકસૂરિના શિષ્ય હતા. તેઓશ્રીએ બીજા પણ ક્ષેત્રસમાસ અને ગુણસ્થાનક ક્રમારોહ વગેરે ગ્રંથોની રચના કરી છે. શ્રાદ્ધવિધિ ગ્રંથના કર્તા આચાર્યશ્રી રત્નશેખરસૂરિ મ. અને સિરિસિરિવાલકહા ગ્રંથના કર્તા આચાર્ય શ્રી રત્નશેખરસૂરિ મ. એ બંને સમકાલીન હોવા છતાં ભિન્ન છે.

અવચૂર્ણિકાર માહિતી : અવચૂર્ણિકાર ઉપાધ્યાય શ્રી ક્ષમાકલ્યાણક મહારાજ વિક્રમની ઓગણીસમી સદીમાં થઈ ગયા. તેઓશ્રી સંવિગ્ન વાચનાચાર્ય હતા. તેમના ગુરુનું નામ શ્રી 'અમૃતધર્મ' હતું. તેઓશ્રીએ મેરુત્રયોદશીકથા વગેરેની પણ રચના કરી છે.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिरिसिरिवालकहा

સંયમી આત્માઓને અર્પતી

સીસોદરાની પાવની ધરતી

પ્રવજ્યાના પુનિતપંથે પ્રયાણ કરેલા

આત્માઓનું સ્મૃતિપથમાં અવતરણ.

અનાદિ અનંતકાલીન ચતુર્ગતિમાં કર્મજનિત વિભાવદશાને પરિણામે સંસારપરિભ્રમણ અને કર્મની અકળ લીલાની અનુભૂતિ કરતાં કરતાં પુન્યસંચય-પાપવિલય થતાં પતનની ગતિમાંથી નીકળી ઉત્થાનના પરમપુનિત પંથે લઈ જનાર દેવદુર્લભ એવા વિરતિધર્મની પરિપાલના કરવા માટેના ઉત્તમ નરભવની પ્રાપ્તિ, તેમાંય મહાપુન્યોદયે સર્વોત્તમ, પરમતારક, પાપનાશક, પુણ્યપ્રભાવક સર્વજ્ઞશાસન, મૌનીન્દ્ર શાસન, જિનેન્દ્ર શાસનની પ્રાપ્તિ કરી પૂર્વજન્મજનિત સુસંસ્કારો અને સુયોગના સંસ્કારકરણના યોગે સંસાર પક્ષનો નિપાત અને આત્મિક સ્વરૂપની પ્રાપ્તિનો પક્ષપાત જાગતાં કેટલાય આત્માઓ સર્વસુખકર, કર્મવન બાળવામાં દાવાનળ સમાન, આત્મિક સુખની પ્રાપ્તિનું અમોઘ સાધન-પરાત્મ તત્ત્વની ખોજ કરવાનો અનુપમ માર્ગ એવું જે મહાભિનિષ્ક્રમણ તેની સ્વીકૃતિ કરે છે. તથા મુક્તિપથની સ્વીકૃતિ દ્વારા અને કર્મની તિરસ્કૃતિ દ્વારા મુક્તિની આવિસ્કૃતિ કેટલાક આત્માઓ કરે છે.

અમારો સીસોદરા જૈનસંઘ પણ ગૌરવાન્વિત બન્યો છે. કેમકે અહીંની પાવની ધરતીએ જિનશાસનને ચરણે ચાર પુણ્યાત્માઓને અર્પણ કર્યા છે. આજ અમારી ગ્રામ્યભૂમિ પણ નવપલ્લવિત બની ન હોય તેમ ચાર પુણ્યાત્માને સંયમના સ્વાંગમાં જોઈને મહેકી ઊઠી છે, અને શ્રદ્ધાના પુષ્પો દ્વારા પુણ્યાત્માઓને અભિનંદી રહી છે. અમારી પાવની ધરતી ઉપર ઉત્પન્ન થયેલા સંયમપૂત આત્માઓ સ્મૃતિપથમાં આવતાં અમારા હૈયાં આનંદવિભોર બની જાય છે.

ચાલો એ સંયમી આત્માઓનો પરિચય કરી આત્માને પાવન કરીએ. ભાવે વંદના કરી જન્મ સફળ કરીએ.

ધન્ય માતા જેણે ઉદરે ધરિયા !

ધન્ય પિતા જિણ કુલે અવતરિયા !

ધન્ય સદ્ગુરુ જેણે દિક્ખિઆ એ !!

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सि रि सि रि वा ल क हा

(૧) **પૂજ્ય ગુરુદેવ જ્યોતિર્વિદ્ મુનિપ્રવર શ્રી હેમેન્દ્રવિજયજી મહારાજ સાહેબ**

અબ્રામાના વતની, પિતાશ્રી માતાશ્રી..ના લાડકવાયા વૈરાગી બની પૂજ્યપાદ આચાર્ય દેવેશ શ્રીમદ્ વિજય લબ્ધિસૂરીશ્વરજી મહારાજાના પ્રશિષ્ય બની સંયમની સાધના શરૂ કરી. તેમની જ્ઞાનાભ્યાસની મસ્તતા અજોડ હતી. જ્યોતિષ અને આગમનું તલસ્પર્શી જ્ઞાન પ્રશંસનીય હતું. એમની પ્રેરણાના પુષ્પરૂપ આ પ્રતનું પ્રકાશન છે. ઘણા કાળ સંયમસાધના કરી ફણસા મુકામે સ્વર્ગવાસી બન્યા.

ધન્ય હો એ પુણ્યાત્માને ! ધન્ય હો એમના માતા પિતાને ! વંદન કરીએ ભાવે .....

(૨) **પૂજ્ય મુનિરાજ શ્રી હેતવિજયજી મહારાજ સાહેબ**

જેઓના પિતાશ્રી ગુલાબચંદભાઈ, માતાશ્રી દેવીબેનની કુક્ષીથી માનવભવ લહી ધર્મસંસ્કાર, તપ-ત્યાગાદિની જીવનમાં આચરણાના પ્રભાવે સુખી ઘરના નબીરા છતાં વૈરાગ્યવાસિત બની પૂ. આ. ભ. શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મ. સા. ના શિષ્યરત્ન પરમગીતાર્થ પૂ. પં. શ્રી હેમંત વિજય ગણિવર્ય (પાછળથી આચાર્ય દેવશ્રીહીરસૂરિ મ.)ના શિષ્ય તરીકે વૃદ્ધવયમાં વિ.સં. ૨૦૧૮ કારતક વદ-૬ના શનિવારે સંયમી બની સુંદર સંયમસાધના અને પ્રભુ ભક્તિ દ્વારા જીવનને નિર્મળ બનાવ્યું. વિ.સં.૨૦૨૮નુંચાતુર્માસ પોતાના સંસારી વતન સિસોદરામાં પ.પૂ. મુનિરાજ શ્રીલલિતશેખર વિ.મ. પ.પૂ. મનિરાજ શ્રી રાજશેખર વિ.મ. તથા પ.પૂ. મુનિરાજ શ્રી વિનય વિ.મ.ની સાથે થયું. તે ચાતુર્માસમાં આ.સુ.૧૦ ના રોજ તેઓશ્રીનો દેહવિલય થયો. અર્થાત્ કાળધર્મ પામી સ્વર્ગવાસી બન્યા. એજ પુણ્યાત્માની ધર્મભાવનાના પ્રતિક સમા આજે પણ ગામમાં શ્રી કુંથુનાથ ભગવાનનું જિનાલય અને શ્રી ભીડભંજન પાર્શ્વનાથ ભગવાનનું ઘર દહેરાસર મોજુદ છે.

(૩) **પૂજ્ય મુનિરાજ શ્રી અક્ષયબોધિ વિજયજી મહારાજ સાહેબ**

જેઓશ્રીના પિતાશ્રી ગુલાબચંદભાઈ તથા માતૃશ્રી

એ પુણ્યાત્મા બાલ્યવયથી ધર્મથી સંસ્કારિત અને દીક્ષાની ભાવનાવાળા છતાં કર્મયોગે સાંસારિક જીવનનો પ્રારંભ કર્યો. છતાં ધર્મમય જીવન અને સદ્ગુરુ સમાગમે વૈરાગ્ય જાગૃત થતાં વિ.સં. ૨૦૪૭માં સિસોદરામાં સંયમ સ્વીકારી પૂ. ગચ્છાધિપતિ શ્રીમદ્ વિજય રામચંદ્ર સૂરિ મ. સા. ના પ્રશિષ્ય પૂ. આ. ભ. શ્રીમદ્ વિજય જયકુંજરસૂરિ મ. સા. ના શિષ્ય રત્ન બન્યા. મોટીવયે દીક્ષા ગ્રહણ કરી સંયમસાધના-તપ-ત્યાગાદિ ગુણોની પ્રાપ્તિ કરવા દ્વારા આત્મકલ્યાણ સાધતાં પૃથ્વીતલે વિચરી રહ્યા છે.

ધન્ય હો ગુરુભગવંતને !

ધન્ય હો માત-તાતને ! નમન કરીએ લળીલળી.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सि रि सि रि वा ल क हा

(૪) **પૂજ્ય સાધ્વીજીશ્રી સૌમ્યજ્યોતિશ્રીજી મહારાજ સાહેબ**

પિતાશ્રી સ્વ. ગુણવંતલાલ પાનાચંદ શાહ તથા માતાશ્રી શાંતાબેન જેઓના ઉત્તમ કુળમાં આ આત્માનું અવતરણ થયું. બાલ્યવયથી જ ધર્મભાવનાવાસિત અંતઃકરણ, આંતરિક વિરાગવેલડી વિસ્તરતાં ભૌતિકવાદના ભોગવિલાસ અને જડવાદના આકર્ષણમાં નહિ લેપાતા, કોલેજિયન જીવન જીવવા છતાં, વૈભવની સામગ્રીને સાપ જેમ કાંચળી ઉતારે તેમ છોડીને વીશ વર્ષની વયે બાલબ્રહ્મચારી બની અણગારી આલમમાં વિ. સં. ૨૦૨૭ના ફાગણ સુદ-૪ના રવિવારે પૂજ્ય ગચ્છાધિપતિ, વ્યાખ્યાન વાચસ્પતિ આચાર્ય દેવેશ શ્રીમદ્ વિજય રામચંદ્રસૂરિ મ. સા.ના આજ્ઞાવર્તી પૂ. સા. શ્રી સ્વ. દર્શનશ્રીજી મ. સા. ના શિષ્યરત્ના પૂ. સા. શ્રી જયપ્રજ્ઞાશ્રીજી મ. સા. ના શિષ્યા બની સંયમની સાધના કરી રહ્યા છે. પૂજ્ય ગુરુણી સા. શ્રી જયપ્રજ્ઞાશ્રીજી મ. સા. કાળધર્મ પામતાં જ્ઞાન-ધ્યાનમાં મસ્તતા અનુભવતા, પરમાત્મભક્તિમાં લીન બની પૂ. સા. શ્રી હર્ષપૂર્ણાશ્રીજી મ. સા. ની નિશ્રામાં સંયમ જીવનની આરાધના કરતાં પૃથ્વીતલે વિચરી રહ્યા છે.

ધન્ય હો ! એ ગુરુણીને !
ધન્ય હો એમના માત-પિતાને !
વંદન કરીએ ભક્તિભાવે

"ઉત્તમના ગુણ ગાવતાં ગુણ આવે નિજ અંગ" એ ન્યાયે ગુણીજનના ગુણનું કીર્તન અને ગુણાનુરાગથી અમારો શ્રી જૈનસંઘ કૃતકૃત્ય બને અને અંતે એ પુણ્યાત્માઓ આત્મકલ્યાણ સાધી વહેલા મુક્તિ સંગી બને અને અમને પણ બનાવે એ જ શુભેચ્છા.

લિ.
સીસોદરા જૈન-સંઘ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

વિષયાનુક્રમણિકા

વિષય	પૃષ્ઠ
મગધદેશ - શ્રેણિકનૃપાદિનું વર્ણન	૧
શ્રી ગૌતમ સ્વામીની ધર્મદેશના	૪
નવપદોનું સ્વરૂપ	૬
શ્રીપાળચરિત્રનો પ્રારંભ	૯
સમસ્યાપદ પ્રદાન	૧૮
વર માટે સુરસુંદરીને પ્રશ્ન	૨૦
વર માટે મયણાસુંદરીને પ્રશ્ન	૨૧
મયણાસુંદરી - પ્રજાપાલનો સંવાદ	૨૨
રાજ વાટિકા માટે પ્રયાણ	૨૬
કુષ્ઠિવૃંદનું વર્ણન	૨૭
રાજાની પાસે કન્યાની માગણી	૨૯
મયણાએ સ્વહાથથી ઉંબરરાણાના હાથને પકડયો	૩૩
મયણાના ઉંબર રાણા સાથે વિધિપૂર્વક લગ્ન	૩૪
સુરસુંદરીના અરિદમન સાથે લગ્ન	૩૫
મયણાને બીજાની સાથે લગ્ન કરવા માટે ઉંબરરાણાનું સમજાવવું	૩૮
જિનમંદિરમાં ગમન	૪૦
ગુરુની પાસે ગમન	૪૪
સિદ્ધચક્રયંત્રના આલેખનનો વિધિ	૪૭
સિદ્ધચક્રની આરાધનાને યોગ્ય જીવનું વર્ણન	૫૩
સિદ્ધચક્રની આરાધનાનો વિધિ	૫૪
શ્રાવકોએ શ્રીપાલ-મયણાની કરેલી ભક્તિ	૫૬
ઉંબર રાણાએ નવપદની આરાધના શરૂ કરી	૫૭
શ્રીપાલમાતા અને શ્રીપાલનું મિલન	૬૧
શ્રીપાલમાતાએ પોતાનો વૃત્તાંત કહ્યો	૬૨
મંદિરમાં યુવાન સાથે મયણાને જોઇને માતા રૂપસુંદરીને થયેલી શંકા	૬૫
મયણાએ માતાની શંકાનું નિવારણ કર્યું	૬૭
શ્રીપાલની માતાએ મયણાની માતાની પ્રશંસા કરી	૬૮
શ્રીપાલના કુલનું વર્ણન	૬૯
શ્રીપાલની માતા કમલપ્રભાનું ભાગવું	૭૨
કુષ્ઠિવૃંદે કમલપ્રભાને રક્ષણ આપ્યું.	૭૪
કમલપ્રભાનું ઔષધ માટે કૌશાંબીનગરીમાં વૈદ્યની પાસે ગમન	૭૬
શ્રીપાલ આદિનું મામા પુણ્યપાલના ઘરે જવું	૭૬
મયણાને જોઇને પ્રજાપાલની શંકા અને સમાધાન	૭૭
પિતા પ્રજાપાલ અને મયણાનો વાર્તાલાપ	૭૮
શ્રીપાલ વગેરેનું પ્રજાપાલ રાજાના ઘરે જવું	૮૦
શ્રીપાલનું વિદેશગમન	૮૬
શ્રીપાલની સહાયથી વિદ્યાસાધકને વિદ્યા સિદ્ધ થઇ	૮૮
શ્રીપાલની દૃષ્ટિથી ધાતુવાદી પુરુષોને સુવર્ણરસની સિદ્ધિ થઇ	૮૯
શ્રીપાલનું ભરુચમાં આગમન	૯૦
ધવલશેઠના વહાણોનું સ્તંભન	૯૨
શ્રીપાલના સિંહનાદથી ધવલસુભટોનું ભાગવું	૯૪
શ્રીપાલની સાથે ધવલસુભટોનું યુદ્ધ	૯૫
શ્રીપાલે કરેલા નવપદના ધ્યાનથી વહાણો ચાલવા લાગ્યા	૯૭
શ્રીપાલનું ધવલની સાથે આગળ પ્રયાણ	૯૯
બબ્બરકૂલ બંદરે આગમન	૧૦૧
મહાકાલ રાજાએ ધવલને બાંધ્યો	૧૦૩
શ્રીપાલે ધવલને બંધનમુક્ત કર્યો	૧૦૬
શ્રીપાલના મદનસેના સાથે લગ્ન	૧૦૯
શ્રીપાલનું રત્નદ્વીપમાં આગમન	૧૧૦
અશ્વસવારે શ્રીપાલને રત્નસંચય નગરીના જિનમંદિરના દ્વાર ઉઘડતા નથી ઈત્યાદિ આશ્ચર્ય કહ્યું	૧૧૨
શ્રીપાલની દૃષ્ટિથી દ્વાર ઉઘડી ગયા	૧૨૪

For Private and Personal Use Only

ગુરુની પાસે ગમન	૪૪
સિદ્ધચક્રયંત્રના આલેખનનો વિધિ	૪૭
સિદ્ધચક્રના મહિમાનું વર્ણન	પર
ચારણમુનિની દેશનામાં નવપદોનું વર્ણન	૧૨૮
ચારણ મુનિએ શ્રીપાલની ઓળખાણ આપી	૧૩૩
શ્રીપાળના મંદનમંજૂષા સાથે લગ્ન	૧૩૫
ધવલ બંધનમાં પડયો અને શ્રીપાલની કૃપાથી મુક્ત બન્યો	૧૩૬
શ્રીપાલનું ધવલની સાથે આગળ પ્રયાણ	૧૩૮
શ્રીપાલનું સમુદ્રમાં પતન અને કોંકણના કિનારે આગમન	૧૪૭
શ્રીપાલનું સ્થાનપુર (થાણા) માં ગમન	૧૪૮
શ્રીપાલના મદનમંજરી સાથે લગ્ન	૧૪૯
શ્રીપાલ તાંબૂલપ્રદાનના અધિકારી બન્યા	૧૫૦
મદનસેના - મદનમંજૂષાનું રુદન	૧૫૧
સમુદ્રમાં ભયંકર ઉત્પાતો	૧૫૨
ક્ષેત્રપાલાદિ દેવો અને ચક્રેશ્વરી દેવીનું પ્રગટ થવું	૧૫૩
ક્ષેત્રપાલે ધવલના મિત્રને મારી નાખ્યો	૧૫૪
ધવલનું બંને સતીઓના શરણે જવું.	૧૫૪
ચક્રેશ્વરીએ બંને સતીઓને પતિની વિગત કહીને શીલરક્ષાર્થે કંઠમાં પુષ્પમાળા પહેરાવી	૧૫૫
ધવલની ફરી અશુભ વિચારણા અને પ્રવૃત્તિ	૧૫૭
ધવલનું કોંકણના કિનારે આગમન	૧૫૮
રાજાએ શ્રીપાલના હાથે ધવલને તાંબૂલ અપાવ્યું	૧૫૯
ડુંબ અને ધવલની મસલત	૧૬૧
પિતા પ્રજાપાલ અને મયણાનો વાર્તાલાપ	૭૮
શ્રીપાલ વગેરેનું પ્રજાપાલ રાજાના ઘરે જવું	૮૦
શ્રીપાલનું રાજવાટિકાએ ગમન	૮૧
શ્રીપાળ ઉપર માતંગપણાનો આરોપ	૧૬૩
શ્રીપાલના કુલની ખાતરી	૧૬૭
ધવલ બંધનમાં પડયો અને શ્રીપાલની કૃપાથી મુક્ત બન્યો	૧૬૮
ધવલનું મૃત્યુ	૧૭૦
સાર્થવાહે શ્રીપાલને કુંડલપુરની રાજપુત્રીની વીણાવાદનસંબંધી પ્રતિજ્ઞા કહી	૧૭૩
વિમલેશ્વરે મણિરત્નનો હાર આપ્યો	૧૭૫
શ્રીપાલનું કુંડલપુર આગમન	૧૭૬
શ્રીપાલના ગુણસુંદરી સાથે લગ્ન	૧૮૦
મુસાફરે શ્રીપાલને કંચનપુરની રાજપુત્રીના સ્વયંવરની વિગત કહી	૧૮૧
શ્રીપાલનું કંચનપુર ગમન	૧૮૩
શ્રીપાલના ત્રૈલોક્યસુંદરી સાથે	૧૮૯
ચરપુરુષે શ્રીપાલને દેવદલપુરની રાજપુત્રીની સમસ્યાપદપૂર્તિની વિગત કહી	૧૮૯
શ્રીપાલના પાંચસખીથી યુક્ત શૃંગાર સુંદરીની સાથે લગ્ન.	૧૯૬
શ્રીપાલને વિદેશીબ્રાહ્મણે કોલ્લાગપુરની રાજપુત્રીની રાધાવેધની વિગત કહી	૧૯૭
શ્રીપાલનું કોલ્લાગપુરગમન અને જયસુંદરી સાથે લગ્ન	૨૦૦
દ્વાર ઉઘડતા નથી ઇત્યાદિ આશ્ચર્ય કહ્યું	૧૧૨
શ્રીપાલની દૃષ્ટિથી દ્વાર ઉઘડી ગયા	૧૨૪
શ્રીપાલે કરેલી પ્રભુની સ્તુતિ	૧૨૫
સર્વ સ્વસ્ત્રીઓની સાથે શ્રીપાલનું સ્થાનપુર(થાણા) ગમન	૨૦૧
શ્રીપાલરાજાનો રાજ્યાભિષેક	૨૦૨
માતાને મળવા માળવાદેશ તરફ પ્રયાણ	૨૦૨
સોપારકમાં સર્પવિષ નિવારણથી તિલક સુંદરી રાજપુત્રીને જીવાડીને તેની સાથે લગ્ન	૨૦૬
શ્રીપાલસૈન્યે ઉજ્જૈનીનગરીને ઘેરી લીધી	૨૦૯
હારપ્રભાવથી શ્રીપાલનું માતાના ઘરે ગમન	૨૧૦
માતા-પત્નીને લઇને પોતાના આવાસમાં આગમન	૨૧૨
ખભા ઉપર કુહાડો મૂકીને પ્રજાપાલનું શ્રીપાલના આવાસમાં આગમન	૨૧૪
નાટકનો પ્રારંભ	૨૧૫
સુરસુંદરીનો વૃત્તાંત	૨૧૬
પરિચિતોનું મિલન	૨૨૧
ચંપાનગરીમાં દૂતપ્રેષણ	૨૨૪
અજિતસેનની દીક્ષા	૨૩૬
શ્રીપાલે કરેલી અજિતસેન મુનિની સ્તુતિ	૨૩૭
શ્રીપાલનો ચંપામાં પ્રવેશ અને રાજ્યાભિષેક	૨૩૯
અજિતસેનમુનિનું ચંપામાં આગમન અને દેશના	૨૪૧
શ્રીપાલે પૂછેલા પાંચ પ્રશ્નો	૨૪૮
શ્રીપાળનો પૂર્વભવનો વૃત્તાંત	૨૪૯
આ કોઢિયો છે એમ કહીને મુનિને પ્રહાર	૨૫૦

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

વિષય	પૃષ્ઠ
મુનિને ધક્કો મારીને સમુદ્રમાં પાડ્યા	૨૫૨
મુનિને માતંગ કહીને નગર બહાર કઢાવ્યા	૨૫૪
શ્રીસિદ્ધચક્રની આરાધના કરી	૨૫૬
શ્રીપાલ-મયણાની સિદ્ધચક્રની વિશિષ્ટ આરાધના	૨૬૧
શ્રીપાળ-મયણાએ કરેલી નવપદસ્તુતિ	૨૭૧
પુત્રાદિ પરિવાર	૨૭૩
શ્રીપાલે કરેલી અંતિમ સમયે નવપદસ્તુતિ	૨૭૪
શ્રીપાલ-મયણા વગેરેની ભવાંતરની વિગત	૨૯૩
પ્રત્યેક પદની આરાધનાથી લાભનાં દૃષ્ટાંતો	૨૯૪
શ્રી મહાવીર સ્વામીનું આગમન	૨૯૬
શ્રેણિકને ઉદ્દેશીને નવપદમાહાત્મ્યની દેશના	૨૯૭

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



પૂ. મુનિરાજ શ્રી હેત વિજયજી મ. સા.



પૂ. મુનિરાજ શ્રી હેમેન્દ્ર વિજયજી મ. સા.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



પૂ. મુનિરાજ શ્રી અક્ષયબોધિ વિજયજી મ. સા.



પૂ. સાધ્વી શ્રી સૌમ્ય જ્યોતિશ્રીજી મ. સા.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री गौतमस्वामिने नमः ॥ अर्हम् ॥ ॥ श्री सिद्धचक्राय नमः ॥

श्रीरत्नशेखरसूरिवरविरचिता

श्रीक्षमाकल्याणकवाचकविरचितावचूर्णिसमलङ्कृता

सिरिसिरिवालकहा

ध्यात्वा नवपदीं भक्त्या, श्रीश्रीपालमहीभुजः ।
चरित्रं कीर्त्तयिष्यामि, रम्यं संस्कृतभाषया ॥१॥

अरिहाइनवपयाइं, झाइत्ता हिअयकमलमज्झंमि । सिरिसिद्धचक्कमाहप्पमुत्तमं किंपि जंपेमि ॥१॥
अत्थित्थ जंबुदीवे, दाहिणभरहद्धमज्झिमे खंडे । बहुधणधन्नसमिद्धो, मगहादेसो जयपसिद्धो ॥२॥
जत्थुप्पन्नं सिरिवीरनाहतित्थं जयंमि वित्थरियं । तं देसं सविसेसं, तित्थं भासंति गीयत्था ॥ ३॥

अर्हदादिनवपदानि हृदयकमलमध्ये ध्यात्वा उत्तमं श्रीसिद्धचक्रस्य-यन्त्रराजस्य माहात्म्यं किमपि जल्पामि-कथयामि ॥१॥ अस्मिन् जम्बूद्वीपे दक्षिणभरतार्द्धस्य मध्यमे खण्डे बहुधनधान्यसमृद्धो जगत्प्रसिद्धो मगधाख्यो देशोऽस्ति ॥२॥ यत्र मगधाख्ये देशे उत्पन्नं श्रीवीरनाथस्य तीर्थं जगति विस्तृतं-विस्तारं प्राप्तम्, तं देशं गीतार्थाः सविशेषं तीर्थं भाषन्ते-वदन्ति ॥३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्थ य मगहादेसे, रायगिहं नाम पुरवरं अत्थि । वेभारविउलगिरिवरसमलंकियपरिसरपएसं ॥४॥
तत्थ य सेणियराओ, रज्जं पालेइ तिजयविक्खाओ । वीरजिणचलणभत्तो, विहिअज्जियतित्थयरगुत्तो ॥५॥
जस्सत्थि पढमपत्ती, नंदा नामेण जीइ वरपुत्तो । अभयकुमारो बहुगुणसारो चउबुद्धिभंडारो ॥६॥
चेडयनरिंदधूया, बीया जस्सत्थि चिल्लणा देवी । जीए असोगचंदो, पुत्तो हल्लो विहल्लो अ ॥७॥
अन्नाउ अणेगाओ, धारणीपमुहाउ जस्स देवीओ । मेहाइणो अणेगे, पुत्ता पियमाइपयभत्ता ॥८॥

तस्मिन् मगधाख्ये देशे राजगृहं नाम पुरवरमस्ति, कीदृशं तत् ?-वैभारविपुलाख्यगिरिवराभ्यां समलङ्कृतौ परिसरप्रदेशौ पार्श्वभागौ यस्य तत् एवंविधं पुरं वर्त्तते ॥ ४ ॥ तत्र च नगरे श्रेणिको नाम राजा राज्यं पालयति, कीदृशः राजा ? - त्रिजगद्विख्यातः पुनः ? वीरजिनचरणभक्तः, तथा विधिनाऽर्जितम्-उपार्जितं तीर्थकरनामकर्म येन सः एवंविधः ॥५॥ यस्य श्रेणिकराजस्य प्रथमपत्नी- प्रथमराज्ञी नन्दा नाम्नाऽस्ति, यस्याः-नन्दायाः प्रधानपुत्रोऽभयकुमारनामास्ति, कीदृशः? -बहुभिर्गुणैः सारः- श्रेष्ठः, पुनः? चतुर्बुद्धिभाण्डागारम् ॥ ६ ॥ यस्य श्रेणिकस्य द्वितीया देवी या देवी-राज्ञी चेटकनरेन्द्रस्य पुत्री चेलणा नाम्नी अस्ति, यस्याः चेल्लणायाः प्रथमपुत्रोऽशोकचन्द्रः- कूणिक इत्यर्थः, द्वितीयो हल्लः तृतीयो विहल्लश्च ॥७॥ अन्या अपि अनेका-बह्व्यो धारणीप्रमुखा यस्य राज्ञो देव्यः सन्ति, तत्कुक्षिसम्भवा मेघकुमारादयोऽनेके पुत्राः सन्ति, कीदृशाः?-पितुर्मातुश्च पदयोः-चरणयोः भक्ताः ॥८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सो सेणियनरनाहो, अभयकुमारेण विहियउच्छाहो । तिहुयणपयडपयावो, पालइ रज्जं च धम्मं च ॥९॥
एयंमि पुणो समए, सुरमहिओ वद्धमाणतित्थयरो । विहरंतो संपत्तो, रायगिहासन्ननयरंमि ॥१०॥
पेसेइ पढमसीसं, जिट्ठं गणहारिणं गुणगरिट्ठं । सिरिगोयमं मुणिंदं, रायगिहलोयलाभत्थं ॥११॥
सो लद्धजिणाएसो, संपत्तो रायगिहपुरोज्जाणे । कइवयमुणिपरियरिओ, गोयमसामी समोसरिओ ॥१२॥
तस्सागमणं सोउं, सयलो नरनाहपमुहपुरलोओ । नियनियरिद्धिसमेओ, समागओ झत्ति उज्जाणे ॥१३॥

स श्रेणिकनरनाथः अभयकुमारेण विहितः-कृत उत्साहो यस्य सः,पुनः ? -त्रिभुवने प्रकटः प्रतापो यस्य स एवंविधः सन् राज्यं च धर्मं च पालयति ॥९॥ एतस्मिन् समये-अवसरे पुनः सुरैः-देवैः महितः - पूजितः श्री वर्द्धमानतीर्थङ्करः विचरन् राजगृहनगरस्य आसन्ने-समीपस्थे कस्मिंश्चिन्नगरे सम्प्राप्तः ॥१०॥ ततो भगवान् स्वकीयं प्रथमशिष्यं ज्येष्ठं-वृद्धं, गणधारिणं-गणधरं, पुनः ? गुणैर्गरिष्ठम्, ईदृशं श्रीगौतमं मुनीन्द्रं राजगृहनगरलोकस्य लाभार्थं प्रेषयति ॥११॥ स गौतमस्वामी लब्धः-प्राप्तः जिनादेशो-जिनाज्ञा येन सः, एवंविधः सन् राजगृहपुरोद्याने सम्प्राप्तः, कतिपयैः-कियद्भिर्मुनिभिः परिकरितः-परिवृतः तत्र समवसृतः ॥१२॥ तस्य-गौतस्वामिन आगमनं श्रुत्वा सकलः-समस्तः नरनाथप्रमुखो-राजादिर्लोकः निजनिजऋद्ध्या卐 समेतः-संयुक्तः झटिति-शीघ्रं उद्याने समागतः ॥१३॥

卐 અહીં ऋलृति ह्स्वो वा (१-२-२ सि. हे.) એ સૂત્રથી સંધિ થઈ નથી.

For Private and Personal Use Only

पंचविहं अभिगमणं, काउं तिपयाहिणाउ दाऊणं। पणमिय गोयमचलणे, उवविट्ठो उचियभूमिए ॥१४॥
भयवंपि सजलजलहर-गंभीरसरेण कहिउमाढत्तो। धम्मसरूवं सम्मं परोवयारिक्कतल्लिच्छो ॥१५॥
भो भो महाणुभावा !, दुलहं लहिऊण माणुसं जंमं। खित्तकुलाइपहाणं, गुरुसामग्गिं च पुण्णवसा ॥ १६॥
पंचविहंपि पमायं,गुरुयावायं विवज्जिउं झत्ति। सद्धम्मकम्मविसए, सम्मुज्जमो होइ कायव्वो ॥१७॥ युग्मम् ॥
सो धम्मो चउभेओ, उवइट्ठो सयलजिणवरिंदेहिं। दाणं सीलं च तवो, भावोऽवि अ तस्सिमे भेया ॥१८॥

ततः पञ्चविधं अभिगमनं-सचित्तद्रव्यव्युत्सर्जनादिकं कृत्वा पुनस्तिस्रः प्रदक्षिणाः दत्त्वा गौतमस्वामिचरणौ प्रणम्य उचितायां-स्वस्वयोग्यायां भूमौ उपविष्टः ॥१४॥ भगवान् गौतमोऽपि सजलो यो जलधरो-मेघः तद्वद् गम्भीरस्वरेण सम्यग्धर्मस्वरूपं कथयितुम् आढत्तोत्ति-आरब्धः- प्रारम्भं कृतवान्. कीदृशो भगवान् ? -परोपकारे एका सा एव लिप्सा यस्य स तथा, परोपकारैकतत्पर इत्यर्थः ॥१५॥ अहो महानुभावाः ! पुण्यवशात् दुर्लभं मानुष्यं जन्म लब्ध्वा पुनः प्रधानं क्षेत्रकुलादि-आर्यक्षेत्रार्यकुलादिकं लब्ध्वा च - पुनः गुरुसामग्रीं-सद्गुरुसंयोगं लब्ध्वा-प्राप्य ॥१६॥ मज्जं विसयकसायेत्यादिकं पञ्चविधं-पञ्चभेदं, पुनः गुरुकोऽपायः कष्टं यस्मात् स तं, महाकष्टकारणमित्यर्थः, एवंविधं प्रमादं झटिति-शीघ्रं विवर्ज्य-वर्जयित्वा सद्धर्मकर्म्मविषये- सम्यग्धर्मकार्यविषये इत्यर्थः, सं- सम्यक्प्रकारेण उद्यमः कर्तव्यो भवति, कर्तुं योग्योऽस्तीत्यर्थः ॥१७॥ स धर्मश्चतुर्भेदः-चतुष्प्रकारः, सकलजिनवरेन्द्रैः उपदिष्टः- कथितः, तानेव भेदानाह- दानं १ शीलं २ तपः ३भावः ४, अपि चेति समुच्चये, तस्य धर्मस्य इमे चत्वारो भेदाः ॥ १८॥

तत्थवि भावेण विणा, दाणं न हु सिद्धिसाहणं होई । सीलंपि भाववियलं, विहलं चिय होइ लोगंमि ॥१९॥
भावं विणा तवोवि हु, भवोहवित्थारकारणं चेव । तम्हा नियभावुच्चिय,सुविसुद्धो होइ कायव्वो ॥२०॥
भावोवि मणोविसओ, मणं च अइदुज्जयं निरालंबं । तो तस्स नियमणत्थं, कहियं सालंबणं झाणं ॥२१॥
आलंबणाणि जइवि हु, बहुप्पयाराणि संति सत्थेसु । तहवि हु नवपयझाणं, सुपहाणं बिंति जगगुरुणो ॥२२॥
अरिहं सिद्धायरिया, उज्झाया साहुणो अ सम्मत्तं । नाणं चरणं च तवो, इय पयनवगं मुणेयव्वं ॥२३॥

तत्रापि भावेन विना दानं सिद्धिसाधकं-मोक्षदायकं न भवति, हुः-निश्चये, शीलमपि भावविकलं-भावरहितं सत् लोके विफलं-निष्फलमेव भवति, चियेत्यवधारणे ॥१९॥ भावं विना तपोऽपि भवौघस्य -भवसमूहस्य भवप्रवाहस्य वा यो विस्तार तस्य कारणमेवास्ति, एतावता भवभ्रमणकारणं न तु मुक्तिकारणमित्यर्थः, तस्मात् कारणात् निजभाव एव सुतरां विशुद्धो-निर्मलः कर्तव्यो भवति, कर्त्तुं योग्योऽस्ति ॥२०॥ भावोऽपि मनोविषयो-मनोगोचरोऽस्ति, मनश्च निरालम्बम्-आलम्बनरहितं सत् अतिदुर्जयम् - अतिशयेन दुर्जयं विद्यते, ततस्तस्मात् कारणात् तस्य मनसो नियमनार्थ-वशीकरणार्थं सालम्बनम्-आलम्बनसहितं ध्यानं कथितम् ॥२१॥ यद्यपि आलम्बनानि शास्त्रेषु बहुप्रकाराणि सन्ति, तथापि हु इति निश्चयेन, जगद्गुरवः-श्रीजिनेन्द्रा नवपदध्यानं सुतरां प्रधानमालम्बनं ब्रुवन्ति ॥ २२ ॥ अथ नवपदनामान्याह - अर्हन्तः १ सिद्धा २ आचार्या ३ उपाध्यायाः ४ साधवश्च ५ सम्यक्त्वं ६ ज्ञानं ७ चारित्रं ८ तपः ९ इति पदनवकं ज्ञातव्यम् ॥ २३ ॥

तत्थऽरिहंतेऽट्ठारसदोसविमुक्के विसुद्धनाणमए । पयडियतत्ते नयसुरराये झाएह निच्चंपि ॥२४॥
पनरसभेयपसिद्धे, सिद्धे घणकम्मबंधणविमुक्के। सिद्धाणंतचउक्के, झायह तम्मयमणा सययं ॥२५॥
पंचायारपवित्ते, विसुद्धसिद्धंतदेसणुज्जुत्ते । परउवयारिक्कपरे, निच्चं झाएह सूरिवरे ॥२६॥

तत्र-तस्मिन् पदनवके प्रथमपदे नित्यमपि अर्हतो ध्यायत, यूयमिति शेषः, कीदृशान् अर्हतः?-अष्टादशदोषैर्विमुक्तान् पुनर्विशुद्धं-निर्मलं यत् ज्ञानं तत्स्वरूपमयानिति, पुनः प्रकटितानि तत्त्वानि यैः ते तान्,पुनर्नताः सुरराजा-इन्द्रा येभ्यस्ते तान् ॥२४॥ भो भव्या ! यूयं तन्मयमनसः सन्तः जिनाजिनादिपञ्चदशभेदैः प्रसिद्धान् सततं-निरन्तरं ध्यायत, तन्मयं-सिद्धमयं मनो येषां ते इति समासः, कीदृशान् सिद्धान्?-घनानि-निबिडानि यानि कर्म्मबन्धनानि तेभ्यो विमुक्तान्, पुनः सिद्धं-निष्पन्नम् अनन्तचतुष्कम्-अनन्तज्ञानदर्शनसम्यक्त्वाकरणवीर्यरूपं (चतुष्कं) येषां ते तान् ॥२५॥ भो भव्या ! नित्यं सूरिवरान्-आचार्यान् ध्यायत, कीदृशान् सूरिवरान्? - ज्ञानाचारादिपञ्चाचारैः पवित्रान्-निर्मलान्, पुनर्विशुद्धा-निर्मला ये सिद्धान्ता-जिनागमाः तेषां देशना-उपदेशस्तत्र उद्यता-उद्यमवन्तः तान्, पुनः ? परोपकार एव एकं-प्रधानं येषां ते तान्, परोपकारकरणै कतत्परानित्यर्थः ॥ २६ ॥

गणतित्तीसु निउत्ते, सुत्तत्थज्झावणंमि उज्जुत्ते । सज्झाए लीणमणे, सम्मं झाएह उज्झाए ॥२७॥
सव्वासु कम्मभूमिसुं, विहरंते गुणगणेहि संजुत्ते । गुत्ते मुत्ते झायह, मुणिराए निट्ठियकसाए ॥२८॥
सव्वन्नुपणीयागमपयडियतत्तत्थसद्दहणरूवं । दंसणरयणपईवं, निच्चं धारेह मणभवणे ॥२९॥
जीवाजीवाइपयत्थसत्थतत्तावबोहरूवं च ॥ नाणं सव्वगुणाणं, मूलं सिक्खेह विणएणं ॥३०॥

भो भव्या ! यूयं सम्यक्-यथा स्यात्तथा उपाध्यायान् ध्यायत, कीदृशान् उपाध्यायान् ?-गणस्य-गच्छस्य तप्तिषु-सारणादिषु नियुक्तास्तान् अधिकारिण इत्यर्थः, पुनः ? -सूत्रार्थाध्यापने उद्यतान्-उद्यमवत इत्यर्थः, स्वाध्याये लीनं-मग्नं मनो येषां ते तान् ॥ २७ ॥ भो भव्या ! यूयं सर्वासु कर्म्मभूमिषु-भरतादिपञ्चदशक्षेत्रेषु विचरतो मुनिराजान्-साधून् ध्यायत, कीदृशान् मुनिराजान् ? गुणानां गणैः-समूहैः संयुक्तान्, पुनः ? गुप्तान्-गुप्तित्रययुक्तान्, पुनः?-मुक्तान्- सर्वसङ्गवर्जितान्, पुनः ? निष्ठिता-अन्तं प्राप्ताः कषाया येषां ते तान् ॥२८॥ भो भव्याः ! सर्वज्ञैः प्रणीता-उक्ताः ये आगमाः- सिद्धान्तास्तेषु प्रकटिताः --प्रकटीकृता ये तत्त्वार्थाः - तद्रूपा अर्थास्तेषां यत् श्रद्धानं तद्रूपं दर्शनरत्नप्रदीपं-सम्यक्त्वरूपरत्नप्रदीपकं नित्यं-सर्वदा मनोभवने-मनोमन्दिरे धारयत ॥२९॥ भो भव्याः ! जीवाजीवादयो ये पदार्थास्तेषां सार्थः समूहस्तस्य यस्तत्त्वावबोधः -तत्त्वज्ञानं स्वरूपं यस्य तत् एवंविधं च - पुनः ज्ञानं विनयेन-विनयं कृत्वा यूयं शिक्षत, कीदृशं ज्ञानं ? - सर्व्वगुणानां मूलं - मूलकारणम् ॥३०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असुहकिरियाण चाओ, सुहासु करियासु जो य अपमाओ । तं चारित्तं उत्तमगुणजुत्तं पालह निरुत्तं ॥३१॥
घणकम्मतमोभरहरणभाणुभूयं दुवालसंगधरं । नवरमकसायतावं, चरेह सम्मं तवोकम्मं ॥३२॥
एयाइं नवपयाइं, जिणवरधम्मंमि सारभूयाइं । कल्लाणकारणाइं, विहिणा आराहियव्वाइं ॥३३॥
अन्नं च- एएहिं नवपएहिं, सिद्धं सिरिसिद्धचक्कमाउत्तो । आराहंतो संतो, सिरिसिरिपालुव्व लहइ सुहं ॥३४॥

यः अशुभक्रियाणां-पापव्यापाराणां त्यागश्च - पुनः शुभासु क्रियासु-निरवद्यव्यापारेषु अप्रमादः-अप्रमत्तता तच्चारित्रं यूयं पालयत, कीदृशं तत् ?-उत्तमगुणैर्युक्तम्, पुनः कीदृशं ?-निरुक्तं-पदभञ्जनेन निष्पन्नं, तथाहि- चयः-कर्मसञ्चयो रिक्तो भवति अनेनेति चारित्रम् (बाहुलकात् साधु) ॥३१॥ भो भव्याः ! यूयं सम्यक् तपः कर्म--तपःक्रियां चरत-आचरत, कीदृशं तपःकर्म? घनानि-निबिडानि यानि कर्म्माणि-ज्ञानावरणादीनि तान्येव तमांसि- अन्धकाराणि तेषां भरः-समूहः तस्य हरणे भानुभूतं-सूर्यतुल्यं, पुनः कीदृशं तपः ? -द्वादशाङ्गधरं तपसो द्वादशभेदत्वात्, सूर्यपक्षे लोके द्वादशसूर्याणां रूढत्वात्, नवरमिति विशेषः - सूर्यस्तापकारको भवति इदं तपस्तु अकषायतापं-न विद्यते कषायरूपस्तापो यस्मिंस्तत्, एतावता कषायरहितमेव तपः सेव्यमित्यर्थः ॥३२॥ एतानि नवपदानि जिनवरधर्म्मे-श्रीजिनोक्तधर्म्मविषये सारभूतानि, अत एव कल्याणकारकाणि सन्ति, तस्माद्विधिना आराध्यानि भवद्भिरिति शेषः ॥३३॥ अन्यच्च-अन्यदपि श्रुणुत, एतैर्नवभिः पदैः सिद्धं-निष्पन्नं श्रीसिद्धचक्रमायुक्त-उद्यमयुक्त आराधयन् सन् श्रीश्रीपालनामा राजा इव सुखं लभते, मनुष्य इति शेषः ॥ ३४ ॥

For Private and Personal Use Only

तो पुच्छइ मगहेसो, को एसो मुणिवरिंद ! सिरिपालो ? । कह तेण सिद्धचक्कं, आराहिय पावियं सुक्खं ? ॥३५॥
तो भणइ मुणी निसुणसु, नरवर ! अक्खाणयं इमं रम्मं । सिरिसिद्धचक्कमाहप्पसुंदरं परमचुज्जकरं ॥३६॥
तथाहि- इत्थेव भरहखित्ते,दाहिणखंडंमि अत्थि सुपसिद्धो । सव्वड्ढिकयपवेसो, मालवनामेण वरदेसो ॥ ३७॥
सो य केरिसो ?- पए पए जत्थ सुगुत्तिगुत्ता, जोगप्पवेसा इव संनिवेसा ।
पए पए जत्थ अगंजणीया, कुडुंबमेला इव तुंगसेला ॥ ३८॥

ततो गौतमस्वाम्युपदेशानन्तरं मगधेशः-श्रेणिकः पृच्छति हे मुनिवरेन्द्र ! एष श्रीपालः कः ? तेन श्रीपालेन राज्ञा श्रीसिद्धचक्रमाराध्य कथं सुखं प्राप्तं -लब्धम् ? ॥३५॥ ततो मुनिः- गौतमो भणति, हे नरवर!-हे श्रेणिकराजन् ! इदं श्रीपालनृपसम्बन्धि रम्यं -मनोज्ञम् आख्यानकं-कथानकं त्वं श्रृणु, कीदृशमाख्यानकम् ?- श्रीसिद्धचक्रस्य यत् माहात्म्यं तेन सुन्दरं-रमणीयम्, अत एव परमाश्चर्यकरम् ॥३६॥ तदेव दर्शयति, अत्रैव भरतक्षेत्रे दक्षिणखण्डे-दक्षिणार्द्धे मालवनाम्ना सुप्रसिद्धो वरदेशोऽस्ति, कीदृशो मालवदेशः? सर्वर्ध्या कृतः प्रवेशो यस्मिन् स ईदृशः ॥३७॥ च- पुनः स कीदृशः ? - यत्र मालवदेशे पदे पदे संनिवेशा-ग्रामाः सन्ति, कीदृशाः ? सुगुप्तिभिः-सम्यग्वृत्तिभिर्गुप्ता- रक्षिता वेष्टिता इति यावत्, संनिवेशाः के इव ? - योगप्रवेशा इव योगे प्रवेशो येषां ते तथोक्ता योगिन इवेत्यर्थः, यतः योगिनोऽपि सुगुप्तिभिर्मनोगुप्त्यादिभिर्गुप्ता भवन्ति, पुनः यत्र देशे पदे पदे तुङ्गा -उच्चैस्तराः शैलाः - पर्वताः सन्ति, कीदृशाः ? - अगञ्जनीयाः -जनानामलङ्घनीयाः, के इव ? - कुटुम्बमेला इव यतः तेऽपि लोकानामगञ्जनीया भवन्ति ॥ ३८ ॥

पए पए जत्थ रसाउलाओ, पणंगणाओव्व तरंगिणीओ। पए पए जत्थ सुहंकराओ, गुणावलीओव्व वणावलीओ ॥३९॥
पए पए जत्थ सवाणियाणि, महापुराणीव महासराणी। पए पए जत्थ सगोरसाणि, सुहीमुहाणीव सुगोउलाणि ॥४०॥
तत्थ य मालवदेसे, अकयपवेसे दुकालडमरेहिं। अत्थि पुरि पोराणा, उज्जेणी नाम सुपहाणा ॥ ४१॥

पुनः यत्र देशे पदे पदे रसाकुला-जलभृताः तरङ्गिण्यो-नद्यः सन्ति, का इव?- पणाङ्गना इव-वेश्या इव, यतस्ता अपि रसाकुला- शृङ्गाररसेन व्याप्ता भवन्ति, पुनर्यत्र देशे पदे पदे सुखकारिण्यः वनावलयो-वनानां श्रेणयः सन्ति, का इव?- गुणानामावलयः - श्रेण्य इव, यतस्ता अपि सुखङ्कराः भवन्ति ॥३९॥ पुनर्यत्र देशे पदे पदे सपानीयानि-पानीयसहितानि जलभृतानीति यावत् महान्ति सरांसि सन्ति, कानीव? - महापुराणीव, यतः तान्यपि सह वाणिजैः-वणिग्भिर्वर्तन्ते इति सवाणिजानि भवन्ति, पुनर्यत्र देशे पदे पदे सुष्ठु-शोभनानि गोकुलानि सन्ति, कीदृशानि ? सह गोरसेन-दधिदुग्धादिना वर्तन्ते इति सगोरसानि, तानि कानि इव ? - सुधियां-पण्डितानां मुखानि इव,यतस्तान्यपि गोः-वाण्या रसो गोरसः तेन सहितानि भवन्ति ॥४०॥ तत्र च - तस्मिन् मालवदेशे पुराणा-जीर्णा "उज्जयिनी" नाम सुतरां प्रधाना पुरी अस्ति, कीदृशे मालवदेशे ? दुष्कालेत्यादि, दुष्कालो दुर्भिक्षः डमरो-विप्लवः बलात् परद्रव्यापहरणा लुण्टिकोपद्रव इति यावत्, दुष्कालश्च डमरश्च दुष्कालडमरौ ताभ्यामकृतः प्रवेशो यस्मिन् स तस्मिन् ॥४१॥

सा य केरिसा ? - अणेगसो जत्थ पयावईओ, नरुत्तमाणं च न जत्थ संखा
महेसरा जत्थ तिहे गिहेसु, सुचीवरा जत्थ समग्गलोया ॥४२॥
घरे घरे जत्थ रमंति गोरी-गणा सिरीओ अ पए पए अ। वणे वणे यावि अणेगरंभा,रई अ पीईविय ठाणठाणे ॥४३॥

सा च उज्जयिनीपुरी कीदृशी ? इत्याह- यत्र- यस्यां नगर्यामनेकशः प्रजानां पतयः सन्ति, लोके तु एक एव प्रजापतिः ब्रह्मा प्रसिद्धोऽस्ति, तत्र तु अनेके प्रजानां-सन्ततीनां पतयः-स्वामिनः सन्तीत्यर्थः, पुनः यत्र नगर्यां नरोत्तमानां-पुरुषोत्तमानां सङ्ख्या नास्ति, लोके तु एक एव पुरुषोत्तमः श्रीकृष्णः प्रसिद्धोऽस्ति, तत्र तु बहवः पुरुषोत्तमाः सन्तीत्यर्थः, पुनः यत्र नगर्यां गृहे गृहे महेश्वराः- महर्द्धिकाः सन्ति,लोके तु एक एव महेश्वरः प्रसिद्धोऽस्ति, एकादश वा, तत्र तु गृहे गृहे इभ्याः सन्तीत्यर्थः, पुनः यत्र नगर्यां समग्रलोकाः - सर्वलोकाः सचीवराः सन्ति, लोके तु एक एव शच्या-इन्द्राण्या वरः शचीवर-इन्द्रः प्रसिद्धोऽस्ति, तत्र तु सर्वेऽपि लोकाः सह चीवरैः -वस्त्रैर्वर्त्तन्ते इति सचीवराः सन्तीत्यर्थः ॥४२॥ यत्र नगर्यां गृहे गृहे गौर्यः- अदृष्टरजसः कन्याः तासां गणाः- समूहा रमन्ते क्रीडन्ति, लोके तु कैलासे रममाणा एकैव गौरी-पार्वती प्रसिद्धाऽस्ति, तत्र तु गृहे गृहे गौर्यः सन्तीत्यर्थः, लोके तु एकैव श्री : - कृष्णभार्याऽस्ति,यत्र पदे पदे श्रियो-लक्ष्म्यः सन्ति, लोके तु एकैव रम्भा-देवाङ्गना प्रसिद्धास्ति, यस्यां नगर्यां तु वने वनेऽपि अनेका रम्भाः कदल्यः सन्ति, पुनः यत्र रतिश्च प्रीतिरपि च स्थाने स्थाने अस्ति, लोके तु रतिः -कामस्त्री सा एकैवास्ति, प्रीतिरपि देवाङ्गना एकैवास्ति, तत्र तु स्थाने स्थाने रतिः-परस्परराग: प्रीतिश्चास्ति ॥४३॥

तीसे पुरीई सुरवरपुरीई अहियाइ वण्णणं काउं । जइ निउणबुद्धिकलिओ, सक्कगुरू चेव सक्केइ ॥ ४४ ॥
तत्थत्थि पुहविपालो, पयपालो नामओ अ गुणओ अ । जस्स पयावो सोमो, भीमो विय सिट्ठदुट्ठजणे ॥४५॥
तस्सवरोहे बहुदेहसोहअवहरियगोरिगव्वेवि । अच्चंतं मणहरणे, निउणाओ दुन्नि देवीओ ॥४६॥
सोहग्गलडहदेहा, एगा सोहग्गसुंदरीनामा । बीया अ रूवसुंदरिनामा रूवेण रइतुल्ला ॥४७॥

सुरवरपुर्या-इन्द्रपुर्या अधिकायाः तस्या उज्जयिनीपुर्या वर्ण्णनं कर्त्तुम् यदि निपुणबुद्ध्या कलितो-युक्तः कश्चित् शक्नोति तर्हि शक्रगुरुः- बृहस्पतिरेव शक्नोति-समर्थो भवति, नान्य इति भावः, लोकोक्त्या बृहस्पतिः शक्रगुरुरुच्यते ॥४४॥ तत्र नगर्यां प्रजापालो नाम पृथिवीपालो-राजाऽस्ति, स च नामतश्च गुणतश्च प्रजापाल एव, प्रजाः पालयतीति व्युत्पत्तेः, स कीदृशः ? इत्याह- यस्य प्रतापः शिष्टेषु दुष्टेषु च सौम्यो - मनोहरो भीमो-भयङ्करश्चापि क्रमेण विद्यते, शिष्टेषु-सत्पुरुषेषु सौम्यः दुष्टेसु भीम इत्यर्थः ॥४५॥ तस्य राज्ञः अवरोधेऽन्तःपुरे द्वे देव्यौ- राज्यौ मनोहरणे-पत्युर्मनोरञ्जने अत्यन्तं निपुणे स्तः कीदृशेऽवरोधे ? बहुदेहशोभाऽपहृतगौरीगर्व्वेऽपि- बह्वी या देहस्य -शरीरस्य शोभा तया अपहृतो गौर्याः -पार्वत्या गर्वः - अहङ्कारो येन स तस्मिन्, एतादृशेऽपि अन्तःपुरे द्वे देव्यौ विशेषतः सौभाग्यवत्यौ स्त इत्यर्थः ॥ ४६॥ ते द्वे एव नामत आह- तयोर्मध्ये एका सौभाग्यसुन्दरीनामा द्वितीया च रूपसुन्दरीनामा, तत्राद्या कीदृशी? - सौभाग्यलडहदेहा-सौभाग्येन मनोहरो देहो यस्याः सा तथा, द्वितीया रूपेण रतितुल्या ॥ ४७ ॥

पढमा माहेसरकुल-संभूया तेण मिच्छदिट्ठित्ति । बीया सावगधूया, तेणं सा सम्मदिट्ठित्ति ॥४८॥
ताओ सरिसवयाओ, समसोहग्गाउ सरिसरूवाओ । सावत्तेवि हु पायं, परुप्परं पीतिकलियाओ ॥४९॥
नवरं ताण मणट्ठिय-धम्मसरूवं वियारयंताणं । दूरेण विसंवाओ, विसपीउसेहिँ सारिच्छो ॥५०॥
ताओ अ रमंतीओ, नवनवलीलाहिं नरवरेण समं । थोवंतरंमि समए, दोवि सगब्भाउ जायाओ ॥५१॥

तत्र प्रथमा सौभाग्यसुन्दरी माहेश्वरकुले सम्भूता-उत्पन्नाऽस्ति तेन कारणेन मिथ्या-विपरीता दृष्टिर्यस्याः सा मिथ्यादृष्टिरिति आसीत्, द्वितीया श्रावकपुत्री अस्ति, तेन कारणेन सा रूपसुंदरी समीचीना-सत्या दृष्टिर्यस्याः सा सम्यग्दृष्टिः इत्यासीत् ॥४८॥ ते द्वे राज्ञ्यौ कीदृश्यौ स्तः इत्याह- सदृशं वयो-यौवनावस्था ययोस्ते सदृशवयसौ पुनः समं-सदृशं सौभाग्यं ययोः ते समसौभाग्ये, पुनः सदृशं रूपं सौन्दर्यं ययोस्ते समरूपे, पुनः सपत्न्या भावः सापत्नं तस्मिन् सापत्नेऽपि सति, हु इति निश्चितं, प्रायो-बाहुल्येन परस्परं प्रीत्या कलिते-युक्ते स्तः ॥४९॥ नवरमिति विशेषः- स्वमनःस्थितधर्मस्वरूपं विचारयन्त्योस्तयोः द्वयोः राज्ञ्योः दूरेण-अत्यर्थं विसंवादो-विवाद आसीत्, कीदृशो विसंवादः ? विषपीयूषैः-विषामृतैः सदृक्षः परस्परविरुद्धत्वादिति भावः ॥५०॥ ते च द्वे अपि राज्ञ्यौ नरवरेण-राज्ञा समं-सार्द्धं नवनवलीलाभिः -अपूर्वापूर्वक्रीडाभिः रममाणे-क्रीडन्त्यौ स्तोकश्वासावन्तर इति तस्मिन् समये-काले सगर्भे-गर्भवत्यौ जाते ॥५१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समयंमि पसूयाओ, जायाओ कन्नगाउ दोहिंपि। नरनाहोवि सहरिसो, वद्धावणयं करावेई ॥ ५२॥
सोहग्गसुंदरीनंदणाइ सुरसुंदरीत्ति वरनामं। बीयाइ मयणसुंदरि, नामं च ठवेइ नरनाहो ॥५३॥
समये समप्पियाओ, ताओ सिवधम्मजिणमयविऊणं। अज्झावयाण रन्ना, सिवभूतिसुबुद्धिनामाणं ॥५४॥
सुरसुंदरी अ सिक्खइ, लिहियं गणियं च लक्खणं छंदं। कव्वमलंकारजुयं, तक्कं च पुराणसमिईओ ॥५५॥
सिक्खेइ भरहसत्थं,गीयं नट्टं च जोइसतिगिच्छं। विज्जं मंत तंतं, हरमेहलचित्तकम्माइं ॥५६॥

द्वाभ्यामपि राज्ञीभ्यां समये-पूर्णकाले कन्यके जाते-प्रसूते नरनाथो-राजापि सहर्षः सन् वर्द्धापनकं कारयति ॥५२॥ नरनाथो-राजा सौभाग्यसुन्दर्या या नन्दना नाम पुत्री तस्याः सुरसुन्दरीति वरं-प्रधानं नाम स्थापयति, च - पुनः द्वितीयाया रूपसुन्दरीपुत्र्या मदनसुन्दरीति नाम स्थापयति ॥५३॥ समयेऽध्ययनकाले ते द्वे अपि कन्यके शिवधर्म्मजिनमतविदोः शिवधर्म्मजिनधर्म्मज्ञायकयोः शिवभूतिसुबुद्धिनाम्नोः अध्यापकयोः-पाठकयो राज्ञा समर्पिते, अध्ययनार्थं दत्ते इत्यर्थः ॥५४॥ सुरसुन्दरी च प्रथमं लिखितं- लेखनकलां शिक्षति, च-पुनर्गणितं-गणनकलां शिक्षति, ततो वस्तूनां लक्षणं शिक्षति, तथा छन्दःशास्त्रं, तथाऽलङ्कारैर्युतं काव्यशास्त्रं, तथा पुराणानि स्मृतिश्च शिक्षति ॥५५॥ पुनर्भरतशास्त्रं-नाट्यशास्त्रं शिक्षति, तथा गीतं-गानं च - पुनर्नाट्यं-नर्त्तितं शिक्षति, तथा ज्योतिश्शास्त्रं रोगचिकित्साशास्त्रं च शिक्षति, पुनर्विद्यां मन्त्रं च शिक्षति, तथा हरमेखलचित्रकर्माणि-कलाविशेषान् शिक्षति ॥ ५६ ॥

For Private and Personal Use Only

अन्नाइंपि कुंडलविंटलाइं करलाघवाइकम्माइं । सत्थाइं सिक्खियाइं, तीइ चमुक्कारजणयाइं ॥५७॥
सा कावि कला तं किंपि, कोसलं तं च नत्थि विन्नाणं । जं सिक्खियं न तीए, पन्नाअभिओगजोगेणं ॥५८॥
सविसेसं गीयाइसु, निउणा वीणाविणोयलीणा सा । सुरसुंदरी वियड्ढा, जाया पत्ता य तारुन्नं ॥५९॥
जारिसओ होइ गुरू, तारिसओ होइ सीसगुणजोगो । इत्तुच्चिय सा मिच्छा-दिट्ठी उक्किट्ठदप्पा अ ॥६०॥
तह मयणसुंदरीवि हु, एयाउ कलाओ लीलमित्तेण । सिक्खेइ विमलपन्ना, धन्ना विणएण संपन्ना ॥ ६१॥

तथा सुरसुन्दर्या अन्यान्यपि कुण्टलविण्टलानि-कार्मणवशीकरणादीनि शिक्षितानि, पुनः करलाघवादीनि-हस्तचापलादीनि कर्माणि-क्रियाविशेषाः शिक्षितानि, तथा अन्यान्यपि चमत्कारजनकानि-जनानां चित्तेषु चमत्कारोत्पादकानि शास्त्राणि शिक्षितानि ॥५७॥ सा कापि कला नास्ति तत् किमपि कौशल्यं-निपुणत्वं नास्ति, च- पुनस्तत् विज्ञानं-चातुर्यं नास्ति, यत् तया सुरसुन्दर्या न शिक्षितं, केनेत्याह- प्रज्ञा-बुद्धिः अभियोगः-उद्यमस्तयोर्योगेन ॥५८॥ सविशेषं गीतादिषु निपुणा-दक्षा पुनर्वीणाविनोदे लीना-मग्ना सा सुरसुन्दरी विदग्धा - छेका जाता, तारुण्यं च-यौवनं प्राप्ता ॥५९॥ यादृशको गुरुर्भवति तादृशक एव प्रायः शिष्ये गुणयोगो - गुणसम्बन्धो भवति, इतः - अस्मात्कारणादेव सा सुरसुन्दरी मिथ्यादृष्टिः उत्कृष्टदर्पा च आसीत्, मिथ्या दृष्टिर्यस्याः सा, उत्कृष्टो दर्पो - मानो यस्या सा इति समासः ६०॥ तथा मदनसुन्दरी अपि एताः प्रागुक्ता लेखनाद्याः लीलामात्रेण शिक्षति,कीदृशी मदनसुन्दरी ?-विमला - निर्मला प्रज्ञा-बुद्धिर्यस्याः सा विमलप्रज्ञा, तथा धन्या-धर्मधनं लब्धी, तथा विनयेन सम्पन्ना-युक्ता ॥६१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिणमयनिउणेणज्झावएण सा मयणसुंदरी बाला । तह सिक्खविया जह जिणमयंमि कुसलत्तणं पत्ता ॥६२॥
एगा सत्ता दुविहो, नओ य कालत्तयं गइचउक्कं। पंचेव अत्थिकाया,दव्वछक्कं च सत्त नया ॥६३॥
अट्ठेव य कम्माइं , नवतत्ताइं च दसविहो धम्मो । एगारस पडिमाओ, बारस वयाइं गिहीणं च ॥६४॥
इच्चाइ वियाराचारसारकुसलत्तणं च संपत्ता । अन्ने सुहुमवियारेवि मुणइ सा निययनामं व ॥६५॥

जिनमतविषये निपुणेन अध्यापकेन-पाठकेन सा मदनसुन्दरीकन्या तथा शिक्षिता-शिक्षां ग्राहिता यथा जिनमते कुशलत्वं प्राप्ता ॥६२॥ सतो भावः सत्ताऽस्तित्वमित्यर्थः, सा सर्वेष्वपि पदार्थेषु एकैव वर्त्तते, च - पुनर्द्विविधो नयः द्रव्यपर्यायादिस्वरूपः, तथा कालत्रयं, गतिचतुष्कं, पञ्चैव अस्तिकाया-धर्माधर्माकाशपुद्गलजीवस्वरूपाः सन्ति, च- पुनर्द्रव्याणां-धर्मास्तिकायादीनां कालद्रव्ययुक्तानां षट्कमस्ति, तथा नैगमाद्याः सप्त नयाः सन्ति ॥६३॥ ज्ञानावरणीयादीनि अष्टैव कर्माणि सन्ति, च - पुनर्जीवादीनि नव तत्त्वानि सन्ति, तथा क्षान्त्यादिको दशविधो यतिधर्मो विद्यते, एकादश दर्शनाद्याः श्रावकप्रतिमाः सन्ति, च - पुनर्गृहिणां स्थूलप्राणातिपातविरमणादीनि द्वादश व्रतानि सन्ति ॥ ६४ ॥ सा मदनसुन्दरी इत्यादयो ये विचाराचारयोः सारा-रहस्यभूतपदार्थाः तेषु कुशलत्वं-निपुणत्वं सम्प्राप्ता, च - पुनः साऽन्यान्-एतद्व्यतिरिक्तान् सूक्ष्मविचारानपि निजकनामवत् मुणति-जानाति ॥६५॥

For Private and Personal Use Only

कम्माणं मूलुत्तरपयडीओ गणइ मुणइ कम्मठिइं । जाणइ कम्मविवागं, बंधोदयदीरणं संतं ॥६६॥
जीसे सो उज्झाओ,संतो दंतो जिइंदिओ धीरो । जिणमयरओ सुबुद्धी, सा किं नहु होइ तस्सीला ? ॥६७॥
सयलकलागमकुसला, निम्मलसम्मत्तसीलगुणकलिया । लज्जासज्जा सा मयणसुन्दरी जुव्वणं पत्ता ॥६८॥
अन्नदिणे अब्भिंतरसहानिविट्ठेण नरवरिंदेण । अज्झावयसहियाओ, अणाविआओ कुमारीओ ॥६९॥

अष्टौ मूलप्रकृतीः-पुनः सा कर्म्मणां मूलभेदान् तथाऽष्टपञ्चाशदधिकशतमुत्तरप्रकृतीर्गणयति, तथा-कर्मणां स्थितिं त्रिंशत्कोटीकोटीसागरोपमादिकां जानाति, पुनः कर्म्मणां विपाकं शुभाशुभानुभवस्वरूपं जानाति, तथा कर्म्मणां बन्धोदयोदीरणा- सत्तास्वरूपं जानाति ॥६६॥ यस्याः सुबुद्धिर्नाम श्रावक उपाध्यायः-पाठकः सा मदनसुन्दरी तच्छीला-गुरुतुल्यस्वभावा किं नहि भवति? भवत्येवेत्यर्थः,कीदृशः स ? इत्याह- शान्तः - क्षमायुक्तः, तथा दान्तो-मानसदमयुक्तः, पुनर्जितेन्द्रियस्तथा धीरो-धैर्यवान् बुद्धिमान् वा, पुनर्जिनमते रक्तः, ईदृशो यस्याः गुरुः सा तादृशगुणवती कथं न भवेत् ?, सा मदनसुन्दरी यौवनं प्राप्ता,कीदृशी सा ? इत्याह-सकलकलागमेषु- समस्तकलाशास्त्रेषु कुशला-निपुणा पुनर्निर्मला ये सम्यक्त्वशीलगुणास्तैः कलिता-युक्ता तथा लज्जायां सज्जा-परिपूर्णा प्रगुणा इतियावत्, एवंविधा मदनसुन्दरीकन्या बाल्यावस्थामतिक्रम्य यौवनावस्थां प्राप्तवतीत्यर्थः ॥६८॥ अन्यस्मिन् दिने अभ्यन्तरसभायां निविष्टेण-उपविष्टेन नरवरेन्द्रेन-राज्ञा अध्यापकाभ्यां सहिते द्वे अपि कुमार्यौ आनायिते, स्वपार्श्वे इति शेषः ॥६९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विणओणयाउ ताओ, सरूवलावन्नखोहिअसहाओ । विणिवेसिआउ रन्ना, नेहेणं उभयपासेसु ॥७०॥
हरिसवसेणं राया, तासिं बुद्धिपरिक्खणनिमित्तं । एगं देइ समस्सा-पयं दुविन्हंपि समकालं ॥७१॥
यथा "पुन्निहिं लब्भइ एहु," तो तक्कालं अइचंचलाइ, अच्चंतगव्वगहिलाए । सुरसुंदरीइ भणियं, हुं हुं पूरेमि निसुणेह ॥७२॥
यथा-धण जुव्वण सुवियड्ढपण,रोगरहिअ निअदेहु । मणवल्लह मेलावडउ, पुन्निहिं लब्भइ एहु ॥७३॥
तं सुणिय निवो तुट्ठो, पसंसए साहु साहु उज्झाओ । जेणेसा सिक्खविया, परिसावि भणेइ सच्चमिणं ॥७४॥

विनयेन अवनते-नम्रे तथा स्वरूपलावण्येन क्षोभिता-चमत्कारं प्रापिता सभा याभ्यां ते एवंविधे ते द्वे कन्ये राज्ञा स्नेहेन स्वस्य उभयोः पार्श्वयोः विनिवेशिते-स्थापिते उपवेशिते इति यावत् ॥७०॥ राज्ञा हर्षवशेन तयोर्बुद्धिपरीक्षानिमित्तं ताभ्यां द्वाभ्यामपि कन्याभ्यां समकामेकं समस्यापदं ददाति ॥७१॥ एतत् समस्यापदं राज्ञा दत्तं, ततस्तदन्तरं तत्कालं सुरसुन्दर्या भणितम्, अहो अहमेतां समस्यां पूरयामि,यूयं शृणुत,कीदृश्या सुरसुन्दर्या ? - अतिचञ्चलया-अतिशयेन चपलया-पुनरत्यन्त-गर्वेण ग्रथिलया ॥७२॥ धनं, यौवनं, सुविदग्धत्वं - छेकत्वमित्यर्थः, तथा रोगरहितो निजदेहः-स्वशरीरं, तथा मनसो वल्लभः-प्रियो यः पुरुषादिस्तेन सार्धं मेलः -सम्बन्धः, एतद्वस्तुवृन्दं पुण्यैर्लभ्यते ॥७३॥ तत् सुरसुन्दरीवाक्यं श्रुत्वा नृपो-राजा तुष्टः सन् प्रशंसते-इत्थं प्रशंसा करोति स्म, कथमित्याह- उपाध्यायोऽस्याः पाठको-गुरुः साधुः -समीचीन इत्यर्थः, येनैषा पुत्री इत्थं शिक्षिता-पाठिता, तदा पर्षदपि भणति हे महाराज ! इदं सत्यम्-अत्र किमपि मृषा नास्तीत्यर्थः ॥७४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो रन्ना आइट्ठा,मयणा वि हु पूरए समस्सं तं । जिणवयणरया संता, दंता ससहावसारिच्छं ॥७५॥
यथा-विणय विवेय पसण्णमणु, सीलसुनिम्मलदेहु । परमप्पहमेलावडउ, पुण्णेहिं लब्भइ एहु ॥७६॥
तो तीए उवज्झाओ, मायावि अ हरिसिआ न उण सेसा । जेण तत्तोवएसो, न कुणइ हरिसं कुदिट्ठीणं ॥७७॥
इओ अ-कुरुजंगलंमि देसे, संखपुरीनाम पुरवरी अत्थि । जा पच्छा विक्खाया, जाया अहिछत्तनामेणं ॥७८॥

ततो राज्ञा आदिष्टा - अनुज्ञाता सती मदनसुन्दर्यपि तां समस्यां पूरयति, कीदृशी मदनसुन्दरी?-जिनवचनेषु रता-रक्ता पुनः शान्ता-उपशमयुक्ता तथा दान्ता-इन्द्रियादिदमवती कीदृशीं समस्यां ?-स्वस्वभावेन सदृक्षां-सदृशीम् ॥७५॥ विनयः-पूज्यादिषु वन्दननमस्कारादिरूपः, विवेको -वस्तूनां भेदपरिज्ञानं सदसद्विवेचनमित्यर्थः, तथा शीलेन-ब्रह्मचर्येण सुनिर्मलः- अत्युज्ज्वलो देहः, तथा परम-उत्कृष्टः पन्था-मार्गः परमपथः मोक्षमार्ग्ग इत्यर्थः, तेन सह मेलः-सम्बन्धः, एतद्वस्तुवृन्दं पुण्यैर्लभ्यते ॥७६॥ ततस्तदनन्तरं तस्या मदनसुन्दर्या उपाध्यायो हर्षितः-तुष्टश्च, पुनर्मातापि हर्षिता, न पुनः शेषा राजादयो लोकाः, ते हर्षं न प्राप्ता इत्यर्थः, कुत इत्याह-येन कारणेन तत्त्वोपदेशः कुदृष्टीनां मिथ्यात्विलोकानां हर्षं न करोति, अयं भावः- तस्या वाक्यं तत्त्वोपदेशरूपं राजादयस्तु कुदृष्टयः तेन तत् श्रुत्वा ते हर्षं न प्राप्ता इति, उक्तं च-गुणिनि गुणज्ञो रमते इत्यादि ॥७७॥ इतश्चातः परं यज्जातं तदाह-कुरुजङ्गलदेशे शङ्खपुरीनाम प्रधानपुरी अस्ति,या पुरी पश्चात्-कियत्कालानन्तरं अहिच्छत्रानाम्ना विख्याता-प्रसिद्धा जाता ॥७८॥

For Private and Personal Use Only

तत्थत्थि महीपालो, कालो इव वेरिआण दमिआरी । पइवरिसं सो गच्छइ, उज्जेणिनिवस्स सेवाए ॥७९॥
अन्नदिणे तप्पुत्तो, अरिदमनो नाम तारतारुन्नो । संपत्तो पिअठाणे, उज्जेणिं रायसेवाए ॥८०॥
तं च निवपणमणत्थं, समागयं तत्थ दिव्वरूवधरं । सुरसुंदरी निरिक्खइ, तिक्खकडक्खेहिं ताडंती ॥८१॥
तत्थेव थिरनिवेसिअदिट्ठी दिट्ठा निवेण सा बाला । भणिया य कहसु वच्छे !, तुज्झ वरो केरिसो होउ ? ॥८२॥
तो तीए हिट्ठाए,धिट्ठाए मुक्कलोअलज्जाए । भणियं तायपसाया, जइ लब्भइ मग्गियं कहवि ॥८३॥

तत्र-तस्यां नगर्यां वैरिणां काल इव- कालसदृशो दमितारिर्नाम महीपालो राजाऽस्ति,स राजा वर्षं वर्षं प्रति प्रतिवर्षं उज्जयिन्या नगर्या नृपस्य-राज्ञः सेवायै-सेवार्थं गच्छति ॥७९॥ अन्यस्मिन् दिने तत्पुत्रो अरिदमनो नाम कुमारो राज्ञः सेवार्थं पितृस्थाने स्वयमुज्जयिनीं सम्प्राप्तः,कीदृशो अरिदमनः?-तारम् - उद्भटं तारुण्यं-यौवनं यस्य स तारतारुण्यः ॥८०॥ तदा नृपस्य प्रणमनार्थं- नमस्कारार्थं तत्र समागतं दिव्यरूपधरम्-अद्भुतसौन्दर्यधारकम् तमरिदमनकुमारं सुरसुन्दरी नृपकन्या तीक्ष्णैः कटाक्षैः-नेत्रप्रान्तैस्ताडयन्ती निरीक्षते-विलोकयतीति ॥८१॥ तत्र-तस्मिन्नेव कुमारे स्थिरं-निश्चलं यथा स्यात्तथा निवेशिता - स्थापिता दृष्टिर्यया सा एवंविधा सा सुन्दरी-बाला नृपेण दृष्टा भणिता-उक्ता च हे वत्से ! त्वं कथयस्व तव वरो - भर्ता कीदृशो भवतु ? ॥८२॥ ततः-तदनन्तरं हृष्टया - हर्षं प्राप्तया पुनर्धृष्टया-धृष्टत्वयुक्तया तथा मुक्ता लोकलज्जा यया सा तया मुक्तलोकलज्जया तया सुरसुन्दर्या भणितम्-उक्तम्, किमुक्तमित्याह- तातस्य- पितुः प्रसादात् यदि कथमपि मार्ग्गितं लभ्यते ॥८३॥

ता सव्वकलाकुसलो, तरुणो वररूवपुण्णलायन्नो । एरिसओ होउ वरो, अहवा ताओ चिअ पमाणं ॥८४॥
जेणं ताय ! तुमं चिय, सेवयजणमणसमीहियत्थाणं । पूरणपवणो दीससि, पच्चक्खो कप्परुक्खव्व ॥८५॥
तो तुट्ठो नरनाहो, दिट्ठिनिविसेण नायतीइमणा । पभणेइ होउ वच्छे !, एसऽरिदमणो वरो तुज्झ ॥८६॥
तो सयलसभालोओ, पभणइ नरनाह ! एस संजोगो । अइसोहणोऽहिवल्लीपूगतरुणं व निब्भंतं ॥८७॥
अह मयणसुंदरीवि हु,रन्ना नेहेण पुच्छिया वच्छे !! केरिसओ तुज्झ वरो, कीरउ ? मह कहसु अविलंबं ॥८८॥

तर्हि सर्वकलासु कुशलः - चतुरः पुनस्तरुणो-यौवनवयःस्थस्तथा वररूपेण-प्रधानाकृत्या पुण्यं-पवित्रं लावण्यं-सौन्दर्यं यस्य स वर-ईष्टको योऽयं पुमान् पुरोवर्ती स वरो भवतु, अथवा तात एव प्रमाणं, तातो यं ददाति स एव वरोऽस्तु इत्यर्थः ॥८४॥ अथ सा निजेष्टसिद्ध्यर्थं पितरं स्तौति, हे तात! येन कारणेन त्वमेव सेवकजनस्य मनःसमीहितार्थानां-मनोवाञ्छितकार्याणां पूरणे प्रवणः - तत्परो दृश्यसे, क इव ?-प्रत्यक्षः कल्पवृक्ष इव ॥८५॥ ततो नरनाथो-राजा तद्वचनश्रवणात्तुष्टः सन् प्रभणति-वक्ति, किं वक्ति? इत्याह-हे वत्से ! एषोऽरिदमनः कुमारः तव वरोऽस्तु,कीदृशो नरनाथः? दृष्टिनिवेशेन-कुमारे दृष्टिस्थापनेन ज्ञातं तस्या मनो येन सः ॥८६॥ ततः सकलः - समस्तः सभालोकः प्रभणति- हे नरनाथ ! एषोऽनयोः संयोगो निर्भ्रान्तं-निस्सन्देहमतिशोभनः सञ्जात इति शेषः, कयोरिव ?-अहिवल्लीपूगतर्वोरिव-नागवल्लीकुमुकवृक्षयोरिव, यथा तयोः संयोगो अतिशोभनोऽस्ति तथाऽनयोरपीत्यर्थः ॥८७॥ अथानन्तरं राज्ञा मदनसुन्दर्यपि स्नेहेन पृष्टा- हे वत्से ! तव कीदृशको वरो भर्ता मया क्रियतां ? ममाग्रेऽविलम्बंयथास्यात्तथा शीघ्रमित्यर्थः कथयस्व ॥८८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा पुण जिणवयणवियारसारसंजणियनिम्मलविवेआ । लज्जागुणिक्कसज्जा, अहोमुही जा न जंपेइ ॥८९॥
ताव नरिंदेण पुणो, पुट्ठा सा भणइ ईसि हसिऊणं । ताय ! विवेयसमेओ, मं पुच्छसि तंसि किमजुत्तं ॥९०॥
जेण कुलबालिआओ, न कहंति हवेउ एस मज्झ वरो । जो किर पिऊहिं दिन्नो, सो चेव पमाणियव्वुत्ति ॥९१॥
अम्मापिउणोवि निमित्तमित्तमेवेह वरपयाणंमि । पायं पुव्वनिबद्धो, संबंधो होइ जीवाणं ॥९२॥
जं जेण जया जारिसमुवज्जियं होइ कम्म सुहमसुहं । तं तारिसं तया से, संपज्जइ दोरियनिबद्धं ॥९३॥

जिनवचनानां यो विचारसारस्तेन सञ्जनितः-समुत्पादितो निर्मलो विवेको यस्याः साऽत एव लज्जागुणे एकसज्जा अद्वितीयतत्परा सा पुनर्मदनसुन्दरी अधोमुखी सती यावदुत्तरं न ददाति॥८९॥ तावन्नरेन्द्रेण पुनः पृष्टा सा ईषद्धसित्वा भणति - राजानं प्रति कथयति, हे तात! त्वं विवेकसमेतो-विवेकयुक्तोऽसि, मां प्रति अयुक्तं किं पृच्छसि ? विवेककलितस्य भवतो मां प्रति एतत्प्रच्छनमयुक्तमिति भावः॥९०॥ कुत इत्याह-येन कारणेन कुलबालिकाः - सुकुलोत्पन्नाः कन्याः एवं न कथयन्ति, मम एष वरो भवतु, किन्तु यः किल मातापितृभ्यां दत्तः स एव वरः प्रमाणयितव्यः - प्रमाणीकर्तव्यः ॥९१॥ इह-संसारे वरप्रदाने-कन्याया भर्तृप्रदानविषये मातापितरावपि निमित्तमात्रमेव न पुनस्तात्त्विककारणमिति भावः, प्रायो-बाहुल्येन जीवानां पूर्वस्मिन् भवे निबद्धो-रचितः सम्बन्धो भवति,प्रायः येन सह सम्बन्धो रचितो भवेत् तेनैव सह इह सम्बन्धो भवतीत्यर्थः ॥९२॥ येन प्राणिना यदा -यस्मिन् काले यत्-यादृशं शुभमशुभं कर्म उपार्जितं भवति तस्य प्राणिनस्तदा तस्मिन् काले-तत्-तादृशं कर्म सम्पद्यते-उदयमायाति,कीदृशं तत्? दोरिकया निबद्धमिव दोरिकानिबद्धम् ॥९३॥

For Private and Personal Use Only

जा कन्ना बहुपुन्ना,दिन्ना कुकुलेवि सा हवइ सुहिया । जा होइ हीणपुन्ना, सुकुले दिन्नावि सा दुहिया ॥९४॥
ता ताय ! नायतत्तस्स, तुज्झ नो जुज्जए इमो गव्वो । जं मज्झ कयपसायापसायओ सुहदुहे लोए ॥९५॥
जो होइ पुन्नबलिओ, तस्स तुमं ताय ! लहु पसीएसि । जो पुण पुण्णविहुणो, तस्य तुमं नो पसीएसि ॥९६॥
भवियव्वया सहावो, दव्वाइया सहाइणो वावि । पायं पुव्वोवज्जियकम्माणुगया फलं दिंति ॥९७॥
तो दुम्मिओ य राया, भणेइ रे तंसि मह पसाएण । वत्थालंकाराइं, पहिरंती कीसिमं भणसि ? ॥ ९८॥

या कन्या बहुपुण्या भवेत् सा कुकुले-दरिद्रादिगृहे दत्तापि सुखिता-सुखिनी भवति, या तु हीनपुण्या भवति सा सुकुलेपि दत्ता दुःखिता भवति ॥९४॥ तस्मात्कारणात् हे तात ! ज्ञातं तत्त्वं येन स ज्ञाततत्त्वः तस्य तत्त्वज्ञस्य तव गर्वो न युज्यते, यन्मम कृतप्रसादाऽप्रसादतो लोके सुखदुःखे भवतः, मत्कृतप्रसादतः सुखं मत्कृताप्रसादतो दुःखं भवतीत्यर्थः, अयं गर्वस्तव न युक्तः ॥९५॥ यः पुमान् पुण्यबलिकः-पुण्येन बलवान् भवति तस्योपरि हे तात! त्वं लघु-शीघ्रं प्रसीदसि-प्रसन्नो भवसि,यः पुनः पुण्यहीनो भवेत् तस्योपरि त्वं न प्रसीदसि ॥९६॥ भवितव्यता स्वभावो वा - पुनर्द्रव्याद्या-द्रव्यक्षेत्रकालभावादयः साहाय्यकारिणोपि पूर्वस्मिन् भवे उपार्जितानि यानि कर्म्माणि तानि अनुगताः -तत्सम्मिलिता एव फलं ददति, न तु तद्व्यतिरिक्ताः ॥९७॥ ततश्च-तद्वचनश्रवणानन्तरं च राजा दुर्मनस्कीभूतः सन् भणति - पुत्रीं प्रति कथयति, रे ! त्वं मत्प्रसादेन वस्त्रालङ्कारादि विविधाद्भुतनेपथ्याभूषणादि परिधानासि इदं - प्रागुक्तं पुनः कथं भणसि ? ॥९८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हसिऊण भणइ मयणा, कयसुकयवसेण तुज्झ गेहंमि । उप्पन्ना ताय ! अहं, तेणं माणेमि सुक्खाइं ॥९९॥
पुव्वकयं सुकयं चिअ, जीवाणं सुक्खकारणं होइ । दुकयं च कयं दुकखाण, कारणं होइ निब्भंतं ॥१००॥
न सुरासुरेहिं नो नरवरेहिं, नो बुद्धिबलसमिद्धेहिं । कहवि खलिज्जइ इंतो, सुहासुहो कम्मपरिणामो ॥१०१॥
तो रुट्ठो नरनाहो, अहो अहो अप्पपुन्निआ एसा । मज्झ कयं किंपि गुणं, नो मन्नइ दुव्वियड्ढा य ॥१०२॥

तदा मदनसुन्दरी हसित्वा भणति, हे तात ! कृतसुकृतवशेन प्राग्भवोपार्जितपुण्यबलात् अहं तव गृहे उत्पन्नास्मि तेन सुखानि मानयामि - अनुभवामि ॥९९॥ हे तात ! जीवानां पूर्वकृतं - प्राग्भवोपार्जितं सुकृतं - पुण्यमेव सुखस्य कारणं - हेतुर्भवति, च - पुनः दुष्कृतं - पापं प्राग्भवे कृतं सत् निर्भ्रान्तं- निस्सन्देहं दुःखानां कारणं भवति ॥१००॥ इन्तोति आयन् - उदयमागच्छन् शुभाशुभः कर्मणां परिणामः कथमपि - केनापि प्रकारेण सुरासुरैर्देवदानवैर्न स्खल्यते- न निराक्रियते, नो नरवरैः- भूपतिभिः स्खल्यते, न पुनर्बुद्धिबलसमृद्धैः स्खल्यते, बुद्धिसमृद्धाः- महाबुद्धयो बलसमृद्धाः-महाबलवन्तस्तैरपि न दूरीक्रियते इत्यर्थः ॥१०१॥ ततः - तद्वचनश्रवणानन्तरं नरनाथो -राजा रुष्टः - कुपितः सन् इत्युवाचेति शेषः, अहो अहो लोका ! एषा कन्या अल्पपुण्यिका -हीनपुण्या च- पुनर्दुर्विदग्धा - चातुर्य्यरहिताऽस्ति, अत एव मत्कृतं किमपि गुणं न मन्यते ॥ १०२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पभणेइ सहालोओ, सामिय ! किमियं मुणेइ मुद्धमई ? । तं चेव कप्परुक्खो, तुट्ठो रुट्ठो कयंतो य ॥१०३॥
मयणा भणेइ धिद्धी, धणलवमित्तत्थिणो इमे सव्वे । जाणंतावि हु अलिअं, मुहप्पियं चेव जंपंति॥१०४॥
जइ ताय ! तुह पसाया, सेवयलोआ हवंति सव्वेवि । सुहिया ता समसेवानिरया किं दुक्खिया एगे ?॥१०५॥
तम्हा जो तुम्हाणं, रुच्चइ सो ताय ! मज्झ होउ वरो । जइ अत्थि मज्झ पुन्नं,ता होही निग्गुणोवि गुणी ॥१०६
जइ पुण पुन्नविहीणा, ताय ! अहं ताव सुंदरोवि वरो । होही असुंदरच्चिय, नूणं मह कम्मदोसेणं ॥१०७॥

अथ सभालोक : प्रभणति - कथयति स्म, हे स्वामिन् इयं मुग्धमतिर्मूढबुद्धिर्बाला किं जानाति?, त्वमेव तुष्टः सन् कल्पवृक्षोऽसि वाञ्छितार्थदायकत्वात्, च - पुनः रुष्टः सन् कृतान्तो - यमतुल्योऽसि सद्योनिग्रहकरणात् ॥१०३॥ एतत्सभालोकवचः श्रुत्वा मदनसुन्दरी भणति, एतान् धिग् धिग् अस्तु, इमे सर्वे लोका धनस्य लवमात्रमर्थयन्तेऽभिषलन्तीत्येवंशीला धनलवमात्रार्थिनः, जानन्तोऽपि हु-निश्चितम् अलीकं- मिथ्यावचनं मुखप्रियं - मुखमिष्टमेव जल्पन्ति ॥१०४॥ हे तात ! यदि तव प्रसादात् सर्वेऽपि सेवकलोकाः सुखिनो भवन्ति तत्-तर्हि समा-तुल्या या सेवा तस्यां निरता-तत्परा एके- केचित् सेवकलोकाः दुखिताः कथं ?, सर्वेऽपि सुखिन एव युज्यन्ते इति भावः ॥ १०५॥ तस्मात् हे तात! यो युष्मभ्यं रोचते स एव मम वरो भवतु, यदि मम पुण्यमस्ति तर्हि भवद्दत्तो निर्गुणोऽपि वरो गुणी -गुणवान् भविष्यति ॥१०६॥ यदि पुनर्हे तात ! अहं पुण्यविहीनाऽस्मि तर्हि सुन्दरोऽपि वरो नूनं-निश्चितं मम कर्मदोषेण-मदीयदुष्कर्मदोषात् असुन्दर एव भविष्यति ॥१०७॥

For Private and Personal Use Only

तो गाढयरं राया, रुट्ठो चिंतेइ दुव्वियड्ढाए । एयाइ कओ लहुओ, अहं तओ वेरिणी एसा ॥१०८॥
रोसेण वियडभिउडीभीसणवयणं पलोइऊण निवं । दक्खो भणेइ मंती, सामिय! रइवाडियासमओ ॥१०९॥
रोसेण धमधमंतो, नरनाहो तुरयरयणमारूढो। सामंतमंतिसहिओ, विणिग्गओ रायवाडीए ॥११०॥
जाव पुराओ बाहिं,निग्गच्छइ नरवरो सपरिवारो । ता पुरओ जणवंदं, पिच्छइ साडंबरमियंतं ॥१११॥
तो विम्हिएण रन्ना, पुट्ठो मंती स नायवुत्तंतो । विन्नवइ देव ! निसुणह, कहेमि जणवंदपरमत्थं ॥११२॥

ततस्तदन्तरं राजा गाढतरम्-अत्यर्थं रुष्टः सन् चिन्तयति, किं चिन्तयतीत्याह- दुर्विदग्धया-अज्ञानवत्या एतया पुत्र्याऽहं लघुकः कृतस्ततस्तस्मात्कारणात् एषा मम वैरिणी वर्त्तते न तु पुत्रीति भावः ॥१०८॥ रोषेण-कोपेन विकटा-विकराला या भृकुटी तया भीषणं-भयानकं वदनं-मुखं यस्य स तं तथाविधं नृपं प्रलोक्य-दृष्ट्वा दक्षश्चतुरो मन्त्री भणति,स्वामिन् ! राजवाटिकागमनसमयो वर्त्तते ॥१०९॥ तदा रोषेण धमधमायमानो नरनाथः तुरगरत्नं-प्रवराश्वमारूढः सामन्तैर्मन्त्रिभिश्च सहितः सन् राजवाटिकायां निर्गतः ॥११०॥ यावन्नरवरो-राजा सपरिवारः-परिवारसहितः पुराद्बहिर्निर्गच्छति, तावत् पुरतोऽग्रतः साडम्बरम्-आडम्बरसहितमायान्तं जनवृन्दं-मनुष्यसमूहं प्रेक्षते-पश्यति॥१११॥ ततो ज्ञातो वृत्तान्तो येन स ज्ञातवृत्तान्तः स मन्त्री -अमात्यो विस्मितेन राज्ञा पृष्टः सन् विज्ञपयति, हे देव! यूयं निश्रुणुत अहं जनवृन्दस्य परमार्थं-भावार्थं कथयामि ॥११२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सामिय! सरूवपुरिसा,सत्तसया नववया ससोंडीरा । दुट्ठकुट्ठभिभूया, सव्वे एगत्थ संमिलिया ॥११३॥
एगो य ताण बालो,मिलिओ उंबरयवाहिगहियंगो । सो तेहिं परिगहिओ, उंबरराणुत्ति कयनामो ॥११४॥
वरवेसरिमारूढो, तयदोसी छत्तधारओ तस्स । गयनासा चमरधरा, घिणिघिणिसद्दा य अग्गपहा ॥११५॥
गयकन्ना घंटकरा, मंडलवइ अंगरक्खगा तस्स । दद्दुल थइआइत्तो, गलीअंगुलि नामओ मंती ॥११६॥

हे स्वामिन् ! सप्त शतानि-सप्तशतसङ्ख्याका नवं वयो येषां ते नववयसो युवान इत्यर्थः, सशौण्डीर्याः - पराक्रमवन्तः सरूपाः-रूपवन्तः पुरुषा दुष्टकुष्ठरोगेण अभिभूताः-पीडिताः एते सर्व्वे एकत्र सम्मिलिताः सन्ति ॥११३॥ च पुनस्तेषां-कुष्ठिपुरुषाणामेको बालो मिलितोऽस्ति, कीदृशो बालः?- उम्बरकव्याधिना-कुष्ठरोगविशेषेण गृहीतमङ्गं यस्य स तथोक्तः स बालस्तैः कुष्ठिपुरुषैः परिगृहीतः-सङ्गृहीतः कीदृशः?-उम्बरराणउ इति कृतं नाम यस्य स तथोक्तः॥११४॥ स बालो वरां-प्रधानां वेसरीम्-अश्वतरीमारूढोऽस्ति, त्वग्दोषी-श्वेतकुष्ठी पुमान् तस्य उम्बरराजस्य छत्रधारकोऽस्ति,गतनासौ - गलितनासिकौ पुरुषौ चामरधरौ स्तः,तथा रोगवशात् घिणी घिणी इत्येवंशब्दो येषां ते एवंविधा नराः तस्याग्रपथाः सन्ति, अग्रे पन्था येषां ते, अग्रगामिन इत्यर्थः ॥११५॥ गतौ-गलितौ कर्णौ येषां ते, एवंविधा नराः तस्य घण्टाकरा - घण्टावादिनः सन्तीत्यर्थः, रक्तमण्डलरोगवन्तः पुरुषास्तस्य अङ्गरक्षकाः सन्ति, (दद्दुल)त्ति दर्द्रुरोगी पुमान् "थइयाइत्तो" त्ति स्थगीधरस्ताम्बूलधरोऽस्तीत्यर्थः, तथा गलिताङ्गुलिनामको मन्त्री अस्ति ॥ ११६ ॥

केवि पसूइयवाया, कच्छादब्भेहिं केवि विकराला । केवि विउंचिअपामासमन्निया सेवगा तस्स ॥११७॥
एवं सो कुट्ठिअपेडएण परिवेढिओ महीवीढे । रायकुलेसु भमंतो, पंजिअदाणं पगिण्हेइ ॥११८॥
सो एसो आगच्छइ, नरवर ! आडंबरेण संजुत्तो । ता मग्गमिणं मुत्तुं, गच्छह अन्नं दिसं तुब्भे ॥११९॥
तो वलिओ नरनाहो, अन्नाइ दिसाइ जाव ताव पुरो । तो पेडयंपि तीए, दिसाइ वलियं तुरिअ तुरितं ॥१२०॥
राया भणेइ मंतिं, पुरओ गंतूणिमे निवारेसु । मुहमग्गियंपि दाउं, जेणेसिं दंसणं न सुहं ॥१२१॥

तस्य उम्बरराजस्य केऽपि सेवकाः प्रसूतिकवातरोगयुक्ताः सन्ति, केऽपि कच्छुदर्भभिर्विकरालाः सन्ति, केऽपि विचर्चिकापामासमन्विताः सन्ति, विचर्चिकाजातीया या पामा तया संयुक्ताः सन्तीत्यर्थः ॥११७॥ एवममुना प्रकारेण स उम्बरराजः कुष्ठिकानां पेटकेन-समूहेन परिवेष्टितः-समन्तात्परिवृतो महीपीठे-पृथ्वीतले भ्रमन् राजकुलेषु-नृपाणां गृहेषु 'पञ्जिय'त्ति मुखमार्गितं दानं प्रगृह्णाति ॥११८॥ हे नरवर ! -हे महाराज ! स एष उम्बरराज आडम्बरेण संयुक्त आगच्छति, तत्-तस्मादिमं मार्गं मुक्त्वा-त्यक्त्वा यूयमन्यां दिशं गच्छत ॥११९॥ ततो नरनाथो-राजा यावदन्यस्यां दिशि वलितस्तावत्पुरोऽग्रे ततः कुष्ठिपेटकमपि त्वरितं त्वरितं तस्यां दिशि वलितम् ॥१२०॥ तदा राजा मन्त्रिणं प्रति भणति, त्वं पुरतो-अग्रतो गत्वा इमान् निवारयस्व, किं कृत्वा?-मुखमार्ग्गितमपि दत्त्वा येन कारणेन एषां कुष्ठिनां दर्शनं शुभं नास्ति ॥१२१॥

जा तं करेइ मंती, गलिअंगुलिनामओ दुयं ताव । नरवरपुरओ ठाउं,एवं भणिउं समाढत्तो ॥१२२॥
सामिअ! अम्हाण पहू, उंबरनामेण राणओ एसो । सव्वत्थ वि मन्निज्जइ, गरुएहिं दाणमाणेहिं ॥१२३॥
तेणऽम्हाणं धणकणयचीरपमुहेहिं कीरइ न किंपि । एअस्स पसायेणं, अम्हे सव्वेवि अइसुहिणो ॥१२४॥
किंच-एगो नाह! समत्थि, अम्ह मणचिंतिओ विअप्पुत्ति । जइ लहइ राणओ राणियंति ता सुंदरं होइ ॥१२५॥
ता नरनाह ! पसायं, काऊणं देहि कन्नगं एगं । अवरेण कणगकप्पडदाणेणं तुम्ह पज्जत्तं ॥१२६॥

यावत्तन्नृपभणितं वचनं मन्त्री करोति,तावद्गलिताङ्गुलिनामको मन्त्री द्रुतं-शीघ्रं नरवरस्य-राज्ञः पुरतोऽग्रतः स्थित्वा एवं भणितुं-कथयितुं समारब्धः-प्रारम्भं कृतवान् ॥१२२॥ हे स्वामिन् ! एषोऽस्माकं प्रभुः- स्वामी उम्बरनाम्ना राजा सर्वत्रापि गुरुकैर्महद्भिर्दानमानैर्मान्यते-नृपादिभिः सत्क्रियते इत्यर्थः ॥१२३॥ तेन कारणेन अस्माभिर्धनकनकचीरप्रमुखैः किमपि न क्रियते, धनस्वर्णवस्त्रादिभिरस्माकं किमपि कार्यं नास्तीत्यर्थः, एतस्य-उम्बरराज्ञः प्रसादेन वयं सर्वेऽपि अतिशयेन सुखिनः स्मः ॥१२४॥ परं हे नाथ ! एकोऽस्माकं मनश्चिन्तित इत्येवंस्वरूपो विकल्पो- विचारोऽस्ति, यदि अस्माकं राजा इत्येवंस्वरूपां स्वोचितामित्यर्थः, राज्ञीं लभते तत्-तर्हि सुन्दरं भवति-शोभनं स्यात् ॥१२५॥ तत्-तस्मात् हे नरनाथ ! -हे राजन् ! प्रसादं कृत्वा एकां कन्यकां देहि अपरेण-अन्येन युष्माकं कनकवस्त्रादिदानेन - पर्याप्तं सृतम्, अपरेण नास्माकं कार्यमित्यर्थः ॥१२६॥

तो भणइ रायमंती, अहो अजुत्तं विमग्गिअं तुमए । को देइ नियं धूयं, कुट्ठकिलिट्ठस्स जाणंतो ? ॥१२७॥
गलिअंगुलिणा भणियं, अम्हेहिं सुया निवस्सिमा कित्ती । जं किर मालवराया, करेइ नो पत्थणाभंगं ॥१२८॥
तो सा निम्मलकित्ती, हारिज्जउ अज्ज नरवरिंदस्स । अहवा दिज्जउ कावि हु, धूया कुकुलेवि संभूया ॥१२९॥
पभणेइ नरवरिंदो, दाहिस्सइ तुम्ह कन्नगा एगा । को किर हारइ कित्तिं, इत्तियमित्तेण कज्जेण ? ॥१३०॥
चिंतेइ मणे राया, कोवानलजलियनिम्मलविवेगो । नियधूयं अरिभूयं, तं दाहिस्सामि एयस्स ॥ १३१॥

ततो राजमन्त्री भणति, अहो ! त्वयाऽयुक्तं विमार्ग्गितं, कुष्ठरोगेण क्लिष्टाय-क्लेशयुक्ताय पुरुषाय जानन् सन् कः पुमान् निजां पुत्रीं ददाति ? अपि तु न कोऽपि ददातीत्यर्थः ॥१२७॥ एतन्नृपमन्त्रिवचः श्रुत्वा गलिताङ्गुलिमन्त्रिणा भणितम्-अस्माभिर्नृपस्य इयं कीर्तिः श्रुताऽभूत् यत् किल मालवदेशस्य राजा प्रार्थनाभङ्गं न करोति,यः कोऽपि यद्वस्तु याचते तस्मै तद्ददातीत्यर्थः ॥१२८॥ ततस्तस्मात्कारणात् अद्य नरवरेन्द्रस्य सा निर्म्मलकीर्तिर्हार्यताम्, अथवा कापि कुकुलेऽपि सम्भूता-कुत्सितकुलेऽप्युत्पन्ना कन्या दीयताम् ॥१२९॥ तदा नरवरेन्द्रो राजा प्रभणति-कथयति स्म युष्मभ्यमेका कन्यका ऽस्माभिर्दास्यते, किल - निश्चितम् एतावन्मात्रेण कार्येण कः स्वकीयां कीर्तिं हारयति ? ॥१३०॥ कोपानलेन-क्रोधाग्निना ज्वलितो निर्म्मलो विवेको यस्य स एवंविधः सन् राजा मनसि चिन्तयति, किमित्याह- अहं ताम् अरिभूतां-शत्रुतुल्यां निजकन्यामेतस्मै कुष्ठिने दास्यामि ॥१३१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहसा वलिऊण तओ, नियआवासंमि आगओ राया । बुल्लावइ तं मयणासुंदरीनामं नियं धूयं ॥१३२॥
हुं अज्जवि जइ मन्नसि, मज्झ पसायस्स संभवं सुक्खं । ता उत्तमं वरं ते, परिणाविय देमि भूरि धणं ॥१३३॥
जइ पुण नियकम्मं चिय,मन्नसि ता तुज्झ कम्मणाणीओ । एसो कुट्ठिअराणो, होउ वरो किं वियप्पेण ? ॥१३४॥
हसिऊण भणइ बाला,आणीओ मज्झ कम्मणा जो उ । सो चेव मह पमाणं, राओ वा रंकजाओ वा ॥१३५॥
कोवंधेणं रन्ना, सो उंबरराणओ समाहूओ । भणिओ य तुममिमीए,कम्माणीओसि होसु वरो ॥१३६॥

सहसाऽकस्मात्ततस्तस्मात् स्थानात् वलित्वा राजा निजावासे-स्वमन्दिरे आगतः, आगत्य च तां मदनसुन्दरीनाम्नीं निजां पुत्रीमाह्वयति ॥१३२॥ आहूय च किं कथयतीत्याह - हुं इत्यनादरे अरे ! त्वमद्यापि यदि मम प्रसादसम्भवं - मत्प्रसादोत्पन्नं सुखं मन्यसे तत्तर्हि ते-तुभ्यं उत्तमं- प्रधानं वरं-भर्त्तारं परिणाय्य भूरि-प्रचुरं धनं ददामि-प्रयच्छामि ॥१३३॥ यदि पुनर्निजकर्म्मैव त्वं मन्यसे तत्तर्हि तव कर्म्मणा आनीत एष कुष्ठिकराजो वरो भवतु, किं विकल्पेन ? इह विकल्पस्य-विचारस्य किमपि कार्यं नास्तीत्यर्थः ॥१३४॥ एतन्नृपवचः श्रुत्वा मदनसुन्दरीबाला हसित्वा भणति, यो मम कर्मणा आनीतः स एव वरो मम प्रमाणं राजा वा भवतु रङ्कजातो-रङ्कपुत्रो वा भवतु ॥ १३५॥ एतत्कन्यावचः श्रुत्वा कोपान्धेन राज्ञा स उम्बरराजः समाहूतः-स्वसमीपदेशे आकारितो भणितश्च । किं भणित इत्याह- त्वम् अस्याः कर्म्मणा आनीतोऽसि तेन त्वम् अस्या वरो भव ॥१३६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेणुत्तं नो जुत्तं, नरवर ! वुत्तुंपि तुज्झ इय वयणं । को कणयरयणमालं, बंधइ कागस्स कंठंमि ? ॥१३७॥
एगमहं पुव्वकयं, कम्मं भुंजेमि एरिसमणज्जं । अवरं च कहमिमीए, जम्मं बोलेमि जाणंतो ? ॥१३८॥
ता भो नरवर ! जइ देसि कावि ता देसु मज्झ अणुरूवं । दासिविलासिणिधूयं, नो वा ते होउ कल्लाणं ॥१३९॥
तो भणइ नरवरिंदो, भो भो ! महनंदणी इमा किंपि । नो मज्झकयं मन्नइ, नियकम्मं चेव मन्नेइ ॥१४०॥
तेणं चिअ कम्मेणं, आणीओ तंसि चेव जीइ वरो । जइ सा निअकम्मफलं, पावइ ता अम्ह को दोसो ? ॥१४१॥

एतन्नृपवचः श्रुत्वा तेन उम्बरराजेनोक्तं हे नरवर !- हे राजन् ! तव इत्येतद्वचनं वक्तुमपि न युक्तम्। कथमित्याह- काकस्य-निन्द्यपक्षिणः कण्ठे-गले कनकरत्नमालां-स्वर्णमणिमालां को बध्नाति? नकोपीत्यर्थः । एतावताहं काकतुल्य इयं स्वर्णमाला तुल्या अतो नेयं मद्योग्येतिभाव : ॥१३७॥ एकं तु अहमीदृशम् अनार्यम् - पूर्वकृतं कर्म्म भुञ्जामि, अपरं च- अन्यत् पुनर्जानन् सन् अहं अस्या उत्तमकन्याया जन्म कथं ब्रोडयामि, ममैतत्कार्यं कर्तुमयुक्तमितिभावः ॥१३८॥ ततस्तस्मात् भो नरवर ! - हे राजन् ! यदि कामपि कन्यां ददासि तत्तर्हि ममाऽनुरूपां-मम योग्यां दास्या विलासिन्या वा पुत्रीं दत्व-देहि,वाऽथवा ईदशी कापि न भवेत्तर्हि ते- तव कल्याणं भवतु, मम सृतमित्यर्थः ॥१३९॥ ततो नरवरेन्द्रो राजा भणति, भो भो उम्बरराज ! इयं मम पुत्री मत्कृतं किमपि न मन्यते, केवलं निजकर्मैव मन्यते, स्वकृतं कर्म्मैव प्रमाणीकरोतीत्यर्थः ॥१४०॥ तेनैव कर्म्मणा त्वमेव अस्या वरो-भर्त्ता आनीतोऽसि - साम्प्रतमिह प्रापितोऽसि, यदि सा इयं मत्पुत्री निजकर्म्मणः फलं प्राप्नोति, तत्तर्हि अस्माकं को दोषः ? ॥१४१॥

For Private and Personal Use Only

तं सोऊणं बाला, उट्ठित्ता झत्ति उंबरस्स करं । गिण्हइ निययकरेणं, विवाहलग्गंव साहंती ॥१४२॥
सामंतमंतिअंतेउरीउ वारंति तहवि सा बाला । सरयससिसरिसवयणा, भणइ सई सुच्चिअ पमाणं ॥१४३॥
एगत्तो माउलओ, एगत्तो रुप्पसुंदरी माया । एगत्तो परिवारो, रुयइ अहो केरिसमजुत्तं ? ॥१४४॥
तहवि न नियकोवाओ, वलेइ राया अईव कढिणमणो । मयणावि मुणियतत्ता, निअसत्ताओ न पचलेइ ॥१४५॥

तन्नृपवचः श्रुत्वा मदनसुन्दरी बाला-कन्या तु उत्थाय झटिति-शीघ्रं निजकरेण-स्वहस्तेन उम्बरराजस्य करं गृहूणाति, किं कुर्वतीव ? विवाहलग्नं साधयन्तीव ॥१४२॥ सामन्ताः मन्त्रिणः अन्तःपुर्योऽन्तःपुरनार्यश्च वारयन्ति, तथापि सा बाला शरच्छशिसदृशवदना - शरच्चन्द्रतुल्यमुखी सती भणति, मम एष एव वरः प्रमाणं, नान्येन कार्यमित्यर्थः ॥१४३॥ तस्मिन्नवसरे एकतः-एकस्यां दिशि मदनसुन्दर्या मातुलो-मातृभ्राता पुण्यपालो रोदिति, एकस्यां दिशि रूप्यसुन्दरीमाता रोदिति, तथा एकतः परिवारस्तत्परिकरो रोदिति, अहो ! इदं कीदृशमयुक्तं कार्यं जातमिति चिन्तयन्तस्ते सर्वे रुदन्तीत्यर्थः ॥१४४॥ तथापि राजा निजकोपात्-स्वकृतक्रोधान्न वलते-न निवर्त्तते इत्यर्थः, कीदृशो राजा ? अतीव-अत्यन्तं कठिनं-कठोरं मनो यस्य स कठिनमनाः, मदनसुन्दर्यपि च निजसत्त्वात्त्वधैर्यान्न प्रचलति । कीदृशी सा ? मुणितं-ज्ञातं तत्त्वं यया सा मुणिततत्त्वा ॥१४५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं वेसरिमारोविअ, जा चलिओ उंबरो निअयठाणं । ता भणइ नयरलोओ, अहो अजुत्तं अजुत्तंति ॥१४६॥
एगे भणंति धिद्धी, रायाणं जेणिमं कयम जुत्तं । अन्ने भणंति धिद्धी, एयं अइदुव्विणीयंति ॥१४७॥
केवि निंदंति जणणिं, तीए निंदंति केवि उवज्झायं केवि निंदंति दिव्वं, जिणधम्मं केवि निंदंति ॥१४८॥
तहवि हु वियसियवयणा, मयणा तेणुंबरेण सह जंति । न कुणइ मणे विसायं, सम्मं धम्मं वियाणंती ॥१४९॥
उंबरपरिवारेणं, मिलिएणं हरिसनिब्भरंगेणं । निअपहुणो भत्तेणं, विवाहकिच्चाइं विहियाइं ॥ १५०॥

तदनन्तरं स उम्बरो राजा तां कुमारीं वेसरीमश्वतरीमारोप्य यावन्निजकंस्थानं प्रति चलितः, तावन् नगरलोकइति- इत्थं भणति, किमित्याह- अहो अयुक्तम् अयुक्तमिदं कार्यमिति शेषः ॥ १४६॥ तस्मिन्नवसरे एके -केचिल्लोका भणन्ति राजानं धिक् धिक्-धिक्कारोऽस्तु इत्यर्थः, राज्ञा इदमयुक्तं कार्यं कृतम्, अन्ये पुनर्लोका इति भणन्ति, एतामतिदुर्विनीतां कन्यां धिक् धिक् यया पितुर्वचनं नाङ्गीकृतमित्यर्थः ॥ १४७॥ पुनस्तदा केपि लोकास्तस्याः कन्याया जननीं -मातरं निन्दन्ति, केपि तस्या उपाध्यायं- पाठकं निन्दन्ति, केपि दैवं - भाग्यं निन्दन्ति, केपि पुनर्जिनधर्म्मं निन्दन्ति ॥१४८॥ 'हु' इति निश्चितं, तथापि मदनसुन्दरी कन्या विकसितं-विकस्वरं वदनं- मुखं यस्याः सा एवम्भूता सती तेन उम्बरेण सह यान्ती-गच्छन्ती मनसि विषादं न करोति, अत्र हेतुगर्भं विशेषणमाह- कीदृशी सा ? यतः सम्यक् धर्मं विजानन्ती ॥१४९॥ ततो मिलितेन उम्बरपरिवारेण विवाहकृत्यानि-विवाहकार्याणि विहितानि-कृतानि कीदृशेन उम्बरपरिवारेण ? -हर्षनिर्भराङ्गेन- हर्षेण निर्भरं-भृतमङ्गं यस्य स तेन, पुनः कीदृशेन? निजप्रभोः-स्वस्वामिनो भक्तेन ॥१५०॥

For Private and Personal Use Only

इत्तो रन्ना सुरसुंदरीइ वीवाहणत्थमुज्झाओ। पुट्ठो सोहणलग्गं, सो पभणइ राय ! निसुणेसु ॥१५१॥
अज्जं चिय दिणसुद्धी, अत्थि परं सोहणं गयं लग्गं। तइया जइया मयणाइ, तीइ कुट्ठिअकरो गहिओ ॥१५२॥
राया भणेइ हुं हुं, नाओ लग्गस्स तस्स परमत्थो। अहुणावि हु निअधूयं, एयं परिणावइस्सामि ॥१५३॥
रायाएसेण तओ, खणमित्तेणावि विहिअसामग्गिं। मंतीहिं पहिट्ठेहिं, विवाहपव्वं समाढत्तं ॥१५४॥
तं च केरिसं ? ऊसिअतोरणपयडपडायं, वज्जिरतूरगहीरनिनायं। नच्चिरचारुविलासिणिघट्टं, जयजयसद्दकरंतसुभट्टं ॥१५५

इतः परं राज्ञा सुरसुन्दर्या द्वितीयपुत्र्या विवाहकरणार्थमुपाध्यायोऽध्यापकः शुभलग्नं पृष्टस्तदा स प्रभणति-वदति, हे राजन् त्वं श्रुणु ॥ १५१॥ अद्येव दिनशुद्धिरस्ति,इदं सम्पूर्णमपि दिनं शुद्धमस्तीत्यर्थः, परं केवलं शोभनं लग्नं तु तदा गतं यदा तया मदनसुन्दर्य्या कुष्ठिकस्य उम्बरराजस्य करो गृहीतः ॥१५२॥ हुं हुं इत्यनादरे, ततो राजाऽनादरेण भणति,ज्ञातस्तस्य लग्नस्य परमार्थो यत्तया कुष्ठी परिणीत इति भावः, अधुनापि च - साम्प्रतमपि च एतां निजपुत्रीं परिणापयिष्यामिं ॥१५३॥ ततस्तदनन्तरं राजादेशेन-नृपाज्ञया प्रहृष्टैर्हर्षपूरितैर्मन्त्रिभिरमात्यैः विवाहपर्व - विवाहोत्सवः समारब्धं-प्रारब्धं, कीदृशं विवाहपर्व ? क्षणमात्रेणापि विहिता-कृता सामग्री यस्य तत् विहितसामग्रि ॥१५४॥ तच्च विवाहपर्व्व कीदृशं ?-तदाह- उच्छ्रितेषु-ऊर्ध्वीकृतेषु तोरणेषु प्रवृत्ताः पताका-ध्वजा यत्र तत् तथोक्तं, पुनर्वाद्यमानानि यानि तूरा(र्या)णि-वादित्राणि तेषां गम्भीरो निनादो - ध्वनिर्यत्र तत्तथोक्तं, तथा नृत्यन्-नृत्यं कुर्वन् चारु - मनोज्ञानाम् विलासिनीनां-विलासवत्स्त्रीणां

पट्टंसुयघडओलिज्जमालं, कूरकपूरतंबोलविसालं ।
धवलदिअंतसुवासिणिवग्गं, वुड्ढपुरंधिकहिअविहिमग्गं ॥१५६॥
मग्गणजणदिज्जंतसुदानं, सयणसुवासिणिकयसम्माणं ।
मद्दलवायचउप्फल (? चउग्गुण)लोयं, जणजणवयमणि जणियपमोयं ॥१५७॥

वेश्यादीनां 'घट्टत्ति' समुदायो यत्र तत्तथोक्तं, पुनर्जयजयशब्दं कुर्व्वन्तः सुष्ठु-शोभना भट्टा-भट्टलोका यत्र तत्तथोक्तम् ॥१५५॥ तथा-पट्टांशुकैर्विविधवर्णोत्तमवस्त्रैरन्वितो मण्डपो यत्र तत् तथा, कूरमन्नादि, तद्भोजनोपरि दीयमानानि कर्पूरेण-घनसारेण युक्तानि यानि ताम्बूलानि-नागवल्लीपत्राणि तानि विशालानि-विस्तीर्णानि यत्र तत् तथा, धवलं ददानो-मङ्गलगानं गायन् सुवासिनीनां-वधूटीनां वर्ग्गः-समूहो यत्र तत् तथोक्तं, तथा-वृद्धाः पुरन्ध्रयः पुत्रदुहित्रादिपरिवारयुक्ताः साध्व्यः स्त्रियस्ताभिः कथितो विधिमार्ग्गो-विवाहविधानमार्गो यत्र तत् तथोक्तम् ॥१५६॥ तथा-मार्ग्गणजनेभ्यो-याचकलोकेभ्यो दीयमानं सुष्ठु-शोभनं दानं यत्र तत्, पुनः स्वजनानां-स्वकीयसम्बन्धिलोकानां सुवासिनीनां च कृतः सन्मानो-बहुमानो यत्र तत् तथा, मार्दलानां- मृदङ्गनां वादो-वादनं तेन चतुर्गुणा लोका यत्र तत् तथा, जनानां-पौरलोकानां जनपदानां च देशवासिलोकानां मनसि-चित्ते जनित-उत्पादितः प्रमोदो -हर्षो येन तत् तथा ॥१५७॥

कारिअसुरसुंदरिसिणगारं, सिंगारिअअरिदमणकुमारं ।
हथलेवइ मंडलविहिचंगं, करमोयणकरिदाणसुरंगं ॥१५८॥
एवं विहिअविवाहो,अरिदमणो लद्धहयगयसणाहो । सुरसुंदरीसमेओ, जा निग्गच्छइ पुरवरीओ ॥१५९॥
ता भणइ सयललोओ, अहो ! ऽणुरूवो इमाण संजोगो । धन्ना एसा सुरसुंदरी य जीए वरो एसो ॥१६०॥
केवि पसंसंति निवं, केवि वरं केवि सुंदरिं कन्नं । केवि तीएँ उज्झायं, केवि पसंसंति सिवधम्मं ॥१६१॥

तथा कारितः सुरसुन्दर्याः कन्यायाः शृङ्गारो यत्र तत्, पुनः शृङ्गारितोऽरिदमनकुमारो यत्र तत्, पुनः पाणिग्रहणसमये ब्राह्मणेन क्रियमाणो यो मण्डलविधिर्लोकप्रसिद्धस्तेन चङ्गं-रम्यं, तथा करमोचने - हस्तमोचनसमये राज्ञा कृतं हस्त्यश्वादिदानं तेन सुरङ्गम् ॥१५८॥ एवमुक्तप्रकारेण विहितः-कृतो विवाहो यस्य स तथा, लब्धाः -प्राप्ता ये हया-अश्वा गजाश्च-हस्तिनस्तैः सनाथः-सहितः, पुनः सुरसुन्दर्या-निजस्त्रिया समेतो-युक्तोऽरिदमनकुमारो वर्याः पुर्या यावदुज्जयिनीतो निर्गच्छति ॥१५९॥ तावत् सकलोऽपि नगरलोको भणति, अहो ? इति आश्चर्येऽनयोः-कुमारकन्ययोरनुरूपो-योग्यः संयोगः -सम्बन्धः सञ्जात इति शेषः, च - पुनः एषा सुरसुन्दरीकन्या धन्यास्ति यस्या एषोऽरिदमनकुमारो वरो-भर्त्ता जातः ॥१६०॥ पुनः तदवसरे केऽपि लोकाः राजानं प्रशंसन्ति, केऽपि वरं-कुमारं प्रशंसन्ति, केऽपि सुरसुन्दरीं कन्यां प्रशंसन्ति, केऽपि लोकास्तस्याः-कन्याया उपाध्यायं-गुरुं प्रशंसन्ति, केऽपि पुनः शिवधर्मं प्रशंसन्ति ॥१६१॥

सुरसुन्दरिसम्माणं, मयणाइ विडंबणं जणो दट्ठुं । सिवसासणप्पसंसं, जिणसासणनिंदणं कुणइ ॥१६२॥
इओ य-निअपेडयस्स मज्झे, रयणीए उंबरेण सा मयणा । भणिआ भद्दे ! निसुणसु, इमं अजुत्तं कयं रन्ना ॥१६३॥
तहवि न किंपि विणट्ठं, अज्जवि तं गच्छ कमवि नररयणं । जेणं होइ न विहलं, एयं तुह रूवनिम्माणं ॥१६४॥
इअ पेडयस्स मज्झे, तुज्झवि चिट्ठंतिआइ नो कुसलं । पायं कुसंगजणिअं, मज्झवि जायं इमं कुट्ठं ॥१६५॥

तस्मिन्नवसरे सुरसुन्दर्याः सन्मानं-सत्कारं दृष्ट्वा मदनसुन्दर्यास्तु विटम्बनां दृष्ट्वा जनो-बहिर्दृष्टिर्लोकः शिवशासनस्य-शिवमतस्य प्रशंसां करोति, जिनशासनस्य निन्दनं-निन्दां करोति ॥१६२॥ इतश्च-इतः परमित्यर्थः, निजपेटकस्य-निजसमुदायस्य मध्ये रजन्यां-रात्रौ उम्बरेण- उम्बरराजेन सा मदनसुन्दरी भणिता-उक्ता, मदनसुन्दर्यै इदमुक्तमित्यर्थः, किमित्याह - हे भद्रे ! - हे शोभने ! त्वं श्रुणु, राज्ञा-त्वत्पित्रा इदमयुक्तं कृतं यन्मह्यं विनष्टाङ्गाय त्वं प्रदत्तेति भाव : ॥१६३॥ तथापि किमपि विनष्टं नास्ति, अद्यापि त्वं कमपि नररत्नं-पुरुषश्रेष्ठं प्रति गच्छ-अन्यं नीरुक्पुरुषं स्वीकुरु इत्यर्थः, येन एतत्तव रूपस्य निर्माणं-रचनं विफलं- निष्फलं न भवेत् ॥१६४॥ इहास्मिन् पेटकस्य-समुदायस्य मध्ये तिष्ठन्त्यास्तवापि कुशलं-शुभं नास्ति,कथमित्याह-(प्रायो बाहुल्येन) कुसङ्गेन जनितम्-उत्पादितं ममापि इदं-कुष्ठं जातं तन्मा कदाचित् तवापि भवेदिति भावः ॥१६५॥

तो तीए मयणाए, नयणंसुयनीरकलुसवयणाए । पइपाएसु निवेसिअ-सिराइ भणिअं इमं वयणं ॥१६६॥
सामिअ ! सव्वं मह आइसेसु किंचेरिसं पुणो वयणं । नो भणियव्वं जं दूहवेइ मह माणसं एयं ॥१६७॥
अन्नं च- पढमं महिलाजम्मं, केरिसयं तंपि होइ जइ लोए । सीलविहूणं नूणं, ता जाणह कंजिअं कुहिअं ॥१६८॥
सीलं चिअ महिलाणं, विभूसणं सीलमेव सव्वस्सं । सीलं जीवियसरिसं, सीलाउ न सुंदरं किंपि ॥१६९॥

ततस्तदनन्तरं तया-मदनसुन्दर्य्या इदं-वक्ष्यमाणं वचनं भणितम्-उक्तं, कीदृश्या तया?-नयनयोः-चक्षुषोर्यत् अश्रुनीरं-अश्रुजलं तेन कलुषं-गडुलं वदनं-मुखं यस्याः सा तथा तया । पुनः कीदृश्या ? पत्युः-भर्तुः पादयोः-चरणयोर्निवेशितं-स्थापितं शिरो -मस्तकं यया सा तया । किं भणितमित्याह-॥ १६६॥ हे स्वामिन् ! मह्यं अन्यत् सर्वं कार्यम् आदिश-अनुजानीहि, किन्तु ईदृशं वचनं पुनर्नो भणितव्यं-न कथनीयं, कथमित्याह- यद्यस्मात्कारणात् एतद्वचनं मम मानसं दुःखापयति-यतः दुःखितं करोतीत्यर्थः ॥१६७॥ अन्यच्च-अन्यदपि सा भणति, प्रथमं महिलाजन्म-स्त्रीजन्म कीदृशम् ? अशुद्धमेवेति भावः । तदपि स्त्रीजन्म यदि लोके शीलविहीनं-ब्रह्मचर्यरहितं भवति तत्तर्हि नून-निश्चितं कुथितं काञ्जिकम्-आरनालं यूयं जानीत, तत्सदृशं अतीवाशुद्धमिति भावः ॥१६८॥ यतो महिलानां-स्त्रीणां शीलमेव विभूषणम्-आभरणमस्ति, तथा-शीलमेव सर्वस्वं-सर्वसारमस्ति, पुनः स्त्रीणां शीलं जीवितसदृशं-जीवितव्यतुल्यं वर्तते, तासां शीलात् अधिकं सुन्दरं-रम्यं किमपि नास्ति ॥१६९॥

ता सामिअ ! आमरणं, मह सरणं तंसि चेव नो अन्नो । इअ निच्छियं वियाणह, अवरं जं होइ तं होउ ॥१७०॥
एवं तीए अइनिच्चलाइ दढसत्तपिक्खणनिमित्तं । सहसा सहस्सकिरणो, उदयाचलचूलिअं पत्तो ॥१७१॥
मयणाए वयणेणं, सो उंबरराणओ पभायंमि । तीए समं तुरंतो, पत्तो सिरिरिसहभवणंमि ॥१७२॥
आणंदपुलइअंगेहिं, तेहिं दोहिवि नमंसिओ सामी । मयणा जिणमयनिउणा, एवं थोउं समाढत्ता ॥१७३॥

तस्मात् हे स्वामिन् ! आमरणम्-मरणपर्यन्तं मम त्वमेव शरणम्-आश्रयोऽसि, अन्यो न कश्चित् शरणम्, इत्येतत् निश्चितं- निश्चययुक्तं यूयं विजानीत, अपरम्-अन्यत् यद्भवति तद्भवतु ॥१७०॥ एवमुक्तप्रकारेण अतिनिश्चलायास्तस्या-मदनसुन्दर्या यत् दृढं सत्त्वं-धैर्यं तस्य प्रेक्षणनिमित्तं-दर्शनार्थं सहसाऽकस्मात् सहस्रकिरणः - सूर्यः उदयाचलस्य-निषधपर्वतस्य चूलिकां शिखां प्राप्तः, सूर्य उदित इत्यर्थः ॥१७१॥ ततो मदनसुन्दर्या वचनेन स उम्बरराजः प्रभाते-प्रातःकाले तया स्वस्त्रिया समं-सह त्वरमाणः-उत्तालः सन् श्रीऋषभदेवस्य-जिनराजस्य भवने-मन्दिरे प्राप्तः ॥१७२॥ आनन्देन हर्षेण पुलकितं-रोमोद्गमयुक्तं अङ्गं-शरीरं ययोस्तौ ताभ्यां- तथोक्ताभ्यां वधूवराभ्यां द्वाभ्यामपि श्री ऋषभस्वामी नमस्यितो-नमस्कृतः, अथ जिनमतविषये निपुणा-दक्षा मदनसुन्दरी एवं-वक्ष्यमाणप्रकारेण स्तोतुं-स्तुतिं कर्तु समारब्धा-प्रारम्भं कृतवती, लग्नेति यावत् ॥१७३॥

भत्तिभरनमिरसुरिंदवंद--वंदिअपय पढमजिणंदचंद ।
चंदुज्जलकेवलकित्तिपूरपूरियभुवणंतरवेरिसूर ॥१७४॥
सूरुव्व हरिअतमतिमिर देव देवासुरखेयरविहिअसेव ।
सेवागयगयमयरायपायपायडियपणामह कयपसाय ॥१७५॥

भक्तिभरेण-भक्तिप्रकर्षेण नम्राणि-नमनशीलानि यानि सुरेन्द्रवृन्दानि-देवेन्द्रसमूहास्तैर्वन्दितौ पादौ-चरणौ यस्य सः, तत्सम्बोधने हे भक्तिभर०!, पुनर्हे प्रथमजिनेन्द्र ! चन्द्र इव चन्द्र आह्लादकः, पुनश्चन्द्रवत् उज्ज्वलो-धवलः केवलः सम्पूर्णो यः कीर्तिपूरो-यशःसमूहस्तेन पूरितं-भरितं भुवनं-लोकत्रयं येन सः, तत्सम्बुद्धौ चन्द्रोज्ज्व०, पुनः आन्तरा-मध्यवर्त्तिनो ये वैरिणः-कामक्रोधादयस्तेषां जये शूरस्तत्सम्बोधने हे०॥ १७४॥ पुनः सूरः- सूर्यः स इव हृतं-दूरीकृतं तमोऽज्ञानमेव तिमिरम्-अन्धकारं येन स तत्सम्बुद्धौ हे हृततमस्तिमिर !, हे देव !, पुनः देवाः-वैमानिकादयो असुरा-भवनपत्यादयः खेचरा-विद्याधरास्तैर्विहिता-कृता सेवा यस्य सः, तत्सम्बोधने हे देवा०!, सेवार्थमागताः -सेवागताः, गतो मदो येषां ते गतमदाः -परित्यक्ताहंकारा इत्यर्थः, एवंविधा ये राजानस्तैः पादयोः प्रकटितः प्रणामो-नमस्कारो यस्य सः, तत्सम्बोधने हे सेवा०, पुनः कृतः प्रसादो येन सः, तत्सम्बोधने हे कृतप्रसाद! ॥१७५॥

सायरसमसमयामयनिवास, वासवगुरुगोयरगुणविकास ।
कासुज्जलसंजमसीललील, लीलाइ विहिअमोहावहील ॥१७६॥
हीलापरजंतुसु अकयसाव, सावयजणिअआणंदभाव ।
भावलयअलंकिअ रिसहनाह, नाहत्तणु करि हरि दुक्खदाह ॥१७७॥

पुनः सागरसमः-समुद्रतुल्यः समता एव अमृतं-पीयूषं तस्य निवासः सागरसमसमतामृतनिवासस्तत्सम्बोधने हे सागरसमसमतामृतनिवास !, पुनः वासवः - इन्द्रस्तस्य गुरुर्लोकोक्त्या बृहस्पतिस्तस्य गोचरो-विषयभूतो गुणानां विकासो-विस्तारो यस्य सः, तत्सम्बोधने हे वासव०!, पुनः कासस्तृणविशेस्तद्वत् उज्ज्वला संयमशीलयोः- चारित्रस्वभावयोर्लीला-क्रीडा यस्य सः, तत्सम्बोधने हे का० !, पुनः लीलया-लीलामात्रेण विहिता-कृता मोहस्य-मोहनीयकर्म्मणोऽवहीला-अनादरो येन सः तत्सं० हे० !॥१७६॥ पुनः हीला-हीलनमेव परा-प्रधानं येषां ते हीलापरा एवंविधा ये जन्तवो-जीवास्तेषु न कृतः शाप -आक्रोशो येन सः तत्सं० हे०, पुनः श्रावकजनानां जनित-उत्पादित आनन्दभाव-आनन्दोदयो येन स श्रावक०, तत्सम्बोधने हे श्रावक०, पुनः भा-प्रभा तस्या वलयं-मण्डलं तेन अलंकृतः- शोभितः, तत्सं ० हे भा०, पूर्वोक्तविशेषणविशिष्ट हे ऋषभनाथ ! नाथत्वं कुरु, मम योगक्षेमकृद् भवेत्यर्थः, तथा- मम दुःखदाहं हर-दूरीकुरु इत्यर्थः ॥१७७॥

इअ रिसहजिणेसर भुवणदिणेसर, तिजयविजयसिरिपाल पहो ! ।
मयणहिअ सामिअ सिवगइगामिअ, मणह मणोरह पूरिमहो ॥१७८॥
एवं समाहिलीणा, मयणा जा थुणइ ताव जिणकंठा । करठिअफलेण सहिआ, उच्छलिआ कुसुमवरमाला ॥१७९॥
मयणावयणाओ उंबरेण सहसत्ति तं फलं गहिअं । मयणाइ सयं माला, गहिया आणंदिअमणाए ॥१८०॥

इत्युक्तप्रकारेण हे ऋषभजिनेश्वर ! हे भुवनदिनेश्वर ! भुवने-लोकेदिनेश्वरः - सूर्य इव, भुवन०, तत्सं० पुनस्त्रिजगतो-जगत्त्रयस्य या विजयश्रीः-विजयलक्ष्मीस्तां पालयतीति त्रि०श्रीपालस्तत्सं० हे त्रिजग०, हे प्रभो !, पुनः हे मदनाहितः मदनः-कामस्तस्याऽहितः -शत्रुः, हे स्वामिन् ! हे शिवगतिगामिन् मम मनसो मनोरथान्-अभिलाषान् पूरय इति तात्पर्यार्थः, पुनरयं तिजयविजयेत्यादि-त्रिजगति विजयो यस्य स त्रिजगद्विजयः, श्रीपालस्य प्रभुः श्रीपालप्रभुस्तत्सं०, तथा"मयणाहिय"त्ति मदनसुन्दर्या हितो-हितकारी तत्संबो० इति ॥१७८॥ एवममुना प्रकारेण समाधौ-चित्तैकाग्र्ये लीना-मग्ना मदनसुन्दरी यावत् स्तौति तावत् जिनस्य-भगवतः कण्ठात् करस्थितबीजपूरकादिफलेन सहिता कुसुमानां-पुष्पाणां वरा-प्रधाना माला उच्छलिता ॥१७९॥ तदा मदनसुन्दरीवचनात् उम्बरराजेन सहसा-सद्यस्तत्फलं गृहीतम्, इति पादपूरणे, तथा आनन्दितं मनो यस्याः सा आनन्दितमनास्तया तादृश्या मदनसुन्दर्या स्वयमात्मना माला गृहीता ॥१८०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भणिअं च तीइ सामिअ, फिट्टिस्सइ एस तुम्ह तणुरोगो । जेणेसो संजोगो, जाओ जिणवरकयपसाओ ॥१८१॥
तत्तो मयणा पइणा, सहिआ मुनिचंदगुरुसमीवंमि । पत्ता पमुइअचित्ता,भत्तीए नमइ तस्स पए ॥१८२॥
गुरूणो य तया करुणापरित्तचित्ता कहंति भवियाणं । गंभीरसजलजलहर-सरेण धम्मस्स फलमेवं ॥१८३॥
सुमाणुसत्तं सुकुलं सुरूवं, सोहग्गमारुग्गमतुच्छमाउ । रिद्धिं च विद्धिं च पहुत्तकित्ती, पुन्नप्पसाएण लहंति सत्ता ॥१८४॥

च - पुनः तया-मदनसुन्दर्या भणितं हे स्वामिन् ! एष युष्माकं तनुरोगो-देहव्याधिः 'फिट्टिस्सइ'त्ति अपयास्यति, येन कारणेन एष संयोगो जिनवरेण-ऋषभस्वामिना कृतः प्रसादो यस्मिन् स ईदृशो जातोऽस्ति, तेन ज्ञायते इत्यर्थः ॥ १८१॥ ततस्तदनन्तरं मदनसुन्दरी पत्या-स्वभर्ता सहिता मुनिचन्द्राख्यगुरूणां समीपे प्राप्ता, तदा प्रमुदितं-हृष्टं चित्तं यस्या सा तथाविधा सती भक्त्या तस्य-गुरोः पादौ-चरणौ नमति ॥१८२॥ तदा-तस्मिन्काले करुणया-कृपया परीतं-व्याप्तं चित्तं येषां ते तथाविधा गुरवश्च भव्यजीवानां पुरस्तात् सजलो-जलभृतो यो जलधरो-मेघस्तद्वद् गम्भीरो यः स्वरस्तेन एवं-वक्ष्यमाणप्रकारेण धर्म्मस्य फलं कथयन्ति ॥ १८३ ॥ कथमित्याह- सुष्ठु-शोभनं मानुषत्वं, तत्रापि सुकुलम्-उत्तमं गोत्रं, तत्र पुनः शोभनं रूपमाकृतिः पञ्चेन्द्रियपटुतेत्यर्थः, तत्रापि सौभाग्यं-सर्वजनवल्लभत्वं, तथा आरोग्यं-नीरोगता, पुनः अतुच्छं-प्रचुरं आयुर्जीवितं, तथा ऋद्धिं-सम्पदं, च - पुनः वृद्धिं-पुत्रादिपरिवाररूपां, तथा प्रभुत्वं-स्वामित्वं, कीर्तिर्यशः, प्रभुत्वं च कीर्तिश्च प्रभुत्वकीर्त्ती ते, एतानि वस्तूनि सत्त्वाः -प्राणिनः पुण्यप्रसादेन-धर्म्मप्रभावाल्लभन्ते-प्राप्नुवन्ति ॥१८४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इच्वाइदेसणंते,गुरुणो पुच्छंति परिचियं मयणं । वच्छे कोऽयं धन्नो, वरलक्खणलक्खिअसुपुन्नो ? ॥१८५॥
मयणाइ रुअंतीए, कहिओ सव्वोवि निअयवुत्तंतो । विन्नत्तं च न अन्नं,भयवं ! मह किंपि अत्थि दुहं ॥१८६॥
एयं चिअ मह दुक्खं, जं मिच्छादिट्ठिणो इमे लोआ । निंदंति जिणह धम्मं, सिवधम्मं चेव संसंति ॥१८७॥
ता पहु कुणह पसायं, किंपि उवायं कहेह मह पइणो । जेणेस दुट्ठवाही, जाइ खयं लोअवायं च ॥१८८॥
पभणेइ गुरू भद्दे ! साहूणं न कप्पए हु सावज्जं । कहिउं किंपि तिगिच्छं, विज्जं मंतं च तंतं च ॥१८९॥

इत्यादिदेशनाया अन्ते गुरवो निजपरिचितां मदनसुन्दरीं पृच्छन्ति, हे वत्से- हे पुत्री ! अयं पुरोवर्त्ती धन्यः - प्रशस्यः पुनः वरैः-प्रधानैः लक्षणैर्लक्षितस्तथा शोभनं पुण्यं यस्य स ईदृशः कः पुरुषोऽस्ति? ॥१८५॥ तदा मदनसुन्दर्या रुदत्या-रोदनं कुर्वत्या सर्वोऽपि निजकवृत्तान्तः कथितः, च - पुनः इत्थं विज्ञप्तं- हे भगवन्-- हे पूज्य ! मम अन्यत्-अपरं किमपि दुःखं नास्ति ॥१८६॥ किन्तु एतदेव महद् दुःखं यन्मिथ्यादृष्टय इमे लोकाः जिनधर्म्मं निन्दन्ति, शिवधर्म्मं-मिथ्याधर्ममेव च प्रशंसन्ति ॥१८७॥ तस्मात् हे प्रभो !- हे स्वामिन् ! यूयं प्रसादं कुरुत, कमपि उपायं कथयत येनोपायेन मम पत्युः एष दुष्टव्याधिः-कुष्ठरोगः क्षयं याति, च - पुनः लोकवादो-लोकापवादः क्षयं याति ॥१८८॥ ततो गुरुः प्रभणति-वदति, हे भद्रे ! साधूनां किमपि सावद्यं - सदोषं वस्तु कथयितुं न कल्पते, किं ? तदित्याह- चिकित्सां-वैद्यकं, पुनर्विद्यां च पुनर्मन्त्रं च पुनस्तन्त्रम्, एतानि सावद्यानि साधुभिर्न कथनीयानि इत्यर्थः ॥१८९॥

For Private and Personal Use Only

तहवि अणवज्जमेगं, समत्थि आराहणं नवपयाणं । इहलोइअपारलोइअ-सुहाण मूलं जिणुद्दिट्ठं ॥१९०॥
अरिहं सिद्धायरिआ, उज्झाया साहूणो य सम्मत्तं । नाणं चरणं च तवो, इअ पयनवगं परमतत्तं ॥१९१॥
एएहिं नवपएहिं, रहिअं अन्नं न अत्थि परमत्थं । एएसुच्चिअ जिणसासणस्स सव्वस्स अवयारो ॥१९२॥
जे किर सिद्धा सिज्झंति जे अ जे आवि सिज्झइस्संति । ते सव्वेवि हु नवपय-झाणेणं चेव निब्भंतं ॥१९३॥
एएसिं च पयाणं, पयमेगयरं च परमभत्तीए । आराहिऊण णेगे, संपत्ता तिजयसामित्तं ॥१९४॥

तथापि एकं नवपदानामाराधनम् अनवद्यं-निर्दोषं समस्ति--विद्यते, कीदृशं तत् ? -ऐहलौकिकपारलौकिकसुखानां - इहभव-परभवसौख्यानां मूलं-मूलकारणं, पुनः कीदृशम् ? -जिनेन-भगवता उद्दिष्टं-कथितम् ॥१९०॥ नवपदनामान्याह-अर्हन्तः १ सिद्धाः २ आचार्याः ३ उपाध्यायाः ४ साधवः ५ च - पुनः सम्यक्त्वं ६ ज्ञानं ७ चरणं -चारित्रं ८ च - पुनः तपः ९ इत्येतत्पदानां नवकं परमतत्त्वं वर्त्तते ॥१९१॥ एतैः नवभिः पदै रहितो -वर्जितोऽन्यः परमार्थस्तात्त्विकोऽर्थो नास्ति, एतेष्वेव-नवत्रदेषु सर्वस्य जिनशासनस्य-जिनमतस्य अवतारः -अवतरणमस्ति ॥१९२॥ किलेति निश्चितं, ये जीवा अतीते काले सिद्धाः -मुक्तिं गताः, ये च वर्तमानकाले सिद्ध्यन्ति, ये चापि अनागते काले सेत्स्यन्ति-सिद्धिं यास्यन्ति हुः पादपूरणे, ते सर्वेपि निर्भ्रान्तं-निस्संदेहं नवपदध्यानेनैव, न तु तद्व्यतिरेकेणेत्यर्थः ॥१९३॥ च - पुनः एतेषां पदानां मध्यात् एकतरम्-अन्यतममेकं पदं परमभक्त्या आराध्य-संसेव्य अनेके जीवाः त्रिजगत्स्वामित्वं सम्प्राप्ताः - सकलकर्मक्षयेण त्रिभुवनस्वामिनो जाता इत्यर्थः ॥१९४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एएहिं नवपएहिं, सिद्धं सिरिसिद्धचक्कमेअं जं । तस्सुद्धारो एसो, पुव्वायरिएहिं निद्दिट्ठो ॥१९५॥
गयणमकलिआयंतं, उड्ढाहसरं सनायबिन्दुकलं । सपणवबीआणाहय –मंतसरं सरह पीढंमि॥१९६॥

एतैर्नवभिः पदैः सिद्धं-निष्पन्नं यदेतत् श्रीसिद्धचक्रं, तस्य सिद्धचक्रस्य एष उद्धारः पूर्वाचार्यैर्निर्दिष्टः-कथितः ॥१९५॥ अथ ग्रन्थकार एकादशगाथाभिः सिद्धचक्रोद्धारविधिमाह-गयणेत्यादि,अत्र गगनादिसंज्ञा मन्त्रशास्त्रेभ्यो ज्ञेया, तत्र गगनशब्देन ह इत्यक्षरमुच्यते,'पीढंमि'त्ति मूलपीठे-यन्त्रस्य सर्वमध्ये ह इत्यक्षरं यूयं स्मरत, इह च स्मरणमेवाधिकृतं, स्मरणस्याशक्यत्वे पदस्थध्यानसाधनार्थं मनोज्ञद्रव्यैर्वहिकापट्टादौ लिखनमपि पूर्वाचार्यैराम्नातम्, एवमग्रेऽप्युह्यं,तत्रादौ हकाराक्षरं लेखनीयमिति प्रकृतं, तत्कीदृशम् ? इत्याह-अस्य-अकाराक्षरस्य कलिका-व्याकरणसंज्ञामयी वक्रा 'ऽ' इत्यक्षररूपा, तयाऽवन्तं-सहितम्, आदौ कलिकया युक्तं, ततः 'ऽह्र' इति स्यात्, पुनः तद् गगनबीजं कीदृशम् ? ' उड्ढाहसरं ' उर्ध्वाधः सह रेण - रकारेण वर्तते इति सरं, हकास्योर्ध्वमधश्च रकारो दीयते, ततः'ऽर्ह्र' इति जातं, पुनः कीदृशं तत् ? 'सनादबिन्दुकलं' नादोऽर्धचन्द्राकारोऽक्षरस्योपरि अनुनाशिकः, बिन्दुकला च पूर्णोऽनुस्वारः, ततो नादश्च बिन्दुकला च ताभ्यां सहितं, ततः 'ऽर्ह्रँ' इति जातं, पुनः कीदृशं ? 'सपणवबीयाणाहयं' प्रणवः- ॐकारः, बीजं ह्रींकारः अनाहतं च कुण्डलाकारं, ततश्च द्वन्द्वः, तैः सहितम्, आत्राम्नायः 'अर्ह्रँ'इति बीजं ॐकारोदरे न्यस्येत्, एतच्च बीजद्वयं ह्रींकारोदरे न्यस्येत्, ततश्च ह्रींकारस्येकारस्वरात् रेखां पश्चाद् वालयित्वा द्विःकुण्डलाकारेणाऽनाहतेन तद् बीजत्रयमपि वेष्टयेत्, पुनः कीदृशम् ? 'अन्त्यस्वरम्' अन्त्ये स्वराः अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः एते षोडश यस्य तत्, पूर्वोक्तस्य सर्वतः स्वरान् न्यस्येदित्यर्थः इत्येतावत् कर्णिकायां ध्येयम् ॥१९६॥

For Private and Personal Use Only

झायह अडदलवलए, सपणवमायाइए सुवाहंते । सिद्धाइए दिसासुं, विदिसासुं दंसणाईए ॥१९७॥
बीअवलयंमि अडदिसि, दलेसु साणाहए सरह वग्गे । अंतरदलेसु अट्ठसु, झायह परमिट्ठिपढमपए ॥१९८॥

अथ पीठं लिखित्वा तत्पार्श्वे वृत्तमण्डलं लिखेत्, तदुपरि अष्टदलकमलाकारं वलयं लिखेत्, तत्राष्टदलवलये चतुर्षु दिक्पत्रेषु प्रणवमायादिकान् स्वाहान्तान् सिद्धादिकान् चतुर्थीबहुवचनान्तान् ध्यायत, प्रणव-ॐकारो माया-ह्रींकारस्तौ आदी येषां ते तान् तथा स्वाहाऽन्ते येषां ते तान्,लिखनविधिः यथा-ॐ ह्रीं सिद्धेभ्यः स्वाहा पूर्वस्यां १, ॐ ह्रीं आचार्येभ्यः स्वाहा दक्षिणस्यां २, ॐ ह्रीं उपाध्यायेभ्यः स्वाहा पश्चिमायां ३, ॐ ह्रीं सर्वसाधुभ्यः स्वाहा उत्तरदिग्दले ४, तथैव विदिक्षु दर्शनादीनि चत्वारि पदानि ध्यायत, तत्तल्लिखनविधिस्त्वयं- ॐ ह्रीं दर्शनाय स्वाहा आग्नेयकोणे १, ॐ ह्रीं ज्ञानाय स्वाहा नैर्ऋत्याम् २, ॐ ह्रीं चारित्राय स्वाहा वायव्ये ३, ॐ ह्रीं तपसे स्वाहा ईशानकोणे ४, अनेन क्रमेण लिखेत् एवमष्टदलं प्रथमवलयम् ॥१९७॥ प्रथमवलयबाह्यतो मण्डलाकारं षोडशदलं न्यस्येत्, तत्र द्वितीयवलये अष्टसु एकान्तरितदिग्दलेषु सानाहतान्-अनाहतबीजसहितान् अष्टौ वर्गान् अ- क- च- ट- त- प- य- श- रूपान् क्रमेण लिखित्वा यूयं स्मरत, तत्र प्रथमवर्गे षोडश वर्णाः कवर्गादिषु पञ्चसु प्रत्येकं पञ्च पञ्च वर्णाः, अन्तिमवर्गद्वये प्रत्येकं चत्वारो वर्णाः, ततोऽष्टसु वर्ग्गाणामन्तरदलेषु परमेष्ठिपदानि ॐ नमो अरिहंताणमित्येवं रूपाणि ध्यायत, अष्टस्वपि अन्तरदलेषु ॐ नमो अरिहंताणं इत्येवं लिखेदित्यर्थः । एवं द्वितीयवलयम् ॥१९८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तइअवलएऽवि अडदिसि, दिप्पंतअणाएहिं अंतरिए । पायाहिणेण तिहिपंतिआहिं झाएह लद्धिपए ॥१९९॥
ते पणवबीअअरिहं, नमो जिणाणंति एवमाईआ । अडयालीसं णेआ, संमं सुगुरुवएसेणं ॥२००॥
तं तिगुणेणं माया-बीएणं सुद्धसेयवण्णेणं । परिवेढिऊण परिहीइ, तस्स गुरुपायए नमह ॥२०१॥

तृतीयवलयेऽपि अष्टसु दिक्षु अष्टावनाहतान् लिखेत्, ततो द्वयोर्द्वयोरन्तरे द्वे द्वे लब्धिपदे, एवमष्टस्वप्यन्तरेषु षोडश लब्धिपदानि प्रथमपङ्क्तौ, एवं षोडशैव द्वितीयपङ्क्तौ, एवमेव तृतीयपङ्क्तौ, इत्थं दीप्यमानैरष्टभिरनाहतैरन्तरितानि-व्यवहितानि प्रादक्षिण्येन तिसृभिः पङ्क्तिभिः-श्रेणिभिरष्टचत्वारिंशल्लब्धिपदानि यूयं ध्यायत ॥१९९॥ ते इति प्राकृतत्वान्नपुंसकस्य पुंस्त्वं, तानि लब्धिपदानि प्रणवः-ॐकारो बीजं-ह्रींकारोऽर्हमिति सिद्धिबीजम्, एतत्पूर्वकं नमो जिणाणमिति पदं ॐ ह्रीं अर्हं नमो जिणाणं इत्येवमादीनि अष्टचत्वारिंशत्सङ्ख्यानि सम्यक् सुगुरोरुपदेशेन ज्ञेयानि, एतेषां नामानि माहात्म्यानि च लब्धिकल्पादवसेयानि, इह त्वाराधनविधिं विना पुस्तकलिखने दोष इति न लिखितानि ॥२००॥ तत् पीठादि लब्धिपदान्तं त्रिगुणेन शुद्धश्वेतवर्णेन मायाबीजेन-ह्रींकारेण परिवेष्ट्य परितः-समन्ताद्वेष्टयित्वा तस्य परिधौ गुरुपादुकाः-गुरुपादन्यासान् यूयं नमत । अत्रायं भावः- सर्वयन्त्रस्योर्ध्वं ह्रींकारं विलिख्य तस्य ईकारात्सर्वयन्त्रपरिक्षेपरूपां रेखां त्रिर्वालयित्वा चतुर्थरेखार्धप्रान्ते क्रौँ इत्यक्षरं लिखेत्, तस्य च परिधौ अष्टौ गुरुपादुकाः, पादुकाशब्दो यद्यपि नामकोशे उपानद्वाचक उक्तः, तथापि रूढ्या पादन्यासार्थोऽपि बोध्यः, बहुस्थानेषु तथा दर्शनात् ॥२०१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अरिहं सिद्धगणीणं, गुरुपरमादिट्ठणंतसुगुरूणं । दुरणंताणं गुरूण य, सपणवबीयाओं ताओ य ॥२०२॥
रेहादुगकयकलसा-गारामिअमंडलंव तं सरह । चउदिसि विदिसि कमेणं,जयाइजंभाइकयसेवं ॥२०३॥
सिरिविमलसामिपमुहाहिट्ठायगसयलदेवदेवीणं । सुहगुरुमुहाओं जाणिअ, ताण पयाणं कुणह झाणं ॥२०४॥

अथाष्टगुरुपादुका एवाह- अर्हतां पादुकाः १, सिद्धानां पादुकाः २, गणीनां -आचार्याणां ३, गुरूणां-पाठकानां ४, परमगुरूणां ५, अदृष्टगुरूणाम् ६, अनन्तगुरुणाम् ७, दुरणंताणं'ति-अनन्तानन्तगुरूणां च ८, इत्येवमष्टानामपि ताः-पादुकाः सप्रणवबीजाः-प्रणवबीजाभ्यां सहिताः ॐ ह्रींयुता इत्यर्थः, ॐ ह्रीं अर्हत्पादुकाभ्यो नमः इत्थं सर्वा अपि लिखेत् ॥२०२॥ रेखाद्विकेन यन्त्रोर्ध्वभागाद्वामदक्षिणनिर्गतान्योऽन्यग्रथितप्रान्तरेखाद्विकेन कृतं यत्कलशाकारम् अमृतमण्डलं तद्वत् स्मरत-कलशाकारं लिखेदित्यर्थः, किंविशिष्टं तत् ? -चतुर्दिक्षु विदिक्षु च क्रमेण जयादिकाभिः चतसृभिः जया - विजया - जयन्त्य-पराजिताभिः तथा जम्भादिभिर्जम्भा - षम्भा - मोहा - गन्धाभिः कृता सेवा यस्य तत्, तत्र जयादिकाश्चतस्रः क्रमेण पूर्वादिदिक्षु जम्भादिका आग्नेय्यादिषु विदिक्षु लिखेत् ॥२०३॥ श्रीविमलस्वामीति नाम्ना सौधर्मदेवलोकवासी श्रीसिद्धचक्रस्याधिष्ठायकः तत्प्रमुखा येऽधिष्ठायका सकलाः- समस्ता देवा देव्यश्चक्रेश्वर्याद्याः तासां ध्यानं सुगुरुमुखात् ज्ञात्वा 'ताण'त्ति तत्सम्बन्धिनां 'पयाणं'ति मन्त्रपदानां ध्यानं यूयं कुरुत, एतेषां नामानि कलशाकारस्योपरि सर्वतो लिखेत्, ॐ ह्रीं विमलस्वामिने नमः इत्यादि लिखेदित्यर्थः ॥२०४॥

For Private and Personal Use Only

तं विज्जादेविसासण-सुरसासणदेविसेविअदुपासं । मूलगहं कंठणिहिं, चउपडिहारं च चउवीरं ॥२०५॥
दिसिवालखित्तवालेहिं सेविअं धरणिमंडलपइट्ठं । पूयंताण नराणं, नूणं पूरेइ मणइट्ठं ॥२०६॥

अथ तमित्यादि गाथायुग्मस्य व्याख्या, तत् - सिद्धचक्रं कर्तृ पूजयतां नराणां नूनं-निश्चितं मनइष्टं-मनसोऽभीष्टं पूरयति, इति द्वितीयगाथान्त्यपादद्वयेन सम्बन्धः, किंविशिष्टं तत् ?-विद्यादेव्यो-रोहिण्याद्याः षोडश, शासनसुरा गोमुखयक्षादयः चतुर्विंशतिः, शासनदेव्यश्चक्रेश्वर्याद्याः चतुर्विंशतिरेव, ततो विद्यादेवीभिः शासनदेवीभिश्च सेवितौ द्वौ पार्श्वौ-वामदक्षिणौ यस्य तत्, पुनः कीदृशं? 'मूलगहं'ति मूले-कलशस्य मूले ग्रहाः-सूर्यादयो यस्य तत्, तथा कण्ठे-गलस्थाने निधयो नवसङ्ख्याका नैसर्प्पकाद्या आगमप्रसिद्धा यस्य तत्, तद्यथा-"नैसर्प्पः १ पाण्डुकश्चाथ,२ पिङ्गलः ३सर्वरत्नकः ४ । महापद्मः ५ काल ६ महाकालौ, ७ माणव ८ शङ्खकौ ९ ॥१॥" तथा-चत्वारः प्रतीहारा-द्वारपालाः कुमुदाञ्जनवामनपुष्पदन्ताख्या यस्य तत्तथा,चत्वारो वीरा मणिभद्रपूर्णभद्रकपिलपिङ्गलाख्या यस्य तत्, तत्र विद्यादेव्यः षोडशापि ॐ ह्रीं रोहिण्यै नमः इत्यादि यन्त्रपरितो लिखेत्, तथा शासनसुरान् चक्रस्य दक्षिणदिशि लिखेत्, शासनदेवीः अथ वामदिशि लिखेत्, तथा-कलशाकारचक्रस्य मूले पतग्रहाऽधः ॐ आदित्याय नम इत्यादीनि नवग्रहाणां नामानि लिखेत्, कण्ठे च वामदक्षिणतो नवापि कलशान् तदुपरि ॐ नैसर्प्पकाय नम इत्यादि लिखेत्, तथा चतसृषु दिक्षु क्रमेण कुमुदा-ऽञ्जन-वामन-पुष्पदन्तान् लिखेत् तथा मणिभद्रादींश्चतुरो वीरानपि एवं दिक्षु लिखेत्, 'दिसिवाल'त्ति दिक्पालैर्दशभिरिन्द्राग्नियमनैरृत-वरुणवायुकुबेरेशानब्रह्मनागनामभिः क्षेत्रपालेन च प्रसिद्धेन सेवितं पुनर्द्धरणीमण्डलप्रतिष्ठं-पृथ्वीपीठे स्थितमित्यर्थः, तत्र दशसु दिक्पालेषु अष्टौ दिक्पालान्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एयं च सिद्धचक्कं, कहिअं विज्जाणुवायपरमत्थं । नाएण जेण सहसा, सिज्झंति महंतसिद्धिओ ॥२०७॥
एयं च विमलधवलं, जो झायइ सुक्कझाणजोएण । तवसंजमेण जुत्तो, सो पावइ निज्जरं विउलं ॥२०८॥
अक्खयसुक्खो मुक्खो, जस्स पसाएण लब्भए तस्स । झाणेणं अन्नाओ, सिद्धीओ हुंति किं चुज्जं ?॥२०९॥
एयं च परमतत्तं, परमरहस्सं च परममंतं च । परमत्थं परमपयं, पन्नत्तं परमपुरिसेहिं ॥२१०॥

पूर्वादिक्रमेण लिखेत् ॐ इन्द्राय नम इत्यादि, ऊर्ध्वं तु ॐ ब्रह्मणे नमः अधः ॐ नागाय नमः, निजदक्षिणनागकोणे ॐ क्षेत्रपालाय नमः इति लिखेत्, अस्य लिखने सम्यग्विधिश्चास्याम्नायविन्मुखाद्यथालिखितचक्राद्वाऽवसेयः ॥२०५॥ ॥२०६॥ एतच्च सिद्धचक्रं विद्यानुवादो-दशमं पूर्वं तस्य परमार्थरूपं- रहस्यभूतमित्यर्थः, येन ज्ञातेन सहसा-सद्यो महत्यः सिद्धयः-अणिमाद्याः सिद्ध्यन्ति ॥२०७॥ एतच्च विमलम्-निर्मलम् अत एव धवलम् -उज्ज्वलं श्रीसिद्धचक्रं यः पुमान् शुक्लध्यानयोगेन -उज्ज्वलध्यानव्यापारेण ध्यायति स विपुलां-विस्तीर्णां निर्जरां प्राप्नोति, बहुकर्मक्षयं करोतीत्यर्थः, कीदृशः सः ?-तपःसंयमाभ्यां युक्तः ॥२०८॥ अक्षयं सुखं यस्मिन् स ईदृशो मोक्षो यस्य श्रीसिद्धचक्रस्य प्रसादेन प्राणिभिर्लभ्यते तस्य ध्यानेन अन्याः सिद्धयो भवन्ति तत्र किञ्चोद्यं-किमाश्चर्यमित्यर्थः ॥२०९॥ एतच्च परमतत्त्वं-उत्कृष्टं तत्त्वं, च -पुनः परमं रहस्यं-गोप्यं, च - पुनः परमो मन्त्रः, पुनः परमार्थः, पुनः परमपदं परमपुरुषैर्भगवद्भिः प्रज्ञप्तं-प्ररूपितम् ॥२१०॥

For Private and Personal Use Only

तत्तो तिजयपसिद्धं,अट्ठमहासिद्धिदायगं सुद्धं । सिरिसिद्धचक्कमेअं, आराहह परमभत्तीए ॥२११॥
खंतो दंतो संतो, एयस्साराहगो नरो होइ । जो पुण विवरीयगुणो, एयस्स विराहगो सो उ ॥२१२॥
तम्हा एयस्साराहगेण एगंतसंतचित्तेणं । निम्मलसीलगुणेणं, मुणिणा गिहिणा वि होयव्वं ॥२१३॥
जो होइ दुट्ठचित्तो, एयस्साराहगोवि होऊण । तस्स न सिज्झइ एयं, किंतु अवायं कुणइ नूणं ॥२१४॥
जो पुण एयस्साराहगस्स उवरिंमि सुद्धचित्तस्स । चिंतइ किंपि विरूवं, तं नूणं होइ तस्सेव ॥२१५॥

ततस्तस्मात्कारणात् भो भो भव्याः ! त्रिजगति-लोकत्रये प्रसिद्धम्, अणिमाद्यष्टमहासिद्धिदायकं शुद्धं-निर्म्मलम् एतत् श्रीसिद्धचक्रं परमभक्त्या यूयमाराधयत-सेवध्वम् ॥२११॥ अथैतस्य यः आराधको भवति तत्स्वरूपमाह- क्षान्तः-क्षमायुक्तः दान्तो-जितेन्द्रियः शान्तो-जितमानसविकारः ईदृशो नरो-मनुष्य एतस्य-सिद्धचक्रस्य आराधको भवति,यः पुनः विपरीता गुणा यस्मिन् स विपरीतगुणः कामक्रोधादियुक्त इत्यर्थः, स तु पुमान् एतस्य विराधको भवति ॥२१२॥ तस्मात्कारणात् एतस्याराधकेन मुनिना - साधुना गृहिणा-गृहस्थेनापि च ईदृशेन भवितव्यं कीदृशेन ? इत्येतदाह- एकान्तेन-निश्चयेन शान्तं-विकाररहितं चित्तं यस्य स तेन, पुनर्निर्म्मलः शीलगुणो यस्य स तेन ॥२१३॥ यः पुमान् एतस्याराधकोऽपि भूत्वा दुष्टं चित्तं यस्य स दुष्टचित्तो भवति तस्य पुंस एतत् श्रीसिद्धचक्रं न सिद्ध्यति, किन्तु नूनं-निश्चितम् अपायं-कष्टं करोति ॥२१४॥ शुद्धं चित्तं यस्य स शुद्धचित्तस्तस्य एतस्याराधकस्य पुंस उपरि कोऽपि दुष्टः किमपि विरूपम्-अशुभं चिन्तयति, तद्विरूपं नूनं-निश्चितं तस्यैव विरूपचिन्तकस्यैव भवति ॥२१५॥

एएण कारणेणं, पसन्नचित्तेण सुद्धसीलेण। आराहणिज्जमेअं, सम्मं तवकम्मविहिपुव्वं ॥२१६॥
आसोअसेअअट्ठमि-दिणाओ आरंभिऊणमेयस्स। अट्ठविहपूयपुव्वं, आयामे कुणह अट्ठ दिणे ॥२१७॥
नवमंमि दिणे पंचामएण ण्हवणं इमस्स काऊणं। पूयं च वित्थरेणं, आयंबिलमेव कायव्वं ॥२१८॥
एवं चित्तेवि तहा, पुणो पुणोऽट्ठाहियाण नवगेणं। एगासीए आयंबिलाण एयं हवइ पुन्नं ॥२१९॥

एतेन कारणेन प्रसन्नं-निर्मलं चित्तं यस्य स तेन, तथा शुद्धं शीलं यस्य स तेन पुरुषेण एतत् सिद्धचक्रं सम्यक् तपःकर्मविधिपूर्वमाराधनीयं, तपःकर्म-आचामाम्लरूपं, विधिः-पूजनध्यानादिसम्बन्धी, तत्पूर्वकमित्यर्थः ॥२१६॥ आश्विनश्वेताष्टमीदिनात्-आश्विनसुद्यष्टमीदिवसात् आरभ्य एतस्य-श्रीसिद्धचक्रस्य अष्टविधपूजापूर्वम्-अष्टप्रकारां पूजां विधाय इत्यर्थः, अष्ट दिनानि यावदहो भव्या आचामाम्लानि तपांसि यूयं कुरुत, यद्यपि मूलविधिनाऽष्टमीदिनादारभ्यैतत्तपः प्रोक्तमस्ति, परं साम्प्रतं तु पूर्वाचार्याचरणातः सप्तमीदिनात् क्रियमाणमस्तीति ज्ञेयम् ॥२१७॥ नवमे दिनेऽस्य-श्रीसिद्धचक्रस्य पञ्चामृतेन-दधिदुग्धघृतजलशर्करास्वरूपेण स्नपनं कृत्वा च - पुनः विस्तरेण पूजां कृत्वा आचामाम्लमेव कर्तव्यम् ॥२१८॥ एवं चैत्रेऽपि कर्तव्यं, तथा-तेन प्रकारेण पुनः पुनरष्टाह्निकानां नवकेन आचामाम्लानामेकाशीत्याचामाम्लैरित्यर्थः, एतत्तपः कर्म पूर्णं भवति ॥२१९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एयंमि कीरमाणे, नवपयझाणं मणंमि कायव्वं । पुन्ने य तवोकम्मे, उज्जमणंपि विहेयव्वं ॥२२०॥
एअं च तवोकम्मं, संमं जो कुणइ सुद्धभावेणं । सयलसुरासुरनरवर-रिद्धीउ न दुल्लहा तस्स ॥२२१॥
एयंमि कओ न हु दुट्ठकुट्ठखयजरभगंदराईआ । पहवंति महारोगा, पुव्वुप्पन्नावि नासंति ॥२२२॥
दासत्तं पेसत्तं, विकलत्तं दोहगत्तमंधत्तं । देहकुलजुंगियत्तं, न होइ एयस्स करणेणं ॥२२३॥
नारीणवि दोहग्गं, विसकन्नत्तं कुरंडरंडत्तं । वंझत्तं मयवच्छत्तणं च न हवेइ कइयावि ॥२२४॥

एतस्मिन्तपसि क्रियमाणे मनसि नवपदध्यानं कर्त्तव्यं, नवपदानां जापश्चात्र जघन्यतस्त्रयोदशसहस्राणीति वृद्धाः, च-पुनस्तपःकर्मणि पूर्णे सति उद्यापनमपि विधातव्यं-कर्त्तव्यं, हु इति निश्चयेन ॥२२०॥ यः प्राणी एतच्च सम्यक्--समीचीनं तपःकर्म्म--तपोऽनुष्ठानं शुद्धभावेन करोति तस्य-प्राणिनः सकलसुरासुरनरवराणाम् ऋद्धयः-सम्पदो न दुर्लभाः-सुलभा एवेत्यर्थः ॥२२१॥ एतस्मिन्तपःकर्मणि कृते सति दुष्टकुष्ठ - क्षय - ज्वर - भगन्दराद्या महारोगा नैव प्रभवन्ति-नैवोत्पद्यन्ते, पूर्वोत्पन्ना रोगा अपि नश्यन्ति ॥२२२॥ एतस्य तपसः करणेन कर्तुर्दासत्वं न भवति, तथा प्रेष्यत्वं-कर्मकरत्वं न भवति, एवं विकलत्वं-कलाहीनत्वं, दुर्भगत्वं-लोकेऽनिष्टत्वम्, अन्धत्वं-गताक्षत्वं, देहजुङ्गितत्वं-शरीरदूषितत्वं, कुलजुङ्गितत्वं-कुलदूषितत्वम् एतानि न भवन्ति ॥२२३॥ स्त्रीणामपि एते दोषाः कदापि न भवन्ति, के एते इत्याह- दौर्भाग्यं-भर्त्राद्यनिष्टत्वं तथा विषकन्यात्वम्, एवं कुरण्डात्वं - कुलक्षणनारीत्वं रण्डात्वं-भर्तृविहीनत्वं वन्ध्यात्वं-निरपत्यत्वं मृतवत्सात्वं च एतानि न भवन्ति ॥२२४॥

For Private and Personal Use Only

किं बहुणा जीवाणं, एयस्स पसायओ सयाकालं । मणवंछियत्थसिद्धी, हवेइ नत्थित्थ संदेहो ॥२२५॥
एवं तेसिं सिरिसिद्ध-चक्कमाहप्पमुत्तमं कहिउं । सावयसमुदायस्सवि, गुरुणो एवं उवइसंति ॥२२६॥
एएहिं उत्तमेहिं, लक्खिज्जइ लक्खणेहिं एस नरो । जिणसासणस्स नूणं, अचिरेण पभावगो होही ॥२२७॥
तम्हा तुम्हं जुज्जइ,एसिं साहम्मिआण वच्छल्लं । काउं जेण जिणिंदेहिं वन्निअं उत्तमं एयं ॥२२८॥
तो तुट्ठेहिं तेहिं, सुसावएहिं वरंमि ठाणंमि । ते ठाविऊण दिन्नं, धणकणवत्थाइयं सव्वं ॥२२९॥

किं बहुनोक्तेन जीवानामेतस्य प्रसादतः सदाकालं-सर्वस्मिन्नपि काले मनोवाञ्छितार्थस्य सिद्धिर्भवति, नास्त्यत्र सन्देहः-संशयः ॥२२५॥ एवममुना प्रकारेण तयोः श्रीपालमदनसुन्दर्योरग्रे उत्तमं-प्रधानं श्रीसिद्धचक्रस्य माहात्म्यं कथयित्वा श्रावकसमुदायस्य-श्रद्धालुसंघस्यापि गुरवः एवं-वक्ष्यमाणप्रकारेण उपदिशन्ति ॥२२६॥ एतैः उत्तमैर्लक्षणैः-चिह्नैर्लक्ष्यते-ज्ञायते, एष नरो नूनं-निश्चितम् अचिरेण-स्वल्पकालेन जिनशासनस्य प्रभावक-उद्दीपनकृत् भविष्यतीति ॥२२७॥ तस्मात् युष्माकम् एषां साधर्म्मिकाणां-अनयोः साधर्म्मिकयोर्वात्सल्यं कर्तुं युज्यते, येन कारणेन जिनेन्द्रैः एतत्-साधर्म्मिकवात्सल्यम् उत्तमं-प्रधानं वर्णितमस्ति ॥२२८॥ ततस्तुष्टैः तैः- सुश्रावकैः ते-श्रीपालमदनसुन्दर्यौ वरे-प्रधाने स्थाने गृहाद्याश्रये स्थापयित्वा धनधान्यवस्त्रादिकं सर्वं वस्तुजातं दत्तम् ॥२२९॥

न य तं करेइ माया, नेव पिया नेव बंधुवग्गो अ । जं वच्छल्लं साहम्मिआण सुस्सावओ कुणइ ॥२३०॥
तत्थ ठिओ सो कुमरो, मयणावयणेण गुरूवएसेणं । सिक्खेइ सिद्धचक्कप्पसिद्धपूआविहिं सम्मं ॥२३१॥
अह अन्नदिणे आसोअ-सेअअट्ठमितिहीइ सुमुहुत्ते । मयणासहिओ कुमरो, आरंभइ सिद्धचक्कतवं ॥२३२॥
पढमं तणुमणसुद्धिं, काऊण जिणालए जिणच्चं च । सिरिसिद्धचक्कपूयं, अट्ठपयारं कुणइ विहिणा ॥२३३॥
एवं कयविहिपूओ,पच्चक्खाणं करेइ आयामं । आणंदपुलइअंगो, जाओ सो पढमदिवसे वि॥२३४॥

न च तद्वात्सल्यं माता करोति, नैव पिता-जनकः, नैव बन्धुवर्गश्च-भ्रातृसमुदायः करोति,यत्साधर्मिकाणां वात्सल्यं सुश्रावकः करोति ॥२३०॥ तत्र-तस्मिन्स्थाने स्थितः स कुमारो मदनसुन्दर्या वचनेन तथा गुरूपदेशेन श्रीसिद्धचक्रस्य प्रसिद्धं पूजाविधिं सम्यक् शिक्षति-अभ्यस्यति ॥२३१॥ अथानन्तरम्-अन्यस्मिन् दिने आश्विनश्वेताष्टमीतिथौ-आश्विनसुद्यष्टम्यां शोभने मुहूर्त्ते मदनसुन्दरीसहितः श्रीपालकुमारः सिद्धचक्रतप आरभते-तत्प्रारम्भं करोतीत्यर्थः ॥२३२॥ प्रथमं तनोः-शरीरस्य मनसश्चान्तःकरणस्य शुद्धिं-निर्मलतां कृत्वा च - पुनः जिनालये-जिनगृहे जिनार्चां-जिनप्रतिमापूजां कृत्वाऽष्टप्रकारीं श्रीसिद्धचक्रस्य पूजां विधिना करोति ॥२३३॥ एवम्-उक्तप्रकारेण कृता विधिना पूजा येन स एवंविधः श्रीपाल आचामाम्लं प्रत्याख्यानं करोति, स श्रीपालकुमारः प्रथमदिवसेऽपि आनन्देन पुलकितरोमोद्गमयुतमङ्गं यस्य स एवंविधो जातः ॥२३४॥

बीअदिणे सविसेसं, संजाओ तस्स रोगउवसामो । एवं दिवसे दिवसे,रोगखए वड्ढए भावो ॥२३५॥
अह नवमे दिवसंमी, पूअं काऊण वित्थरविहीए । पंचामएण ण्हवणं, करेइ सिरिसिद्धचक्कस्स ॥२३६॥
ण्हवणूसवंमि विहिए, तेणं संतीजलेण सव्वंगं । संसित्तो सो कुमरो, जाओ सहसत्ति दिव्वतणू ॥२३७॥
सव्वेसिं संजायं, अच्छरिअं तस्स दंसणे जाव । ताव गुरू भणइ अहो, एयस्स किमेयमच्छरिअं ? ॥२३८॥
इमिणा जलेण सव्वे, दोसा गहभूअसाइणीपमुहा । नासंति तक्खणेणं, भविआणं सुद्धभावाणं ॥२३९॥

द्वितीयदिने तस्य-श्रीपालकुमारस्य सह विशेषेणेति-सविशेषं रोगस्योपशमः सञ्जातः, एवम्-अमुना प्रकारेण दिवसे दिवसे- दिने दिने रोगस्य क्षये सति भावो वर्द्धते-शुभपरिणामो वृद्धिं यातीत्यर्थः ॥२३५॥ अथ नवमे दिवसे विस्तरविधिना श्रीजिनपूजां कृत्वा पञ्चामृतेन-प्रागुक्तस्वरूपेण श्रीसिद्धचक्रस्य-यन्त्रराजस्य स्नपनं करोति ॥२३६॥ श्रीसिद्धचक्रस्य स्नपनोत्सवे स्नात्रमहोत्सवे विहिते-कृते सति तेन शान्तिजलेन सर्वस्मिन् अङ्गे संसिक्तः स कुमारः सहसा इत्यकस्मादेव दिव्या-अद्भुता मनोज्ञा तनुः-कायो यस्य स दिव्यतनुर्जातः, इतिनिपातोऽवधारणे ॥२३७॥ तादृगूरूपस्य तस्य- श्रीपालस्य दर्शने सति यावत् सर्वेषां लोकानामाश्चर्यं सञ्जातं तावद् गुरुर्भणति, अहो लोका ! एतस्य किमेतदाश्चर्यं ?, न किमपीत्यर्थः ॥२३८॥ अनेन शान्तिजलेन शुद्धभावानां- निर्मलमनःपरिणामानां भव्यानां ग्रहभूतशाकिनीप्रमुखाः सर्वेऽपि दोषास्तत्क्षणेन -तत्कालमेव नश्यन्ति-प्रणाशमुपयान्ति ॥२३९॥

खयकुट्ठजरभगंदर-भूया वाया विसूइआईआ । जे केवि दुट्ठरोगा, ते सव्वे जंति उवसामं ॥२४०॥
जलजलणसप्पसावय -भयाइं विसवेअणा उ ईईओ । दुपयचउप्पयमारीउ, नेव पहवंति लोअंमि ॥२४१॥
वंझाणवि हुंति सुया, निंदूणवि नंदणा य नंदंति । फिट्टंति पुट्टदोसा, दोहग्गं नासइ असेसं ॥२४२॥
इच्चाइ पहावं निसुणिऊण दट्ठूण तं च पच्चक्खं । लोआ महप्पमोआ, संतिजलं लिंति सविसेसं ॥२४३॥

क्षयकुष्ठज्वरभगन्दरभूताः क्षयकुष्ठादिरूपा इत्यर्थः, तथा वाता-वायुरोगाः पुनः विसूचिकादिका-अजीर्णादयो ये केऽपि दुष्टरोगाः ते सर्वे उपशामं यान्ति-उपशाम्यन्तीत्यर्थः ॥२४०॥ जलं-पानीयं ज्वलनोऽग्निः सर्पः प्रतीतः श्वापदाः सिंहादयस्तेभ्यो यानि भयानि तथा विषवेदना-विषजन्या पीडा तथा ईतयः- उत्पाताः तथा द्विपदचतुष्पदानां-मनुष्यतिरश्चां मार्यो-मरकोपद्रवाः लोके नैव प्रभवन्ति, नैव प्रवर्त्तन्ते इत्यर्थः ॥२४१॥ वन्ध्यास्त्रीणामपि सुताः-पुत्राः भवन्ति, च- पुनः निन्दूनां-मृतवत्सास्त्रीणामपि नन्दनाः -पुत्रा नन्दन्ति-संवर्द्धन्ते इत्यर्थः, तथा उदरदोषा अपि नश्यन्ति, पुनरशेषं-समस्तं दौर्भाग्यं नश्यति ॥२४२॥ श्रीसिद्धचक्रस्नपनजलस्य इत्यादि प्रभावं श्रुत्वा च- पुनः प्रत्यक्षं तं प्रभावं दृष्ट्वा लोका महान् प्रमोदो-हर्षो येषां ते महाप्रमोदाः सन्तो विशेषेण सहेति सविशेषं तत् शान्तिजलं-स्नपनपानीयं गृह्णन्ति ॥२४३॥

तं कुट्ठिपेयडं पि हु, तज्जलसंसित्तगत्तमचिरेण । उवसंतप्पायरुअं, जायं धम्मंमि सरुई य ॥२४४॥
मयणा पइणो निरुवम-रूवं च निरूविऊण साणंदा । पभणेइ पइं सामिअ !, एसो सव्वो गुरुपसाओ ॥२४५॥
माअपिअसुअसहोअर-पमुहावि कुणंति तं न उवयारं । जं निक्कारणकरुणा-परो गुरू कुणइ जीवाणं ॥२४६॥
तं जिणधम्मगुरूणं, माहप्पं मुणिय निरुवमं कुमरो । देवे गुरुंमि धम्मे, जाओ एगत्तभत्तिपरो ॥२४७॥

तत्कुष्ठिपेटकं-कुष्ठरोगिवृन्दमपि तज्जलेन-शान्तिजलेन संसिक्तं गात्रं-शरीरं यस्य तत् तादृशं सत् अचिरेण-तत्कालं उपशान्तप्राया-प्रायेणोपशान्ता रुजा-रोगा यस्य तत् उपशान्तप्रायरुजं जातं, च- पुनः धर्मे-धर्मविषये सह रुच्याऽभिलाषेण वर्त्तते इति सरुचि सञ्जातम् ॥२४४॥ च- पुनः मदनसुन्दरी पत्युः - स्वभर्तुर्निरुपमम् -अत्यद्भुतं रूपं निरूप्य-दृष्ट्वा सानन्दा-आनन्दसहिता सती पतिं-श्रीपालं प्रभणति-कथयति, हे स्वामिन् ! एष सर्वो गुरुप्रसादोऽस्ति ॥२४५॥ माता पिता सुताः-पुत्राः सहोदरा-भ्रातरः प्रमुखग्रहणादन्येऽपि स्वजना एते सर्वेऽपि तमुपकारं न कुर्वन्ति यं जीवानामुपकारं निष्कारणः- कारणवर्जिता या करुणा दया सा परा-प्रधानं यस्य स एवंविधो गुरुः करोति ॥२४६॥ जिनश्च धर्मश्च गुरुश्च जिनधर्मगुरवस्तेषां तन्निरुपमं-सर्वोत्कृष्टं माहात्म्यं-प्रभावं मुणित्वा-ज्ञात्वा कुमारः - श्रीपालो देवे-वीतरागे गुरौ-शुद्धसाधौ धर्मे च -सर्वज्ञप्रणीते एकान्तेन - निश्चयेन भक्तिपरः-सेवातत्परो जातः ॥२४७॥

धम्मपसाएणं चिय, जह जह माणंति तत्थ सुक्खाइं । ते दंपईउ तह तह, धम्मंमि समुज्जमा निच्चं ॥२४८॥
अह अन्नया उ ते जिणहराउ जा नीहरंति ता पुरओ । पिक्खंति अद्धवुड्ढं, एगं नारिं समुहमिंतिं ॥२४९॥
तं पणमिऊण कुमरो,पभणइ रोमंचकंचुइज्जंतो । अहो अणब्भा वुट्ठी, संजाया जणणिदंसणओ ॥२५०॥
मयणावि हु पियजणणिं, नाउं जा नमइ ता भणइ कुमरो । अम्मो ! एस पहावो सव्वो इमीए तुह ण्हुहाए ॥२५१॥

तत्रोज्जयिन्यां तौ दंपती-स्त्रीभर्तारौ धर्मप्रसादेनैव यथा यथा सौख्यानि मानयतः-अनुभवतस्तथा तथा धर्मे-सद्धर्मविषये नित्यं-निरन्तरं सं-सम्यग् समीचीन उद्यमो ययोस्तौ समुद्यमौ भवत इति शेषः ॥२४८॥ अथ-अनन्तरं तौ स्त्रीभर्त्तारौ अन्यदा-अन्यस्मिन् दिने, तु इति विशेषे, यावत् जिनगृहात् बहिर्निस्सरतस्तावत् पुरतः-अग्रत एकां अर्द्धवृद्धां नारीं-स्त्रियं सम्मुखं आयान्तीम्-आगच्छन्तीं प्रेक्षेते-विलोकयतः ॥२४९॥ तं स्त्रियं प्रणम्य श्रीपालकुमारो रोमाञ्चकञ्चुकितो-रोमोद्गमसंयुक्तः सन् प्रभणति-कथयति, किं कथयतीत्याह- अहो इति आश्चर्येऽद्य जनन्या-मातुर्दर्शनात् अनभ्रा-वार्दलरहिता वृष्टिः सञ्जाता वार्दलैर्विनैव मेघो ववर्षेत्यर्थः ॥२५०॥ मदनसुन्दर्यपि प्रियस्य-भर्तुर्जननीं-मातरं ज्ञात्वा यावत्तां नमति तावत्कुमारो भणति, 'अम्मो'त्ति हे अम्ब ! - हे मातः ! एषः -प्रत्यक्षं विलोक्यमानः सर्वोऽपि अस्यास्तव स्नुषाया-वध्वाः प्रभावोऽस्तीति शेषः ॥२५१॥

साणंदा सा आसीसदाणपुव्वं सुयं सुण्हं च । अभिनंदिऊण पभणइ, तइयाऽहं वच्छ ! तं मुत्तुं ॥२५२॥
कोसंबीए विज्जं, सोऊणं जाव तत्थ वच्चामि । ता तत्थ जिणायणे, दिट्ठो एगो मुणिवरिंदो ॥२५३॥
खंतो दंतो संतो, उवउत्तो गुत्तिमुत्तिसंजुत्तो । करुणारसप्पहाणो, अवितहनाणो गुणनिहाणो ॥२५४॥
धम्मं वागरमाणो, पत्थावे नमिय सो मए पुट्ठो । भयवं ! किं मह पुत्तो, कयावि होही निरुयगत्तो ? ॥२५५॥

सा कुमारमाता सानन्दा-सहर्षा सती आशीर्दानपूर्वकं सुतं च - पुत्रवधूं च स्नुषाम् अभिनन्द्य- प्रशस्य प्रभणति-स्ववृत्तान्तं कथयति, तथाहि- हे वत्स ! तदा-तस्मिन् कालेऽहं त्वामत्र मुक्त्वा ॥२५२॥ कौशांब्यां नगर्यां सर्वरोगनिवारकं वैद्यं श्रुत्वा यावत्तत्र व्रजामि-गच्छामि तावत्तत्र नगर्यां जिनायतने-जिनगृहे एको मुनिवरेन्द्रो दृष्टः, कीदृशो मुनीन्द्रः इत्याह- ॥२५३॥ क्षान्तः- क्षमायुक्तो दान्तो-जितेन्द्रियः शान्तः- शान्तरसयुक्तः उपयुक्तः - उपयोगवान् गुप्तिः-मनोवाक्कायनिरोधः, मुक्तिः - निर्लोभता, ताभ्यां संयुतः, पुनः करुणारसप्रधानः यस्य स तथोक्तः, पुनरवितथं- सत्यं ज्ञानं यस्य स तथोक्तः, अत एव गुणानां निधानं-निधिः ॥२५४॥ एवंविधः स मुनीन्द्रो धर्मं व्यागृणन् -कथयन् प्रस्तावे - अवसरे मया नत्वा - प्रणम्य पृष्टः, भगवन् ! किमिति प्रश्ने, मम पुत्रः कदापि, निष्क्रान्तं रुजाया इति निरुजम्, निरुजं गात्रं-शरीरं यस्य सः, रोगरहितकायो भविष्यति ? ॥२५५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेण मुणिंदेणुत्तं,भद्दे ! सो तुज्झ नंदणो तत्थ । तेणं चिय कुट्ठियपेडएण दट्ठूण संगहिओ ॥२५६॥
विहिओ उंबरराणुत्ति, नियपहू लद्धलोयसम्माणो । संपइ मालवनरवइधूयापाणप्पिओ जाओ ॥२५७॥
रायसुयावयणेणं, गुरूवइट्ठं स सिद्धवरचक्कं। आराहिऊण सम्मं, संजाओ कणयसमकाओ ॥२५८॥
सो य साहम्मिएहिं, पूरियविहवो सुधम्मकम्मपरो । अच्छइ उज्जेणीए, घरणीइ समन्निओ सुहिओ ॥२५९॥

तदा तेन मुनीन्द्रेणोक्तं, हे भद्रे ! स तव नन्दनः-पुत्रः तत्रोज्जयिन्यां तेनैव कुष्ठिकपेटकेन-कुष्ठिनां वृन्देन दृष्ट्वा सङ्गृहीतः, ततः समादाय स्वपार्श्वे रक्षित इत्यर्थः ॥२५६॥ ततस्तैः स त्वत्पुत्रः उम्बरराज इनि नाम्ना निजप्रभुः - स्वस्वामी विहितः-कृतः, कीदृशः सः ?-लब्धः-प्राप्तो लोके सन्मानः - सत्कारो येन स तथोक्तः, सम्प्रति-अधुना त्वत्पुत्रो मालवनरपतेः-मालवदेशराजस्य या पुत्री मदनसुन्दरी तस्याः प्राणप्रियो-भर्त्ता जातोऽस्ति ॥२५७॥ स तव पुत्रो राजसुताया-नृपपुत्र्या मदनसुन्दर्य्या वचनेन गुरूपदिष्टं श्रीसिद्धवरचक्रं सम्यक् आराध्य कनकेन-सुवर्णेन समः -तुल्यः कायः- शरीरो यस्य स तथोक्तः स्वर्णवर्णदेहः सञ्जातोऽस्ति ॥२५८॥ स च त्वत्पुत्रो गृहिण्या-निजस्त्रिया समन्वितो-युक्तः सन् अधुना उज्जयिन्यामवतिष्ठते, कीदृशः सः ?-साधर्मिकैः पूरितो विभवः-स्वर्ण्णादिद्रव्यं यस्य स तथोक्त ः, पुनः कीदृश ः? सुष्ठु- शोभनानि यानि धर्म्मकर्म्माणि पराणि-तानि प्रधानानि यस्य सः, पुनः सुखं जातमस्येति सुखितः ॥२५९॥

For Private and Personal Use Only

तं सोऊणं हरिसिअ-चित्ताऽहं वच्छ ! इत्थ संपत्ता । दिट्ठोसि वहूसहिओ, जुण्हाइ ससिव्व कयहरिसो ॥२६०॥
ता वच्छ ! तुमं वहुया-सहिओ जय जीव नंद चिरकालं । एसुच्चिअ जिणधम्मो, जावज्जीवं च मह सरणं
जिणरायपायपउमं, नमिऊणं वंदिऊण सुगुरुं च । तिन्निवि करंति धम्मं, सम्मं जिणधम्मविहिनिउणा ॥२६२॥
ते अन्नदिणे जिणवर-पूअं काऊण अंगअग्गमयं । भावच्चयं करंता, देवे वंदंति उवउत्ता ॥२६३॥

तद्-गुरुवचः श्रुत्वा हे वत्स ! अहं हर्षितचित्ता सती अत्र सम्प्राप्ता, 'हर्षितं चित्तं यस्याः सेति समासः', अधुना वध्वा सहितस्त्वं दृष्टोऽसि, कया सहितः क इव ? -ज्योत्नया-चन्द्रिकया सहितः शशी-चन्द्र इव, अत्र कुमारस्य चन्द्रेणौपम्यं वध्वास्तु ज्योत्नयेति,कीदृशस्त्वं ? -कृतो हर्षो येन स तथोक्तः ॥२६०॥ तस्माद् हे वत्स ! त्वं वध्वा सहितश्चिरकालं-बहुकालं यावत् जय-सर्वोत्कर्षेण वर्त्तस्व, पुनः चिरकालं जीव-आयुष्यमान् भव, पुनः चिरं नन्द-समृद्धिमान् भव, च - पुनः एष एव जिनधर्म्मो यावज्जीवं मम शरणमस्ति ॥२६१॥ ततस्ते त्रयोऽपि-जननीपुत्रवधूलक्षणा जीवा जिनराजस्य - जिनेन्द्रदेवस्य पादपद्मं-चरणकमलं नत्वा च - पुनः सुगुरुं वन्दित्वा सम्यग् धर्मं कुर्वन्ति, कीदृशास्त्रयः? - जिनधर्मविधौ निपुणाः-चतुराः ॥२६२॥ ते त्रयोऽपि अन्यस्मिन् दिने अङ्गाऽग्रमयीं जिनवरस्य पूजां कृत्वा, एतावता भगवतोऽङ्गपूजामग्रपूजां च विधाय, भावार्च्चां-भावपूजां कुर्वन्तः उपयुक्ताः सन्तो देवान् वन्दन्ते, अङ्गाग्रे प्रधाने अस्यामिति विग्रहः ॥२६३॥

इओ य- धूयादुहेण सा रूप्पसुन्दरी रूसिऊण सह रन्ना । निअभायपुण्णपालस्स, मंदिरे अच्छइ ससोया ॥२६४॥
वीसारिऊण सोअं, सणिअं सणिअं जिणुत्तवयणेहिं । जग्गिअचित्तविवेआ, समागया चेइयहरंमि ॥२६५॥
जा पिक्खइ सा पुरओ, तं कुमरं देववंदणापउणं । निउणं निरुवमरूवं, पच्चक्खं सुरकुमारंव ॥२६६॥
तप्पुट्ठीइ ठिआओ, जणणीजायाउ ताव तस्सेव । दट्ठूण रूप्पसुंदरि, राणी चिंतेइ चित्तंमि ॥२६७॥
ही एसा का लहुया, वहुया दीसइ मज्झ पुत्तिसमा । जाव निउणं निरिक्खइ, उवलक्खइ ताव तं मयणं ॥२६८॥

इतश्च- पुत्रीदुःखेन सा-रूप्यसुन्दरी राज्ञी राज्ञा सह रुषित्वा-रोषं कृत्वा निजभ्रातुः पुण्यपालस्य मन्दिरे सह शोकेन वर्त्तते इति सशोका सती अवतिष्ठते ॥२६४॥ सा रूप्यसुन्दरी शनैः शनैः शोकं विस्मार्य-निराकृत्य जिनोक्तवचनैः जागरितश्चित्ते विवेको यस्याः सा एवंविधा सती चैत्यगृहे-जिनमन्दिरे समागता ॥२६५॥ सा रूप्यसुन्दरी यावत् पुरतः-अग्रतस्तं कुमारं प्रेक्षते-पश्यति, कीदृशं तं ? -देववन्दनायां प्रगुणं-लग्नं पुनर्निपुणं-चतुरं पुनः प्रत्यक्षं सुरकुमारमिव निरुपमम्-उपमावर्जितं रूपमाकृतिः सौन्दर्यं च यस्य स तम् ॥२६६॥ तावत्तस्य-कुमारस्य पृष्ठतः स्थिते तस्यैव कुमारस्य जननीजाये मातृस्त्रियौ दृष्ट्वा रूप्यसुन्दरी राज्ञी चित्ते चिन्तयति ॥२६७॥ किं चिन्तयतीत्याह, हीति वितर्के, एषा मम पुत्रीतुल्या लघ्वी वधूश्च का दृश्यते, ? इति विचिन्त्य यावत् निपुणं-सोपयोगं निरीक्ष्यते तावत्तां वधूं-मदनसुन्दरीम् उपलक्षते-जानातीत्यर्थः ॥२६८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नूणं मयणा एसा, लग्गा एयस्स कस्सवि नरस्स । पुट्टीइ कुट्ठिअं तं, मुत्तूणं चत्तसइमग्गा ॥२६९॥
मयणा जिणमयनिउणा, संभाविज्जइ न एरिसं तीए ॥ भवनाडयंमि अहवा, ही ही किं किं न संभवइ ? ॥२७०॥
विहिअं कुले कलंकं, आणीअं दूसणं च जिणधम्मे । जीए तीइ सुयाए, न मुयाए तारिसं दुक्खं ॥ २७१ ॥
जारिसमेरिसअसमंजसेण चरिएण जीवयंतीए । जायं मज्झ इमीए, धूयाइ कलंकभूयाए ॥२७२॥
एवं चिंतंती रूप्पसुंदरी दुक्खपूरपडिपुण्णा । कस्र्णसरं रोयंती, भणेइ एयारिसं वयणं ॥२७३॥

ततः पुनरेवं चिन्तयति, नूनं-निश्चयेन एषा मदनसुन्दरी मत्पुत्री तं कुष्ठिनं पुरुषं मुक्त्वा-परिहृत्य त्यक्तः सतीमार्गो यया सा एवंविधा सती एतस्य कस्याऽपि नरस्य पृष्ठे लग्ना ज्ञायते इति शेषः ॥२६९॥ मदनसुन्दरी जिनमते निपुणा वर्तते, तया एतादृशमकार्यकरणं न सम्भाव्यते,अथवा हीहीति अतिखेदे, भवनाटके-संसारनाटके किं किं न सम्भवति? सर्वमपि सम्भवति इत्यर्थः ॥२७०॥ यया कुले कलङ्कमानीतं च-पुनः जिनधर्म्मे दूषणमानीतं तया सुतया -पुत्र्या मृतया तादृशं दुःखं न भवेत् ॥२७१॥ यादृशं दुःखमीदृशेन असमंजसेन-अयोग्येन चरितेन-आचरणेन अनया कलङ्कभूतया पुत्र्या जीवन्त्या मम जातं-समुत्पन्नम् ॥२७२॥ एवममुना प्रकारेण चिन्तयन्ती, दुःखपूरेण प्रतिपूर्णा-भृता रूप्यसुन्दरी राज्ञी कस्र्णो-दीनः स्वरो यत्र कर्मणि तत् कस्र्णस्वरं यथा स्यात्तथा रुदती एतादृशं वचनं भणति ॥२७३॥

For Private and Personal Use Only

धिद्धी अहो अकज्जं, निवडउ वज्जं च मज्झ कुच्छीए । जत्थुप्पन्नावि वियक्खणावि ही एरिसं कुणइ ॥२७४॥
तं सोऊणं मयणा, जा पिक्खइ रूप्पसुंदरीजणणिं । रुयमाणिं ता नाओ, तीए जणणीअभिप्पाओ ॥ २७५॥
चिअवंदणं समग्गं, काऊणं मयणसुंदरी जणणिं । करवंदणेण वंदिअ, विअसिअवयणा भणइ एवं ॥२७६॥
अम्मो ! हरिसट्ठाणे, कीस विसाओ विहिज्जए एवं ? । जं एसो नीरोगो, जाओ जामाउओ तुम्हं ॥२७७॥

अहो इत्याश्चर्ये, एतत्कार्यं (? एतदकार्यं) धिग् धिग् अस्तु, च - पुनः मम कुक्षौ-उदरे वज्रं निपततु,यत्र-यस्मिन्कुक्षौ उत्पन्नाऽपि पुनर्विचक्षणाऽपि हीति खेदे ईदृशमकार्यं करोति ॥२७४॥ तद्वचनं श्रुत्वा मदनसुन्दरी यावत् रूप्यसुन्दरीजननीं - निजमातरं रुदन्तीं प्रेक्षते-विलोकयति तावत्तया-मदनसुन्दर्या जनन्या अभिप्रायो-मनोगतो वितर्को ज्ञातः ॥२७५॥ ततो मदनसुन्दरी समग्रां-सम्पूर्णां चैत्यवन्दनां कृत्वा जननीं-स्वमातरं कराभ्यां-हस्ताभ्यां यद्वन्दनं-नमस्कारस्तेन वन्दित्वा-नमस्कृत्य विकसितं-विकस्वरं वदनं-मुखं यस्याः सा एवंविधा सती एवं-वक्ष्यमाणं भणति ॥२७६॥ तथाहि- हे अम्ब ! - हे मातः ! हर्षस्थाने एवं विषादो-विषण्णता कथं विधीयते-कथं क्रियते ?, यद्-यस्मात् कारणात् एषः युष्माकं जामाता नीरोगो-रोगरहितो जातोऽस्ति, अतोऽत्र हर्षो युक्त इति भावः ॥ २७७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्नं च जं वियप्पह, तं जइ पुव्वाइ पच्छिमदिसाए । उग्गमइ कहवि भाणू, तहवि न एयं नियसुयाए ॥२७८॥
कुमरजणणीवि जंपइ, सुंदरि ! मा कुणसु एरिसं चित्ते । तुज्झ सुआइ पभावा, मज्झ सुओ सुंदरो जाओ ॥२७९॥
धन्नासि तुमं जीए, कुच्छीए, इत्थिरयणमुप्पन्नं । एरिसमसरिससीलप्पभावचिंतामणिसरिच्छं ॥२८०॥
हरिसवसेणं सा रुप्पसुंदरी पुच्छए किमेअंति ? । मयणावि सुविहिनिउणा, पभणइ एआरिसं वयणं ॥२८१॥

यत्पुनरन्यत् अकार्याचरणलक्षणं यूयं विकल्पयत- विचिन्तयत तदेतद्यदि पूर्वस्य दिशः सकाशात् पश्चिमदिशायां कथमपि भानुः-सूर्यः उद्गच्छति, तथापि निजसुतायाः सकाशान्नैतत् (सं)भवेत् ॥२७८॥ तदा कुमारस्य जनन्यपि जल्पति, हे सुन्दरि ! त्वं स्वकीये चित्ते ईदृशं विकल्पं मा कुरुष्व, यतस्तव सुतायाः प्रभावात् मम सुत एतादृक् सुन्दरो जातोऽस्ति॥ २७९॥ हे सुन्दरि ! त्वं धन्याऽसि यस्याः कुक्षौ ईदृशं स्त्रीरत्नमुत्पन्नं, कीदृशम् ? इत्याह- असदृशम्-अनुपमं यच्छीलं-ब्रह्मचर्यं तस्य प्रभावेण चिन्तामणिसदृशम्-चिन्तामणिरत्नतुल्यम् ॥२८०॥ एतत् श्रुत्वा सा रूप्यसुन्दरीराज्ञी हर्षवशेन कुमारमातरमिति पृच्छति, किमेतत् ? - कथमेष वृत्तान्त इत्यर्थः, तदा सुष्ठु निपुणा मदनसुन्दर्यपि एतादृशं वचनं प्रभणति-प्रकर्षेण कथयति ॥२८१॥

For Private and Personal Use Only

चेइअहरंमि वत्तालावंमि कए निसीहिआभंगो । होइ तओ मह गेहे,वच्चह साहेमिमं सव्वं ॥२८२॥
तत्तो गंतूण गिहं,मयणाए साहिओ समग्गोवि । सिरिसिद्धचक्कमाहप्पसंजुओ निययवुत्तंतो ॥२८३॥
तं सोऊणं तुट्ठा, रुप्पा पुच्छेइ कुमरजणणिंपि । वंसुप्पत्तिं तुह नंदणस्स सहि! सोउमिच्छामि ॥२८४॥
पभणेइ कुमरमाया, अंगादेसंमि अत्थि सुपसिद्धा । वेरिहिं कयअकंपा, चंपानामेण वरनयरी ॥२८५॥

कीदृशमित्याह- चैत्यगृहे-जिनालये वार्त्तालापे कृते सति नैषेधिकीभङ्गो भवति, ततः-तस्मात् कारणात् यूयं मम गृहे व्रजत येन इमं सर्वं वृत्तान्तं कथयामि ॥२८२॥ ततो गृहं गत्वा मदनसुन्दर्या समग्रोऽपि निजकवृत्तान्तः कथितः, कीदृशो वृत्तान्तः ? -श्रीसिद्धचक्रस्य यन्माहात्म्यं तेन संयुतो-युक्तः ॥२८३॥ तं-निजजामातुर्वृत्तान्तं श्रुत्वा तुष्टा सती रूप्यसुन्दरी कुमारजननीमपि पृच्छति, कथमित्याह- हे सखि- हे सम्बन्धिनि ! तव नन्दनस्य-पुत्रस्य वंशोत्पत्तिं श्रोतुमिच्छामि, कस्मिन्वंशे उत्पत्तिः-वंशोत्पत्तिस्ताम् ॥२८४॥ अथ कुमारस्य माता प्रभणति, अङ्गाख्ये देशे सुतराम्-अतिशयेन प्रसिद्धा चम्पानाम्नी वरा-प्रकृष्टा नगरी अस्ति, कीदृशी सा ? -वैरिभिः कृतोऽकम्पो यस्याः सा, शत्रुभिरकृतकम्पेत्यर्थः ॥२८५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्थ य अरिकरिसीहो, सीहरहो नाम नरवरो अत्थि । तस्स पिया कमलपहा, कुंकुणनरनाहलहुभइणी ॥२८६॥
तीए अपुत्तिआए, चिरेण वरसुविणसूइओ पुत्तो । जाओ जणिआणंदो, वद्धावणयं च कारवियं ॥२८७॥
पभणेइ तओ राया, अम्हमणाहाइ रायलच्छीए । पालणखमो इमो ता, हवेउ नामेण सिरिपालो ॥२८८॥
सो सिरिपालो बालो, जाओ जा वरिसजुयलपरियाओ । ता नरनाहो सूलेण, झत्ति पंचत्तमणुपत्तो ॥२८९॥

तत्र च नगर्यां अरयो-वैरिण एव करिणो-गजास्तेषु सिंह इव ईदृशः सिंहरथो नाम नरवरो -राजाऽस्ति, सामान्यतोऽयं वर्त्तमाननिर्देशस्ततश्च आसीदित्यर्थः, तस्य राज्ञः कमलप्रभा प्रिया-भार्याऽस्ति, कीदृशी सा ? कुंकुणनरनाथस्य-कुङ्कुणदेशस्वामिनो राज्ञो लघुभगिनी-लघ्वी स्वसा ॥२८६॥ न विद्यते पुत्रो यस्याः साऽपुत्रिका तस्या अपुत्रिकायाः अस्या राज्याश्चिरेण-बहुकालेन वरस्वप्नसूचितः पुत्रो जातः, कीदृशः पुत्रो ?-जनित -उत्पादित आनन्दो येन सः च - पुनर्वर्द्धापनकं कारितम् ॥२८७॥ ततो राजा प्रभणति,-अस्माकमनाथाया लक्ष्म्याः पालने क्षमः -समर्थोऽयमस्ति, तस्मात्कारणात् नाम्नाऽयं श्रीपालो भवतु, एतावता तस्य बालस्य श्रीपाल इति नाम स्थापितम् ॥२८८॥ श्रीपालो बालो यावद्वर्षयुगलपर्यायो-वर्षद्वयमितावस्थो जातस्तावत्तत्पिता सिंहरथो नाम नरनाथो-राजा शूलेन-शूलरोगेण झटिति-शीघ्रं पञ्चत्वं-मरणं प्राप्तः ॥२८९॥

For Private and Personal Use Only

कमलप्पभा रुयंती, मइसायरमंतिणा निवारित्ता । धाईउच्छंगठिओ, सिरिपालो थापिओ रज्जे ॥२९०॥
जं बालस्सवि सिरिपालनामरन्नो पवत्तिआ आणा । सव्वत्थवि तो पच्छा, निवमियकिच्चंपि कारवियं ॥२९१॥
बालोवि महीपालो, रज्जं पालेइ मंतिसुत्तेणं । मंतीहिं सव्वत्थवि, रज्जं रक्खिज्जए लोए ॥२९२॥
कइवयदिणपज्जंते, बालयपित्तिज्जओ अजिअसेणो । परिगहभेअं काउं, मंतइ निवमंतिवहणत्थं ॥२९३॥
तं जाणिऊण मंती, कहिउं कमलप्पभाइ सव्वंपि । विन्नवइ देवि ! जह तह, रक्खिज्जसु नंदणं निययं ॥२९४॥

तदा रुदती - अश्रुपातं कुर्वती कमलप्रभा राज्ञी मतिसागरमन्त्रिणा निवार्य-निषेध्य धात्र्या उत्सङ्गे-अङ्के स्थितः श्रीपालो बालो राज्ये स्थापितः ॥२९०॥ यद्-यतो बालस्यापि श्रीपालनाम्नो राज्ञ आज्ञा सर्वत्राऽपि प्रवर्तिता,नृपमृतककृत्यं - नृपस्य मृतकार्यमपि ततः पश्चात्कारितम् ॥२९१॥ बालोऽपि महीपालो राजा मन्त्रिसूत्रेण-मन्त्रिणः- अमात्यस्य व्यवस्थया राज्यं पालयति, युक्तोऽयमर्थः, यतः सर्वत्र लोके राज्यं मन्त्रिभिः रक्ष्यते,'मन्त्रिहीनो भवेद्राजा तस्य राज्यं विनश्यती' तिवचनात् ॥२९२॥ कतिपयदिनपर्यन्ते-कियद्दिनानन्तरं बालकस्य-श्रीपालस्य पितृव्यः-पितुर्भ्राताऽजितसेनो राजा परिग्रहस्य-परिकरस्य भेदं कृत्वा नृपमन्त्रिणोर्वधार्थं मंत्रयते-आलोचयति ॥२९३॥ मन्त्री तन्मन्त्रणं ज्ञात्वा कमलप्रभायै सर्वमपि वृत्तान्तं कथयित्वा विज्ञपयति, हे देवि ! यथा तथा-येन तेन प्रकारेण निजकं-स्वकीयं नन्दनं पुत्रं रक्षस्व-पुत्ररक्षां कुरु इत्यर्थः ॥२९४॥

जीवंतेण सुएणं, होही रज्जं पुणोवि निब्भंतं । ता गच्छ इमं घित्तुं, कत्थवि अहयंपि नासिस्सं ॥२९५॥
तत्तो कमला घित्तूण, नंदणं निग्गया निसिमुहंमि । मा होउ मंतभेओ-त्ति सव्वहा चत्तपरिवारा ॥२९६॥
निवभज्जा सुकुमाला, वहियव्वो नंदणो निसा कसिणा । चंकमणं चरणेहिं, ही ही विहिविलसियं विसमं ॥ २९७॥
पिअमरणं रज्जसिरीनासो एगागिणित्तमरितासो । रयणीवि विहायंती, हा संपइ कत्थ वच्चिस्सं ? ॥२९८॥

सुतेन जीवता सता राज्यं पुनरपि निर्भ्रान्तं-निःसन्देहं भविष्यति, तत्-तस्मात् इमं बालं गृहीत्वा त्वं कुत्राऽपि गच्छ, अहकमपि-अहमपि नशिष्यामि-पलायिष्ये ॥२९५॥ ततः-तदनन्तरं कमलप्रभाराज्ञी नन्दनं-पुत्रं गृहीत्वा निशामुखे-सन्ध्यायां निर्गता, कीदृशी सा ? -मन्त्रस्य-मन्त्रणस्य भेदो मा भवतु इतिहेतोः सर्वथा त्यक्तः परिवारो दास्यादिको यया सा, एकाकिनीत्यर्थः ॥२९६॥ नृपस्य-राज्ञो भार्याऽत एव सुकुमाला, पुनः नन्दनः - पुत्रः कट्यां वोढव्यो-वहनीयस्तथा निशा-रात्रिः कृष्णा पुनश्चरणाभ्यां-पादाभ्यां चङ्क्रमणं-गमनं रथाद्यभावात्, एतावत्य आपदो युगपत् प्राप्ताः, हीहीति अतिखेदे, विधेः - दैवस्य विलसितं विषमं विद्यते ॥२९७॥ अथ मार्गे कमलप्रभा इति चिन्तयति, प्रियस्य - भर्त्तुर्मरणं, राज्यश्रियो-राज्यलक्ष्म्या नाशः, एकाकिनीत्वं, पुनः अरेः—वैरिणस्त्रासः, रजनी-रात्रिरपि विभातं कुर्वती-प्रभातरूपा भवन्ती, दृश्यत इत्यर्थः, हा इति खेदे, सम्प्रति कुत्र व्रजिष्यामि-क्व गमिष्यामि ? ॥ २९८॥

इच्चाइ चिंतयंती, जा वच्चइ अग्गओ पभायंमि । ता फिट्टाए मिलियं,कुट्ठियनरपेडयं एगं ॥२९९॥
तं दट्ठूणं कमला, निरुवमरूवा महग्घआहरणा । अबला बालिक्कसुआ, भयकंपिरतणुलया रुयइ ॥३००॥
तं रुयमाणिं दट्ठुं, पेडयपुरिसा भणंति करुणाए । भद्दे ! कहेसु अम्हं, काऽसि तुमं कीस बीहेसि ॥३०१॥
तीए निअबंधूण व, कहिओ सव्वोऽवि निययवुत्तंतो । तेहिं च सा सभइणिव्व सम्ममासासिआ एवं ॥३०२॥

इत्यादि चिन्तयन्ती यावत् अग्रतो व्रजति तावत् प्रभाते-प्रभातसमये एषां कुष्ठिकनराणां पेटकं-वृन्दं'फिट्टाए'त्ति अपर्यालोचनया मिलितम् ॥२९९॥ तं-कुष्ठिकनरवृन्दं दृष्ट्वा भयेन कम्प्रा-कम्पनशीला तनुलता-देहयष्टिर्यस्याः सा एवंविधा सती कमलप्रभा रोदिति, कीदृशी सा ? -निरुपमं-अद्भुतं रूपं यस्याः सा निरुपमरूपा, पुनः कीदृशी ? - महार्घाणि -बहुमुल्यानि आभरणानि-आभूषणानि यस्याः सा, पुनः अबला-न विद्यते बलं यस्याः सा, स्त्रीत्वादल्पबलेत्यर्थः, पुनर्बालः - शिशुः एकः सुतो यस्याः सा तथोक्ता ॥३००॥ तदा पेटकपुरुषाः-कुष्ठिवृन्दमनुष्यास्तां राज्ञीं रुदतीं दृष्ट्वा करुणया - अनुकम्पया भणन्ति, किं भणन्तीत्याह- हे भद्रे ! त्वमस्मभ्यं कथय त्वं काऽसि? तथा कथं बिभेषि-भयं प्राप्नोषि? ॥३०१॥ ततस्तया राज्ञया निजबन्धुभ्यो-निजभ्रातृभ्य इव सर्वोऽपि निजकवृन्तान्तः कथितः, तेभ्य इति शेषः, तैश्च सा राज्ञी स्वभगिनी इव - निजस्वसा इव एवं-वक्ष्यमाणप्रकारेण सम्यग् आश्वासिता ॥३०२॥

मा कस्सवि कुणसु भयं, अम्हे सव्वे सहोअरा तुज्झ । एयाइ वेसरीए, आरूढा चलसु वीसत्था ॥३०३॥
तत्तो जा सा वरवेसरीए चडिआ पडेण पिहिअंगी । पेडयमज्झंमि ठिया, नियपुत्तजुआ सुहं वयइ ॥३०४॥
ता पत्ता वेरिभडा, उब्भडसत्थेहिं भीसणायारा । पुच्छंति पेडयं भो, दिट्ठा किं राणिआ एगा ? ॥३०५॥
पेडयपुरिसेहिं तओ, भणिअं भो अत्थि अम्ह सत्थंमि । रउताणियावि नूनं,जइ कज्जं ता पगिण्हेह ॥३०६॥
एगेण भडेण तओ, नायं भणिअं च दिंति मे पामं । सव्वं दिज्जइ संतं, तो कुट्ठभएण ते नट्ठा ॥३०७॥

कथमित्याह- हे भगिनि! त्वं कस्यापि भयं मा कुरुस्व, यतो वयं सर्वे तव सहोदरा-भ्रातरः स्म, एतस्यां वेसर्याम्-अश्वतर्याम् आरूढा विश्वस्ता सती चल-व्रज ॥३०३॥ ततः-तदनन्तरं या कमलप्रभाराज्ञी सा वरवेसर्य्यां चटिता-आरूढा पुनः पटेन - वस्त्रेण पिहितम्-आच्छादितमङ्गं यस्याः सा तथोक्ता, पुनः पेटकस्य-कुष्ठिवृन्दस्य मध्ये स्थिता एवंविधा सती निजपुत्रेण युता सुखं व्रजति-गच्छति ॥३०४॥ तावद् वैरिणः-अजितसेनस्य भटाः प्राप्ताः सन्तः कुष्ठिकवृन्दं पृच्छन्ति, भो भवद्भिः किमेका राज्ञी दृष्टा?, कीदृशा भटाः ?-उद्भटशस्त्रैः-उद्धृतप्रहरणैर्भीषणः-भयङ्कर आकारो येषां ते तथोक्ताः ॥३०५॥ ततः तदनन्तरं कुष्ठिपेटकपुरुषैर्भणितं- भो भटाः ! अस्माकं सार्थे नूनं-निश्चितं 'रउताणिअ'त्ति पामाप्यस्ति, आस्तां राज्ञीत्यपिशब्दार्थः, यदि युष्माकं पामया सह कार्यं तत्तर्हि प्रकर्षेण गृह्णीत यूयम्॥३०६॥ तत एकेन भटेन ज्ञातं भणितं च- अहो ! इमे कुष्ठिकनराः पामां ददति, युक्तं चैतत्, यतः सर्वं सद्-विद्यमानं दीयते,ततः कुष्ठभयेन ते सर्वेऽपि भटा नष्टाः-पलायिताः॥३०७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेहिं गएहिं कमला,कमेण पत्ता सुहेण उज्जेणिं । तत्थ ठिआ य सपुत्ता,पेडयमन्नत्थ संपत्तं ॥३०८॥
भूसणधणेण तणओ, जा विहिओ तीइ जुव्वणाभिमुहो । ता कम्मदोसवसओ, उंबररोगेण सो गहिओ ॥३०९॥
बहुएहिंपि कएहिं, उवयारेहिं गुणो न से जाओ । कमलप्पहा अदन्ना, जणं जणं पुच्छए ताव ॥३१०॥
केणवि कहिअं तीसे, कोसंबीए समत्थि वरविज्जो । जो अट्ठारसजाई, कुट्ठस्स हरेइ निब्भंतं ॥३११॥

अत्र सप्तम्यर्थे तृतीया, ततश्चायमर्थः- तेषु भटेषु गतेषु सत्सु कमलप्रभा राज्ञी क्रमेण उज्जयिनीं नगरीं सुखेन प्राप्ता, च - पुनः सपुत्रा-पुत्रसहिता तत्रोज्जयिन्यां स्थिता ॥३०८॥ ततस्तया राज्या तनयः-स्वपुत्रो भूषणधनेन-विक्रीतस्वाभरणद्रव्येण यावत् यौवनाभिमुखो विहितः-कृतः, यौवनावस्थां प्रापित इत्यर्थः, तावत्कर्मदोषवशतः-प्राक्कृतकर्मदोषवशात् स बालः उम्बररोगेण-कुष्ठविशेषेण गृहीतः ॥३०९॥ बहुभिरपि उपचारैः-प्रतिकारैः कृतैस्तस्य गुणो न जातः तदा कमलप्रभाराज्ञी 'अदन्न'त्ति अधीरा सती जनं जनं रोगनिर्गमनोपायं पृच्छति ॥३१०॥ तावत् केनापि पुरुषेण तस्याः कथितं-तस्यै उक्तमित्यर्थः, किं कथितमित्याह- कौशाम्ब्यां नगर्यां वरवैद्यः-प्रधानवैद्यः समस्ति,यो वैद्यः कुष्ठस्य अष्टादश जातीर्निर्भ्रान्तं निस्सन्देहं हरति-दूरीकरोति ॥३११॥

For Private and Personal Use Only

कमला पुत्तं पाडोसिआण सम्मं भलाविऊण सयं । विज्जस्स आणणत्थं, पत्ता कोसंबिनयरीए ॥ ३१२॥
तं विज्जं तित्थगयं, पडिक्खमाणी चिरं ठिआ तत्थ । मुणिवयणाओ मुणिऊण पुत्तसुद्धिं इहं पत्ता ॥३१३॥
साऽहं कमला सो एस मज्झ पुत्तुत्तमो (त्थि) सिरिपालो । जाओ तुज्झ सुयाए, नाहो सव्वत्थ विक्खाओ ॥
सीहरहरायजायं, नाउं जामाउअं तओ रुप्पा । साणंदं अभिणंदइ, संसइ पुन्नं च धूयाए ॥३१५॥
गंतूण गिहं रुप्पा, कहेइ तं भायपुण्णपालस्स । सोऽवि सहरिसो कुमरं, सकुडुंबं नेइ नियगेहं ॥३१६॥

तदा कमलप्रभा स्वपुत्रं प्रातिवेश्मिकजनानां सम्यक् भालयित्वा-समर्प्य स्वयम्-आत्मना वैद्यस्य आनयनार्थं कौशाम्ब्यां नगर्यां प्राप्ता ॥३१२॥ तीर्थगतं-यात्रानिमित्तं तीर्थेषु गतं तं वैद्यं प्रतीक्षमाणा सा-कमलप्रभा तत्र-कौशाम्ब्यां चिरं-बहुकालं स्थिता, पश्चान्मुनिवचनात् पुत्रस्य शुद्धिं मुणित्वा-ज्ञात्वा इह प्राप्ता ।३१३॥ सा कमलप्रभाऽहमस्मि, स एष मम पुत्रोत्तमः श्रीपालोऽस्ति यस्तव सुतायाः-पुत्र्या नाथो-भर्त्ता जातः, पुनः सर्वत्र लोके विख्यातः- प्रसिद्धो जातः ॥३१४॥ ततः-तदनन्तरं 'रुप्प'त्ति रूप्यसुन्दरीराज्ञी सिंहरथराजस्य जातं-पुत्रं जामातरं ज्ञात्वा सानन्दं यथा स्यात्तथा अभिनन्दति-अनुमोदते, च - पुनः स्वपुत्र्याः पुण्यं शंसति-प्रशंसति ॥३१५॥ ततो रूप्यसुन्दरी गृहं गत्वा स्वभ्रातुः पुण्यपालस्याग्रे तं वृत्तान्तं कथयति, तदा स पुण्यपालोऽपि सहर्षः सन् सकुटुम्बं-मात्रादिकुटुम्बसहितं कुमारं निजगेहं नयति-प्रापयति ॥३१६॥

अप्पेइ वरावासं, पूरइ धणधन्नकंचणाईयं । तत्थऽच्छइ सिरिवालो, दोगुंदुगदेवलीलाए ॥३१७॥
अन्नदिणे तस्सावासपाससेरीइ निग्गओ राया । पिक्खइ गवक्खसंठिअकुमरं मयणाइ संजुत्तं ॥३१८॥
तो सहसा नरनाहो, मयणं दट्ठूण चिंतए एवं । मयणाइ मयणवसगाइ महकुलं मइलियं नूणं ॥३१९॥
इक्कं मए अजुत्तं, कोवंधेणं तया कयं बीअं । कामंधाइ इमीए, विहियं ही ही अजुत्तयरं ॥३२०॥

वरवासम्-अवस्थानार्थं प्रधानमन्दिरम् अर्पयति-ददाति, तथा धनधान्यकाञ्चनादिकं पूरयति, श्रीपालस्तत्रावासे दोगुंदुकानां-त्रायस्त्रिंशकानां देवानां लीलयाऽवतिष्ठते ॥३१७॥ अन्यस्मिन् दिने तस्य-श्रीपालस्य य आवासस्तस्य पार्श्वे या सेरी-मार्गविशेषस्तस्यां राजा निर्गतः, तत्र च मदनसुन्दर्या संयुक्तं गवाक्षे सं-सम्यक् प्रकारेण स्थितं कुमारं-श्रीपालं प्रेक्षते - पश्यति स्म, सेरीति देशीशब्दोऽयम् ॥३१८॥ ततः-तदनन्तरं नरनाथो-राजा प्रजापालः सहसा-अकस्मात् मदनसुन्दरीं दृष्ट्वा एवं-वक्ष्यमाणप्रकारेण चिन्तयति, मदनस्य-कामस्य वशं गच्छतीति मदनवशगा, तया मदनसुन्दर्या नूनं-निश्चितं मम कुलं मलिनीकृतम् ॥३१९॥ तदा-तस्मिन्नवसरे एकं तु मया कोपान्धेन सता अयुक्तं कृतं यत्कुष्ठिने स्वपुत्री दत्ता, द्वितीयं पुनः अनया कामान्धया सत्या, हीहीति खेदेऽयुक्ततरम्-अतिशयेनायुक्तं विहितं-कृतं, यत् स्वपतिं त्यक्त्वाऽन्यपतिः स्वीकृतः ॥३२०॥

एवं जायविसायस्स तस्स रन्नो सुपुण्णपालेण । विन्नत्तं तं सव्वं, धूयाचरिअं सअच्छरिअं ॥३२१॥
तं सोऊणं राया, विम्हिअचित्तो गओ तमावासं । पणओ य कुमारेणं, मयणासहिएण विणएणं ॥३२२॥
लज्जाऽऽणओ नरिंदो,पभणइ धिद्धी ममं गयविवेअं । जं दप्पसप्पविसमुच्छिएण कयमेरिसमकज्जं ॥३२३॥
वच्छे ! धन्नाऽसि तुमं, कयपुन्ना तंसि तंसि सविवेआ । तं चेव मुणियतत्ता, जीए एयारिसं सत्तं ॥३२४॥

एवमुक्तप्रकारेण जात-उत्पन्नो विषादो यस्य तथा तस्य राज्ञोऽग्रे सुष्ठु-शोभनेन पुण्यपालेन तत् सर्वं पुत्रीचरितं विज्ञप्तं, कीदृशं चरितम् ? - आश्चर्येण सह वर्त्तते इति साश्चर्यम् ॥३२१॥ तत्पुत्रीचरित्रं श्रुत्वा राजा विस्मितम् - आश्चर्यं प्राप्तं चित्तं यस्य स तादृशः सन् तमावासं-मन्दिरं गतः, मदनासहितेन श्रीपालकुमारेण विनयेन प्रणतो-नमस्कृतश्च ॥३२२॥ लज्जया आनतो-नम्रः सन् नरेन्द्रो-राजा प्रभणति-वदति, गतो विवेको यस्य स तथा तं निर्विवेकं मां धिक् धिक्, यद् -यस्मात्कारणात् दर्पः-अभिमानः स एव सर्प्पस्तस्य यद्विषं-स्तब्धतालक्षणं तेन मूर्च्छितेन मया ईदृशमकार्यं कृतम् ॥३२३॥ हे वत्से- हे पुत्रि ! त्वं धन्याऽसि, त्वं कृतपुण्याऽसि, पुनः त्वं सह विवेकेन वर्तते इति सविवेकाऽसि, तथा मुणितं-ज्ञातं तत्त्वं यया सा ईदृशी त्वमेवासि यस्या एतादृक् सत्त्वं - धैर्यम् ॥३२४॥

For Private and Personal Use Only

उद्धरिअं मज्झ कुलं, उद्धरिया जीइ नियंयजणणीवि । उद्धरिओ जिणधम्मो, सा धन्ना तंसि परमिक्का ॥३२५॥
अन्नाणतमंधेणं, दुद्धरऽहंकारगयविवेगेणं । जो अवराहो तइआ,कओ मए तं खमसु वच्छे ! ॥३२६॥
विणओणया य मयणा, भणेइ मा ताय ! कुणसु मणखेयं । एयं मह कम्मवसेण चेव सव्वंपि संजायं ॥३२७॥
नो देइ कोइ कस्सवि, सुक्खं दुक्खं च निच्छओ एसो । निअयं चेव समज्जिअमुवभुञ्जइ जंतुणा कम्मं ॥३२८॥
मा वहउ कोइ गव्वं, जं किर कज्जं मए कयं होइ । सुरवरकयंपि कज्जं, कम्मवसा होइ विवरीअं ॥३२९॥

हे पुत्रि ! यया मम कुलमुद्धृतं, पुनः यया निजका स्वकीया जननी-माताऽप्युद्धृता, तथा जिनधर्म्म उद्धृतः-शोभां प्रापितः सा त्वमेका परं-केवलं धन्याऽसि ॥३२५॥ हे वत्से ! अज्ञानमेव तमः-अन्धकारं तेन योऽन्धः (अज्ञानतमोऽन्धः) तेन, पुनः दुर्द्धरो योऽहङ्कारस्तेन गतो विवेको यस्य स तेन एवंविधेन मया तदा यः अपराधः कृतस्तं क्षमस्व त्वम् ॥३२६॥ एवं राज्ञा उक्ते सति विनयेन अवनता -नम्रा मदनसुन्दरी भणति-हे तात ! मनसि खेदं मा कुरु, एतत्सर्वमपि मम कर्म्मवशेनैव सञ्जातं, अत्र मनागपि भवद्दोषो नास्तीत्यर्थः ॥३२७॥ हे तात ! एष निश्चयोऽस्ति, कोऽपि कस्यापि सुखं दुःखं वा न ददाति, किन्तु जन्तुना-जीवेन निजकं-स्वकीयमेव समर्ज्जितम्-उपार्जितं कर्म उपभुज्यते ॥३२८॥ किलेति निश्चितं, मया कृतं कार्यं भवति इति कोऽपि गर्व्वं मा वहतु-मा दधातु, यद्-यस्मात्कारणात् सुरवरैः-इन्द्रादिभिः कृतमपि कार्यं कर्म्मवशाद्विपरीतं भवति ॥३२९॥

ता ताय ! जिणुत्तं तत्तमुत्तमं मुणसु जेण नाएणं । नज्जइ कम्मजियाणं, बलाबलं बंधमुक्खं च ॥३३०॥
तत्तो धम्मं पडिवज्जिऊण राया भणेइ संतुट्ठो । सीहरहरायतणओ जं जामाया मए लद्धो ॥३३१॥
तं पत्थरमित्तकए, हत्थंमि पसारियंमि सहसत्ति । चडिओ अचिंतिओ च्चिय नूनं चिंतामणी एसो ॥३३२॥
जामाइयं च धूयं, आरोविय गयवरंमि नरनाहो । महया महेण गिहमाणिऊण सम्माणइ धणेहिं ॥३३३॥

तत्-तस्मात्कारणात् हे तात ! जिनोक्तं तत्त्वमुत्तमं मुण-जानीहि येन ज्ञातेन कर्म्माणि च जीवाश्च कर्मजीवास्तेषां कर्म्मजीवानां बलं च अबलं च बलाबलं ज्ञायते, 'कत्थवि जीवो बलिओ, कत्थवि कम्माइं हुंति बलियाइं' इत्यादि, च - पुनः बन्धश्च मोक्षश्चानयोः समाहारो बन्धमोक्षं ज्ञायते ॥३३०॥ ततः-तदनन्तरं राजा धर्मं प्रतिपद्य-अङ्गीकृत्य सन्तुष्टः सन् भणति-यन्मया सिंहरथराजस्य तनयः-पुत्रो जामाता लब्धः ॥३३१॥ तत् प्रस्तरमात्रकृते-पाषाणमात्रग्रहणनिमित्तं हस्ते प्रसारिते सति सहसा-अकस्मात् नूनं-निश्चितम् अचिन्तित एव-अवितर्कित एव इति एतत्स्वरूप एष चिन्तामणिर्हस्ते चटितः ॥३३२॥ ततो नरनाथो-राजा जामातरं-श्रीपालं च - पुनः पुत्रीं-मदनसुन्दरीं गजवरे-प्रधानहस्तिनि आरोप्य महता महेन - उत्सवेन स्वगृहमानीय धनैः-विविधद्रव्यैः सन्मानयति ॥३३३॥

जायं च साहुवायं, मयणाए सत्तसीलकलियाए । जिणसासणप्पभावो, सयले नयरंमि वित्थरिओ ॥ ३३४॥
अन्नदिणे सिरिपालो, हयगयरहसुहडपरियरसमेओ । चडिओ रयवाडीए, पच्चक्खो सुरकुमारुव्व ॥३३५॥
लोए अ सप्पमोए,पिक्खंते चडवि चंदसालासुं । गामिल्लएण केणवि, नागरिओ पुच्छिओ कोऽवि ॥३३६॥
भो भो कहेसु को एस जाइ लीलाइ रायतणउव्व? । नागरिओ भणइ अहो, नरवरजामाउओ एसो ॥३३७॥
तं सोऊण कुमारो, सहसा सरताडिओव्व विच्छाओ । जाओ वलिऊण समागओ अ गेहंमि सविसाओ ॥३३८॥

तदा सत्त्वशीलाभ्यां-धैर्यब्रह्मचर्याभ्यां कलिताया -युक्तायाः मदनसुन्दर्याः साधुवादश्च सञ्जातः-साधुर्महासतीयमिति वाक्यं प्रादुरभूदित्यर्थः, तथा जिनशासनस्य प्रभावः सकलेऽपि नगरे विस्तृतो-विस्तारं प्राप्तः ॥३३४॥ अन्यस्मिन् दिने श्रीपालो हयगजरथसुभटानां यः परिकरः-परिवारस्तेन समेतः-संयुक्तः सन् प्रत्यक्षः सुरकुमार इव राजवाटिकायां चटितः, राजवाटिकायां क्रीडार्थं चलित इत्यर्थः ॥३३५॥ तदा सह प्रमोदेन-हर्षेण वर्त्तते सप्रमोदस्तस्मिन् लोके च चन्द्रशालासु-गृहोपरितनभूमिषु चटित्वा कुमारं प्रेक्षमाणे सति केनापि ग्रामीणेन नरेण कोऽपि नागरिको-नगरवासी पृष्टः ॥३३६॥ भो भो ! त्वं कथय लीलया राजतनयो-राजपुत्र इव क एष याति ?, एवं ग्रामीणेन पृष्टे सति नागरिको भणति- अहो एष नरवरस्य-राज्ञो जामाताऽस्ति ॥३३७॥ तन्नागरिकवचः श्रुत्वा कुमारः सहसा-अकस्मात् शरेण-बाणेन ताडित इव विच्छायो जातः, च - पुनः सविषादः सन् तत एव वलित्वा गृहं समागतः ॥३३८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं तारिसं च जणणी, दट्ठूण समाकुला भणइ एवं । किं अज्ज वच्छ ! कोवि हु, तुह अंगे वाहए वाही ? ॥३३९॥
किं वा आखंडलसरिस, तुज्झ केणावि खंडिया आणा ? ॥ अहवा अघडंतोवि हु, पराभवो केणवि कओ ते ? ॥३४०॥
किंवा कन्नारयणं,किंपि हु हियए खडुक्कए तुज्झ । घरणीकओ अविणओ, सो मयणाए न संभवइ ॥३४१॥
केणावि कारणेणं, चिंतातुरमत्थि तुह मणं नूणं । जेणं तुह मुहकमलं, विच्छायं दीसई वच्छ ! ॥३४२॥
कुमरेण भणिअमम्मो !, एएसिं मज्झओ न एक्कंपि । कारणमत्थित्थमिमं, अन्नं पुण कारणं सुणसु ॥३४३॥

तदा जननी-माता तं कुमारं तादृशं विच्छायवदनं दृष्ट्वा समाकुला-व्याकुला सती एवं भणति- हे वत्स ! अद्य तवाङ्गे किं कोऽपि व्याधिः-रोगो बाधते ? - पीडामुत्पादयति, चहुशब्दौ पादपूरणे ॥३३९॥ वा-अथवा हे आखण्डलसदृश-हे इन्द्रतुल्य! हे वत्स ! तवाज्ञा किं केनापि पुरुषेण खण्डिता-भग्ना?, अथवा अघटमानोऽपि हु इति निश्चितं ते-तव पराभवः-अनादरः केनापि कृतः ? येन त्वमीदृशो दृश्यसे ॥३४०॥ किंवा किमपि कन्यारत्नं तव हृदये 'खडुक्कए' त्ति खडुक्कते,सामयिकोऽयं प्रयोगः, तथा गेहिन्या-स्वस्त्रिया कृतो योऽविनयः स मदनसुन्दर्या न सम्भवति ॥३४१॥ नूनं-निश्चयेन केनापि कारणेन तव मनश्चिन्तातुरमस्ति, येन कारणेन हे वत्स ! तव मुखकमलं विच्छायं दृश्यते ॥३४२॥ कुमारेण भणितं हे अम्ब-हे मातः ! एतेषां मध्यात् अत्र मम एकमपि कारणं नास्ति, अन्यत् पुनः कारणमस्ति तत्त्वं शृणु ॥३४३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाहं निअयगुणेहिं, न तायनामेण नो तुह गुणेहिं । इह विक्खाओ जाओ, अहयं सुसुरस्स नामेणं ॥३४४॥
तं पुण अहमाहमत्तकारणं वज्जिअं सुपुरिसेहिं । तत्तुच्चिय मज्झे मणं, दूमिज्जइ सुसुरवासेणं ॥३४५॥
तो भणिअं जणणीए, बहुसिन्नं मेलिऊण चउरंगं । गिण्हसु निअपिअरज्जं, मह हिययं कुणसु निस्सल्लं ॥३४६॥
कुमरेणुत्तं सुसुरय-बलेण जं गिण्हणं सरज्जस्स । तं च महच्चिअ दूमइ, मज्झं चित्तं धुवं अम्मो ! ॥३४७॥

इह-अस्मिन्नगरेऽहं निजकगुणैः-स्वकीयगुणैर्विख्यातः-प्रसिद्धो न जातोऽस्मि, न तातनाम्ना-पितृनाम्ना विख्यातो जातोऽस्मि, नो पुनः तव गुणैर्विख्यातो जातोऽस्मि, किन्तु अहं श्वशुरस्य नाम्ना विख्यातो जातोऽस्मि ॥३४४॥ तत्पुनः-श्वशुरनाम्ना विख्यातभवनं अधमाधमत्वस्य कारणमस्ति, अत एव सुपुरुषैर्वर्जितं तत एव श्वशुरवासेन-श्वशुरगृहनिवासेन मम मनो दूयते-सन्तप्तं भवति-"उत्तमाः स्वगुणैः ख्याताः, मध्यमाश्च पितुर्गुणैः । अधमा मातुलैः ख्याताः, श्वशुरैश्चाधमाधमाः" ॥१॥ इति वचनात् ॥ ३४५॥ ततो जनन्या-मात्रा भणितं- हे पुत्र ! चत्वारि अङ्गानि यस्य तच्चतुरङ्गं-हस्त्यश्वादिरूपं बहुसैन्यं मेलयित्वा निजपितुः राज्यं गृहाण, मम हृदयं निःशल्यं कुरु ॥३४६॥ कुमारेणोक्तं- हे मातः ! श्वशुरस्य बलेन यत् स्वराज्यस्य ग्रहणं तच्च ध्रुवं-निश्चितं महदेव मम चित्तं 'दुमेइ'त्ति दूनं करोति - दूनयति, सन्तापयतीत्यर्थः ॥३४७॥

For Private and Personal Use Only

ता जइ सभुयज्जिअ सिरिबलेण गिण्हामि पेइअं रज्जं । ता होइ मज्झ चित्तंमि निव्वुई अन्नहा नेव ॥३४८॥
तत्तो गंतूणमहं, कत्थवि देसंतरंमि इक्किल्लो । अज्जिअलच्छिबलेणं, लहुं गहिस्सामि पिअरज्जं ॥३४९॥
तं पइ जंपइ जणणी, बालो सरलोऽसि तंसि सुकुमालो । देसंतरेसु भमणं, विसमं दुक्खावहं चेव ॥३५०॥
तो कुमरो जणणीं पइ, जंपइ मा माइ ! एरिसं भणसु । तावच्चिय विसमत्तं, जाव न धीरा पवज्जंति ॥३५१॥
पभणइ पुणोऽवि माया,वच्छय! अम्हे सहागमिस्सामो । को अम्हं पडिबंधो, तुमं विणा इत्थ ठाणंमि ? ॥३५२॥

तस्माद् यदि स्वभुजाभ्याम् अर्जिता-उपार्जिता या श्रीः-लक्ष्मीस्तस्या बलेन पितुरिदं पैतृकं राज्यं गृह्णामि तर्हि मम चित्ते निर्वृत्तिः-सुखं भवति, अन्यथा-अन्येन प्रकारेण सुखं नैव भवेत् ॥३४८॥ ततः-तस्मात्कारणात् अहमेकाकी सन् कुत्रापि देशान्तरे गत्वा स्वोपार्जितलक्ष्मीबलेन लघु-शीघ्रं पितृराज्यं ग्रहीष्यामि ॥३४९॥ तं श्रीपालं प्रति जननी-माता जल्पति-वक्ति, हे पुत्र ! त्वं बालोऽसि, पुनः सरलः-ऋजुरसि, पुनः सुकुमालोऽसि, देशान्तरेषु भ्रमणं तु विषमम्, अत एव दुःखावहं-दुःखकारकमेवाऽस्ति ॥३५०॥ ततः कुमारो जननीं प्रति जल्पति- हे मातः ! ईदृशं वचो मा भण-मा कथय, कार्यमात्रस्य विषमत्वं तावदेवाऽस्ति यावत् धीरा-धैर्य्यवन्तः पुरुषा न प्रपद्यन्ते-नाङ्गीकुर्व्वन्ति ॥३५१॥ पुनरपि माता प्रभणति-हे वत्स ! वयं भवता सह आगमिष्यामः, अत्र स्थाने त्वां विनाऽस्माकं कः प्रतिबन्धोऽस्ति-न कोऽपीत्यर्थः ॥३५२॥

कुमरो कहेइ अम्मो !, तुम्हेहिं सहागयाहिं सव्वत्थ । न भवामि मुक्कलपओ, ता तुम्हे रहह इत्थेव ॥३५३॥
मयणा भणेइ सामिअ !, तुम्हं अणुगामिणी भविस्सामि । भारंपि हु किंपि अहं न करिस्सं देहछायव्व ॥३५४॥
कुमरेणुत्तं उत्तमधम्मपरे देवि ! मज्झ वयणेणं । नियसस्सूसुस्सूसणपरा तुमं रहसु इत्थेव ॥३५५॥
मयणाऽऽह पइपवासं, सइओ इच्छंति कहवि नो तहवि । तुम्हं आएसुच्चिय, महप्पमाणं परं नाह ! ॥३५६॥
अरिहंताऽऽइपयाइं, खणंपि न मणाउ मिल्हियव्वाइं । नियजणणिं च सरिज्जसु, कइयावि हु मंऽपि नियदासिं ॥३५७॥

कुमारः कथयति- हे अम्ब ! युष्माभिः सह आगताभिः सतीभिः अहं सर्वत्र प्रदेशे मुत्कलपदो- मुत्कलचरणो नो भवामि, तस्माद् यूयमत्रैव अवतिष्ठध्वम् ॥३५३॥ मदनसुन्दरी भणति- हे स्वामिन् ! अहं युष्माकम् अनुगामिनी-पश्चात्संचारिणी भविष्यामि, हु इति निश्चितं, भारमपि किमपि न करिष्ये, का इव ?-देहस्य छाया इव ॥३५४॥ कुमारेणोक्तं- हे उत्तमधर्मपरे-सद्धर्मतत्परे ! हे देवि! मम वचनेन त्वं नित्यं निजश्वश्र्वाः शुश्रूषणं- सेवनमेव परं-प्रधानं यस्याः सा एवंविधा सती अत्रैवावतिष्ठस्व ॥३५५॥ तदा मदनसुन्दरी आह- सत्यः - सुशीला नार्य्यः कथमपि-केनापि प्रकारेण पत्युः प्रवासं भर्त्तुर्विदेशगमनं न इच्छन्ति, तथापि हे नाथ ! मम परं-केवलं युष्माकमादेशः-आज्ञैव प्रमाणम् ॥३५६॥ भवद्भिः अर्हदादिपदानि क्षणं यावदपि निजमनसो न मोक्तव्यानि-न दूरीकर्त्तव्यानि, च - पुनः निजजननीं स्मरिष्यध्वं, कदापि च मामपि निजदासीं स्मरिष्यध्वम् ॥३५७॥

जणणीवि तस्स नाऊण निच्छयं तिलयमंगलं काउं । पभणइ तुह सेयत्थं, नवपयझाणं करिस्समहं ॥३५८॥
मयणा भणेइ अहयंपि नाह ! निच्चंपि निच्चलमणेणं । कल्लाणकारणाइं झाइस्सं ते नव पयाइं ॥३५९॥
तेणं मयणावयणामएण सित्तो नमित्तु माइपए । संभासिऊण दइयं, सिरिपालो गहिअकरवालो ॥३६०॥
निम्मलवारुणमंडलमंडिअससिचारपाणसुपवेसे । तच्चरणपढमकमणं, कमेण चल्लेइ गेहाओ जुम्मं ॥३६१॥
सो गामागरपुरपत्तनेसु कोऊहलाइं पिक्खंतो । निब्भयचित्तो पंचाणणुव्व गिरिपरिसरं पत्तो ॥३६२॥

अथ जनन्यपि तस्य-श्रीपालस्य विदेशगमने निश्चयं ज्ञात्वा तिलकमङ्गलं कृत्वा प्रभणति-वक्ति, हे पुत्र ! तव श्रेयोऽर्थम् अहं नवपदध्यानं करिष्ये ॥३५८॥ मदनसुन्दरी भणति- हे नाथ ! अहमपि नित्यमेव निश्चलमनसा-एकाग्रचित्तेन ते-तव कल्याणस्य कारणानि नव पदानि ध्यास्यामि-स्मरिष्यामि ॥३५९॥ तेन मदनाया वचनामृतेन सिक्तः श्रीपालो मातृपादौ नत्वा दयितां-स्त्रीं मदनसुन्दरीं सम्भाष्य गृहीतः करवालः-तरवारिर्येन स गृहीतकरवालः सन् ॥३६०॥ निर्मलं यद्वारुणमण्डलं-जलमण्डलं तेन मण्डितो यः शशिचारप्राणः -चन्द्रनाडीसञ्चारी वायुस्तस्य सुष्ठु-शोभने प्रवेशे सति अर्थाद्वामस्वरूपचन्द्रनाड्यां वहमानायां तस्य चरणस्य-वामपादस्य यत्प्रथमं क्रमणम्-उत्पाट्य स्थापनं तेन क्रमेण गृहाच्चलति ॥३६१॥ स श्रीपालो ग्रामाकरपुरपत्तनेषु कौतूहलानि-कौतुकानि प्रेक्षमाणः पञ्चाननः-सिंह इव निर्भयं चित्तं यस्य स निर्भयचित्तः सन् गिरेः-पर्वतस्य परिसरं-पार्श्वप्रदेशं प्राप्तः ॥३६२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्थ य एगंमि वणे, नंदणवणसरिससरसपुप्फफले । कोइलकलरवरम्मं तरुपंतिं जा निहालेइ ॥३६३॥
ता चारुचंपयतले, आसीणं पवररूवनेवत्थं । एगं सुंदरपुरिसं, पिक्खइ मंतं च झायंतं ॥३६४॥
सो जावसमत्तीए, विणयपरो पुच्छिओ कुमारेण । कोऽसि तुमं ? किं झायसि? एगागी किं च इत्थ वणे ?
तेणुत्तं गुरुदत्ता, विज्जा मह अत्थि सा मए जविआ । परमुत्तरसाहगमंतरेण सा मे न सिज्झेइ ॥३६६॥
जइ तं होऽसि महायस !, मह उत्तरसाहगो कहवि अज्ज । ताऽहं होमि कयत्थो, विज्जासिद्धीइ निब्भंतं ॥३६७॥

तत्र च गिरिपार्श्वदेशे एकस्मिन् वने तरूणां-वृक्षाणां पङ्क्तिं-श्रेणिं यावन्निभालयति-विलोकते, कीदृशे वने ?-नन्दनवनसदृशानि सरसानि-रसभृतानि पुष्पफलानि यस्मिंस्तत् तस्मिन्, कीदृशीं तरुपङ्क्तिं ? -कोकिलानां कलरवैर्मधुरध्वनिभिः (रम्यां) ॥३६३॥ तावच्चारु - मनोज्ञो यश्चम्पको-वृक्षविशेषस्तस्य तले आसीनम्-उपविष्टं पुनः प्रवरं-प्रधानं रूपम् आकृतिर्नेपथ्यं च-वेषो यस्य स तम् ईदृशमेकं सुन्दरपुरुषं मन्त्रं च ध्यायन्तं-जपन्तं प्रेक्षते ॥३६४॥ स पुमान् जापसमाप्तौ सत्यां विनयपरो-विनयकरणतत्परः सन् कुमारेण पृष्टः- त्वं कोऽसि ? किं ध्यायसि ? च - पुनरत्र वने एकाकी किं-किमर्थमित्यर्थः ॥३६५॥ तेन पुरुषेणोक्तं- मम गुरुदत्ता विद्याऽस्ति, सा मया जप्ता परं सा मे-मम विद्या उत्तरसाधकमन्तरेण साहाय्यकारिपुरुषं विना न सिद्ध्यति ॥३६६॥ हे महायश - हे महायशस्विन् ! यदि त्वं कथमपि-केनापि प्रकारेण अद्य मम उत्तरसाधको भवसि तत्-तर्हि अहं निर्भ्रान्तं- निस्सन्देहं विद्यासिद्ध्या कृतार्थो भवामि ॥३६७॥

For Private and Personal Use Only

तत्तो कुमरकएणं, साहज्जेणं स साहगो पुरिसो । लीलाइ सिद्धविज्जो, जाओ एगाइ रयणीए ॥३६८॥
तत्तो साहगपुरिसेण तेण कुमरस्स ओसहीजुअलं । पडिउवयारस्स कए, दाऊणं भणियमेयं च- ॥३६९॥
जलतारिणी अ एगा परसत्थनिवारिणी तहा बीया । एयाउ ओसहीओ, तिधाउ मढियाउ धारिज्जा ॥३७०॥
कुमरेण समं सो विज्जसाहगो जाइ गिरिनियंबंमि । ता तत्थ धाउवाइअपुरिसेहिं एरिसं भणिओ ॥३७१॥
देव ! तुह दंसिएणं, कप्पपमाणेण साहयंताणं । केणावि कारणेणं अम्हाण न होइ रससिद्धी ॥३७२॥

ततः -तदनन्तरं कुमारकृतेन साहाय्येन स साधकः पुरुषो लीलया एव एकस्यां रजन्यां सिद्धा विद्या यस्य स सिद्धविद्यो जातो-भूतः ॥३६८॥ ततः- तदनन्तरं तेन-साधकपुरुषेण प्रत्युपकारनिमित्तं कुमारस्येति-कुमाराय औषधीयुगलं-द्वे औषध्यौ दत्त्वा एतद्भणितं-उक्तम् ॥३६९॥ किं भणितमित्याह- अनयोरौषध्योर्मध्ये एका औषधी जलतारणी वर्त्तते, तथा द्वितीया औषधी परस्य-शत्रोः शस्त्रस्य निवारणी अस्ति, एते द्वे औषध्यौ त्रयाणां धातूनां समाहारस्त्रिधातु-स्वर्णरूपताम्रात्मकं धातुत्रयं तत्र 'मढियाओ'त्ति प्रक्षिप्ते विधाय त्वं धारयेः ॥३७०॥ स विद्यासाधकः पुमान् कुमारेण समं-सह यावद्गिरिनितम्बे-पर्वतकटके याति तावत्तत्र धातुवादिकपुरुषैरीदृशं भणितः - ईदृग् वचनमुक्तमित्यर्थः ॥३७१॥ हे देव ! त्वद्दर्शितेन कल्पप्रमाणेन साधयतां-रससिद्धिं कुर्वतामस्माकं केनापि कारणेन रसस्य-सुवर्णोत्पादकरसस्य सिद्धिः-निष्पत्तिर्न भवति ॥३७२॥

कुमरेण तओ भणियं, भो मह दिट्ठीइ साहह इमंति । ता तेहिं तहाविहिए, जाया कल्लाणरससिद्धी ॥ ३७३॥
काऊण कंचणं साहगेहिं भणिअं कुमार ! अम्हाणं । जं जाया रससिद्धी, तुम्हाणं सो पसाओत्ति ॥३७४॥
ता गिण्ह कणगमेयं, नो गिण्हइ निप्पिहो कुमारो य । तहवि हु अलयंतस्सवि, किंपि हु बंधंति ते वत्थे ॥ ३७५॥
तत्तो कुमरो पत्तो, कमेण भरुयच्छनामयं नयरं । कणगव्वएण गिण्हइ, वत्थालंकारसत्थाइं ॥३७६॥
काऊण धाउमढियं, ओसहिजुयलं च बंधइ भुयंमि । लीलाइ भमइ नयरे, सच्छंदं सुरकुमारुव्व ॥३७७॥

ततः कुमारेण भणितं- भोः पुरुषा ! यूयं मम दृष्टौ इमं रसं साधयत इति, ततस्तैस्तथा-तेन प्रकारेण विहिते-कृते सति कल्याणरसस्य स्वर्णरसस्य सिद्धिर्जाता ॥३७३॥ ततः साधकैः काञ्चनं-स्वर्णं कृत्वा-निष्पाद्य भणितम्-उक्तं हे कुमार ! अस्माकं यत् रससिद्धिर्जाता स युष्माकं प्रसाद इति ॥३७४॥ तस्मादेतत् कनकं-स्वर्णं त्वं गृहाण, कुमारश्च निःस्पृहः सन् न गृह्णाति, तथापि 'अलयंतस्स'त्ति अलातोऽपि-अगृह्णतोऽपि कुमारस्य वस्त्रे ते पुरुषाः किमपि स्वर्णं बध्नन्ति ॥३७५॥ ततः श्रीपालकुमारः क्रमेण 'भरुअच्छ' त्ति भृगुकच्छनामकं नगरं प्राप्तः, तत्र कनकव्ययेन-स्वर्णव्ययं कृत्वेत्यर्थः, वस्त्रालङ्कारशस्त्राणि गृह्णाति ॥ ३७६॥ च - पुनः औषधियुगलं 'धाउमढियं'ति त्रिधातुप्रक्षिप्तं कृत्वा भुजे बध्नाति, ततः कुमारः सुरकुमार इव-लीलया नगरे स्वच्छन्दं-स्वेच्छया भ्रमति ॥३७७॥

For Private and Personal Use Only

इओ य- कोसंबीनयरीए, धवलो नामेण वाणिओ अत्थि । सो बहुधणुत्ति लोए, कुबेरनामेण विक्खाओ ॥३७८॥
बहुकणयकोडिगाहिअ-कयाणगो णेगवाणिउत्तेहिं । सहिओ सो सत्थवई, भरुयच्छे आगओ अत्थि ॥३७९॥
जाओ य तत्थ लाहो, पवरो सो तहवि दव्वलोहेणं । परकूलगमणपउणो, पउणइ बहुजाणवत्ताइं ॥३८०॥
मज्झिमजुंगो एगो, सोलसवरकूवएहिं कयसोहो । चत्तारि य लहुजुंगा, चउचउकूवेहिं परिकलिआ ॥३८१॥
वडसफरपवहणाणं, एगसयं बेडियाण अट्ठसयं । चउरासी दोणाणं, चउसट्ठी वेगडाणं च ॥३८२॥

इतश्च- कौशाम्ब्यां नगर्यां नाम्ना धवलो-धवलनामेत्यर्थः वणिक् अस्ति, स धवलो बहु धनं यस्य स बहुधन इति हेतोर्लोके कुबेरनाम्ना विख्यातः-प्रसिद्धः ॥३७८॥ बहुभिः कनककोटिभिर्ग्राहितानि क्रयाणकानि येन स तथोक्तः, पुनरनेकैर्वणिक्पुत्रैः सहितः स सार्थपतिः-सार्थवाहो भृगुकच्छे नगरे आगतोऽस्ति ॥३७९॥ तत्र च भृगुकच्छे प्रवरः-प्रकृष्टो लाभो जातः, तथापि स सार्थपतिः द्रव्यलोभेन परकूले-समुद्रपरतटे गमनाय प्रवणः-तत्परः सन् बहूनि यानपात्राणि-प्रवहणानि प्रगुणयति-सज्जानि करोति ॥३८०॥ तेषु यानपात्रेषु मध्ये एको मध्यमजुङ्गः-पोतोऽस्ति,कीदृशः ? -षोडशभिः वरैः-प्रधानैः कूपकैः-कूपस्तम्भैः कृता शोभा यस्य सः, च - पुनश्चत्वारो लघुजुङ्गाः सन्ति, कीदृशाः ?-चतुर्भिश्चतुर्भिः कूपस्तम्भैः परिकलिता-युक्ताः ॥३८१॥ बृहत्सफरप्रवहणानामेकं शतं, बेडिकानां-नावामष्टाधिकं शतं, द्रोणानां - नौविशेषाणां चतुरशीतिः८४, वेगडानां-पोतविशेषाणां चतुःषष्टिः ६४ ॥३८२॥

For Private and Personal Use Only

सिल्लाणं चउपन्ना, आवत्ताणं च तह य पंचासा । पणतीसं च खुरप्पा, एवं सयपंचबोहित्था ॥३८३॥
गहिऊण निवाएसं, भरिया विविहेहिं ते कयाणेहिं । नाखुइयमालमेहिं, अहिट्ठिया वाणिउत्तेहिं ॥३८४॥
मरजीवएहिं गब्भिल्लएहिं खुल्लासएहिं खेलेहिं । सुंकाणिएहिं सययं, कयजालवणीविहिविसेसा ॥३८५॥
नाणाविहसत्थविहत्थहत्थसुहडाण दससहस्सेहिं । धवलस्स सेवगेहिं, रक्खिज्जंता पयत्तेणं ॥३८६॥

सिल्लसंज्ञपोतानां चतुष्पञ्चाशत्, आवर्ताभिधपोतानां तथा च पञ्चाशत् ५०, च - पुनः पञ्चत्रिंशत् ३५ क्षुरप्रपोताः,एवम्-उक्तप्रकारेण पञ्च शतानि बोहित्थानि-प्रवहणानि सज्जीकृतानि ॥३८३॥ नृपस्यादेशं-आज्ञां गृहीत्वा ते पोता विविधैः-बहु प्रकारैः क्रयाणैर्भृताः, पुनः नाखुयिकमालिमैः-पोताधिकारिभिः तथा वणिक्पुत्रैः अधिष्ठिता-आश्रिताः ॥३८४॥ समुद्रजले प्रविश्य ये वस्तु निष्काशयन्ति ते मरजीवका उच्यन्ते तैः, तथा गब्भिल्लकैः खुल्लासकैः खेलैः सुङ्काणिकैश्च प्रवहण-सम्बन्धिस्वस्वव्यापाराधिकारिभिः सततं-निरन्तरं कृतो जालवण्या विधिविशेषो येषु ते तथोक्ताः ॥३८५॥ पुनः ते कीदृशाः पोताः ? - नानाविधानि-अनेकप्रकाराणि यानि शस्त्राणि तैर्विहस्ता-व्याकुला हस्ताः-करा येषां ते तथोक्ता एवंविधा ये सुभटास्तेषां दशभिः सहस्रैर्धवलस्य सेवकैः प्रयत्नेन रक्ष्यमाणाः ॥३८६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बहुचमरछत्तसिक्करिधयवडवरमउडविहिअसिंगारा । सिडदोरसारनंगरपक्खरभेरीहिं कयसोहा ॥३८७॥
जलसंबलइंधणसंगहेण ते पूरिऊण सुमुहुत्ते । धवलो य सपरिवारो, चडिओ चालावए जाव ॥३८८॥
ताव बलीसुवि दिज्जंतयासु वज्जंततारतूरेसुं । निज्जामएहिं पोआ, चालिज्जंतावि न चलंति ॥३८९॥
तत्तो सो संजाओ, धवलो चिंताइ तीइ कालमुहो । उत्तरिय गओ नयरिं, पुच्छइ सीकोत्तरिं चेगं ॥३९०॥

पुनः कीदृशास्ते पोताः ? -बहूनि चामराणि च छत्राणि च श्रीकर्य्यश्च तदाभरणविशेषा एव ध्वजपटाश्च वरमुकुटानि चेति द्वन्द्वस्तैर्विहितः शृङ्गारो येषां ते तथोक्ताः, सढो-बृहत्पटमयोपकरणविशेषः वाउदानेति प्रसिद्धः, दवरकाणि-बृहद्रज्जवः, सारनंगरो-लोहमयः पोतस्तम्भहेतूपकरणं, पक्खरः-पोतरक्षोपकरणं, भेर्यो-दुन्दुभयस्ताभिः कृता शोभा येषां ते तथोक्ताः ॥३८७॥ जलशम्बलेन्धनानां सङ्ग्रहेण तान् पोतान् पूरयित्वा सुष्ठु-शोभने मुहूर्त्ते धवलश्च सार्थपतिः सपरिवारश्चटितः सन् यावत्तांश्चालयति ॥३८८॥ तावद् देवदेवीभ्यो बलिषु-उपहारेषु दीयमानास्वपि तारेण-उच्चैःस्वरेण तूरेषु-वादित्रेषु वाद्यमानेषु निर्यामकैः-पोतवाहकैः चाल्यमाना अपि पोता न चलन्ति ॥३८९॥ ततः-तदनन्तरं स धवलस्तया चिन्तया कालं मुखं यस्य स कालमुखः सञ्जातः,तदा प्रवहणादुत्तीर्य्य नगरीगतश्च सन् एकां सीकोत्तरीं नारीं पृच्छति ॥३९०॥

For Private and Personal Use Only

सा कहइ देवयाथंभियाइं एयाइं जाणवत्ताइं । बत्तीससुलक्खणनरबलीइ दिन्नाइ चल्लंति ॥३९१॥
तत्तो धवलो सुमहग्घवत्थु भिट्टाइ तोसिऊण निवं । विन्नवइ देव ! एगं, बलिकज्जे दिज्जउ नरं मे ॥३९२॥
रन्ना भणियं- जो कोऽवि होइ वइदेसिओ अणाहो अ । तं गिण्ह जहिच्छाए, अन्नो पुण नो गहेयव्वो ॥३९३॥
तत्तो धवलस्स भडा, जाव गवेसंति तारिसं पुरिसं । ता सिरिपालो कुमरो, विदेसिओ जाणिओ तेहिं ॥३९४॥
बत्तीसलक्खणधरो, कहिओ धवलस्स तेहिं पुरिसेहिं । धवलेण पुणो रायाएसो गहिओ य तग्गहणे ॥ ३९५॥

सा सीकोत्तरी कथयति- एतानि तव यानपात्राणि देवतया स्तम्भितानि सन्ति, द्वात्रिंशत् सुष्ठु-शोभनानि लक्षणानि यस्मिन् स द्वात्रिंशत्सुलक्षणः ईदशो यो नरस्तस्य बलौ दत्तायां चलन्ति,नान्यथा ॥३९१॥ ततः-तदनन्तरं धवलः-सार्थपतिः सुमहार्घाणां-सुतरां बहुमूल्यानां वस्तुनां 'भिट्टाइ' त्ति ढौकनेन नृपं तोषयित्वा-सन्तुष्टं विधाय विज्ञपयति-विज्ञप्तिं करोति, हे देव ! एकं नरं-मनुष्यं बलिकार्ये-देवताबलिनिमित्तं मे-मह्यं दीयताम् ॥३९२॥ राज्ञा भणितं- यः कोऽपि वैदेशिकः-परदेशवासी च - पुनः अनाथो-निःस्वामिको नरो भवति तं नरं यदृच्छया-स्वेच्छया त्वं गृहाण, अन्यः पुनर्नो ग्रहीतव्यः ॥३९३॥ ततः-तदनन्तरं धवलस्य भटा यावत्तादृशं पुरुषं गवेषयन्ति तावत् तैर्धवलस्य भटैः श्रीपालः कुमारो वैदेशिको ज्ञातः ॥३९४॥ ततस्तैः पुरुषैर्द्वात्रिंशल्लक्षणधरः श्रीपालो धवलस्य कथितो-धवलाय निवेदितः, धवलेन च तद्ग्रहणे-तस्य श्रीपालस्य ग्रहणनिमित्तं पुनरपि राजादेशो गृहीतः ॥२९५॥

सो सिरिपालो चउहट्टयंमि लीलाइ संनिविट्ठोवि । धवलभडेहिं उब्भडसत्थेहिं झत्ति अक्खित्तो ॥ ३९६॥
रेरे तुरिअं चल्लसु, रुट्ठो तुह अज्ज धवलसत्थवई । तं देवयाबलीए, दिज्जसि मा कहसि नो कहिअं ॥३९७॥
कुमरेणुत्तं रेरे, देह बलिं तेण धवलपसुणावि । पंचाणणेण कत्थवि, किं केणवि दिज्जए हु बली ? ॥३९८॥
तत्तो पयडंति भडा, किंपि बलं जाव ताव कुमरकयं । सोऊण सीहनायं, गोमाउगणुव्व ते नट्ठा ॥३९९॥
धवलस्स पेरिएणं, रन्नावि हु पेसियं नियं सिन्नं । तंपि हु कुमरेण कयं, हयप्पयावं खणद्धेणं ॥४००॥

तदा स श्रीपालश्चतुष्पदे-वणिग्मार्गे लीलया सन्निविष्टोऽपि-आसीनोऽपि उद्भटशस्त्रैः-उत्पाटितायुधैर्धवलस्य भटैर्झटिति-शीघ्रं आक्षिप्त-आ समन्तात्प्रेरितः ॥३९६॥ कथमाक्षिप्त ? इत्याह- रेरे त्वरितं-शीघ्रं त्वं चल, अद्य तवोपरि धवलसार्थपतिः रुष्टोऽस्ति, त्वं देवताया बलौ दास्यसे, न कथितमिति मा कथयेः ॥३९७॥ तदा कुमरेणोक्तं- रेरे पामराः तेन धवलपशुना एव बलिं दत्त, यो धवलाख्यो भवत्स्वामी स एव पशुस्तेनैव देवतायै बलिं दत्तेत्यर्थः, परं पञ्चाननेन-सिंहेन किं कुत्रापि केनापि नरेण हु-निश्चितं बलिर्दीयते ?, सिंहेन बलिः केनापि क्वापि न दीयते इत्यर्थः ॥३९८॥ ततः - तदन्तरं यावद्भटाः किमपि बलं प्रकटयन्ति-प्रकटीकुर्वन्ति तावत् कुमारेण कृतं कुमारकृतं सिंहनादं श्रुत्वा ते धवलभटा गोमायुगणाः-शृगालसमूह इव नष्टाः-पलायिताः ॥३९९॥ धवलप्रेरितेन राज्ञाऽपि निजं-स्वकीयं सैन्यं प्रेषितं-धवलकार्यसिद्ध्यर्थं मुक्तं, तदपि सैन्यं कुमारेण क्षणार्धेन-अर्धक्षणमध्ये हतः प्रतापो यस्य तत् हतप्रतापं कृतम् ॥४००॥

धवलाएसेण भडा, नरवइसिन्नेण संजुया कुमरं । वेढंति तिपंतीहिं, मायाबीयंव रेहाहिं ॥४०१॥
धवलो भणेइ रेरे, एअं इत्थेव सत्थछिन्नतणुं । देह बलिं जेणं सा संतुस्सइ देवया अज्ज ॥४०२॥
ताण भडाणं सरसिल्लभल्लखग्गाइआ न लग्गंति । कुमरसरीरंमि अहो, महोसहीणं पभावुत्ति ॥४०३॥
कुमरेण पुणो तेसिं, केसिंपि हु केसकन्ननासाओ । लुणिआउ निअसरेहिं, कस्सगाइ न जीवियं हरियं ॥४०४॥
तं पासिऊण धवलो, चिंतइ एसो न माणुसो नूणं । खयरो व सुरवरो वा, कोइ इमोऽनप्पमाहप्पो ॥४०५॥

धवलस्यादेशेन भटा नरपतिसैन्येन संयुताः-सहिताः कुमारं तिसृभिः पङ्क्तिभिर्वेष्टयन्ति, काभिः किमिव ?-तिसृभिः रेखाभिर्मायाबीजं-ह्रींकारमिव ॥४०१॥ तदा धवलो भणति- रेरे भटा एतं पुरुषमत्रैव शस्त्रेण छिन्ना तनुः-शरीरं यस्य स तथा एवंविधं सन्तं बलिं दत्त येनाद्य एषा देवता सन्तुष्यति - सन्तुष्टा भवेत् ॥४०२॥ तेषां नृपधवलसम्बन्धिनां भटानां शरसिल्लभल्लखड्गादिकानि - बाणभिन्दपालकुन्तकरवालादीनि शस्त्राणि इति हेतोः कुमारस्य शरीरे न लगन्ति, तत्र हेतुमाह- अहो महौषधीनां प्रभाव आश्चर्यकारीत्यर्थः ॥४०३॥ कुमारेण पुनः तेषां केषाञ्चिद्भटानां केशकर्णनासिका निजशरैः - स्वबाणैर्लूनाः-छिन्नाः परं करुणया-कारुण्येन जीवितं कस्यापि न हृतम् ॥४०४॥ एवंविधं तं श्रीपालं दृष्ट्वा धवलश्चिन्तयति, नूनं-निश्चितम् एष मानुषो नास्ति, किन्तु अनल्पं-प्रचुरं माहात्म्यं यस्य सोऽनल्पमाहात्म्योऽयं कोऽपि खेचरो-विद्याधरो वा सुरवरो वाऽस्ति, महात्मनो भावो माहात्म्यं-प्रभाव इत्यर्थः ॥४०५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काऊण अंजलिं मत्थयंमि तो विन्नवेइ तं धवलो । देव तुममेरिसीए, सत्तीए कोऽवि खयरोऽसि ॥४०६॥
ता मह कुणसु पसायं, थंभणबेडीण मोयणोवायं । किंपि हु करेह जेणं, उवयारकरा हु सप्पुरिसा ॥४०७॥
कुमरेणुत्तं जइ तुह, मोयाविज्जंति जाणवत्ताइं । ता किं लब्भइ सोऽवि हु, भणेइ दीणारलक्खंति ॥४०८॥
तत्तो चल्लइ कुमरो, विअसिअवयणो य लोअपरिअरिओ । चडिओ य धवलसहिओ, अग्गिल्ले जाणवत्तंमि ॥४०९॥
निज्जामएसु नियनियपवहणवावारकरणपवणेसु । कयनवपयझाणेणं, मुक्का हक्का कुमारेणं ॥४१०॥

ततः-तदनन्तरं धवलो मस्तकेऽञ्जलिं कृत्वा तं श्रीपालं विज्ञपयति- हे देव-हे महाराज ! त्वमीदृश्या शक्त्या कोऽपि खेचरो-विद्याधरोऽसि ॥४०६॥ तत्-तस्मात्कारणात् ममोपरि प्रसादं कुरुष्व, मम स्तम्भितबेडिकानां मोचनस्य उपायं किमपि कुरु, येन कारणेन सत्पुरुषा, हु इति निश्चितम् उपकारं कुर्वन्तीति-उपकारकरा भवन्ति ॥४०७॥ कुमारेणोक्तं यदि तव यानपात्राणि-वहनानि मोच्यन्ते तत्-तर्हि किं लभ्यते ?, तदा स धवलोऽपि भणति- दीनाराणां- सौवर्णिकानां लक्षमिति ॥४०८॥ ततः-तदनन्तरं कुमारः विकसितं वदनं-मुखं यस्य स विकसितवदनः च - पुनः लोकैः परिकरितः-परिवृतः सन् चलति, च - पुनः धवलेन सहितोऽग्रिमे-अग्रतने यानपात्रे चटित-आरूढः ॥४०९॥ तदा निर्यामकेषु-पोतवाहकेषु निजनिजप्रवहणव्यापारकरणे प्रवणेषु-तत्परेषु सत्सु कृतं नवपदध्यानं येन स तेन एवंविधेन कुमारेण हक्का मुक्ता-उच्चैःस्वरेण हक्कारवः कृत इत्यर्थः, निजो निजः-स्वकीयः स्वकीयो यः प्रवहणस्य-पोतस्य व्यापारस्तस्य करणे प्रवणा इति समासः ॥४१०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोऊण कुमरहक्कं, सहसा सा खुद्ददेवया नट्ठा । चलियाइं पवहणाइं, वद्धावणयं च संजायं ॥४११॥
वज्जंति भेरिभुंगल-पमुहाउज्जाइं गहिरसद्दाइं । नच्चंति नट्टियाओ, महुरं गिज्जंति गीआइं ॥४१२॥
तं अच्छरिअं दट्ठुं, धवलो चिंतेइ एस जइ होइ । अम्ह सहाओ कहमवि, ता विग्घं होइ न कयावि ॥४१३॥
इअ चिंतिऊण धवलो, तं दीणाराण सयसहस्सं च । दाऊण विणयपणओ, भणेइ भो भो महाभाग! ॥४१४॥
दीणारसहसइक्किक्कमित्तयं वरिसजीवणं दाउं । संगहिया संति मए, दससहस भडा ससोंडीरा ॥४१५॥

कुमारस्य हक्कां श्रुत्वा सहसा-अकस्मात् सा क्षुद्रदेवता-दुष्टदेवी नष्टा-पलायिता प्रवहणानि चलितानि च - पुनर्वर्धापनकं सञ्जातम् ॥४११॥ तथा भेरीभुङ्गलप्रमुखाणि-दुन्दुभिप्रभृतीनि आतोद्यानि-वादित्राणि वाद्यन्ते, कीदृशानि ?-गम्भीरशब्दानि तथा नर्त्तक्यः स्त्रियो नृत्यन्ति, मधुरं यथा स्यात्तथा गीतानि गीयन्ते ॥४१२॥ तत् आश्चर्यं दृष्ट्वा धवलश्चिन्तयति यद्येष पुमान् कथमपि-केनापि प्रकारेण अस्माकं सहायो भवति तत्-तदा कदापि-कस्मिन्नपि काले विघ्नं न भवति ॥४१३॥ इति-अमुना प्रकारेण चिन्तयित्वा धवलो दीनाराणां शतसहस्रं-लक्षं च कुमाराय दत्त्वा विनयेन प्रणतो-नम्रीभूतः सन् तं कुमारं भणति- भो भो महाभाग ! - हे महाभाग्यवान् ! ॥४१४॥ एकैकदीनारसहस्रमात्रं वर्षस्य जीवनम्-आजीविकां दत्त्वा मया शौण्डीर्येण-पराक्रमेण सह वर्त्तमानाः सशोण्डीर्या दशसहस्रभट्टाः सङ्गृहीताः सन्ति ॥४१५॥

For Private and Personal Use Only

जइ तंपि हु ओलग्गं, गिण्हसि ता कहसु जीवणं तुज्झ । कित्तियमित्तं दिज्ज, जेण तुमं गरुयमाहप्पो ॥४१६॥
हसिऊण भणइ कुमरो, जित्तियमित्तं इमेसिं सव्वेसिं । दिन्नं जीवणवित्तं तित्तियमित्तं ममिक्कस्स ॥४१७॥
तो सहसा विम्हियओ, लिक्खं गणिऊण चिंतए सिट्ठी । दीणारकोडि एगा, सव्वेसिं जीवणं अत्थि ॥४१८॥
एगो मग्गइ कोडिं, अहह अजुत्तं विमग्गियं नूणं । एएसिं किं अहियं, सिज्झिस्सइ कज्जममुणाऽवि ॥४१९॥
इअ चिंतिऊण धवलेणुत्तं जइ कुमर! दससहस्साइं । गिण्हसि ता देमि अहं, जं पुण कोडी तयं कूडं ॥४२०॥

यदि त्वमपि ओलग्गन्ति अवलगनं-सेवां गृह्णासि-अङ्गीकरोषि तर्हि तव जीवनं कथय-तुभ्यं कियन्मात्रं जीवनं दीयते ? येन कारणेन त्वं गुरुकं-महत् माहात्म्यं- प्रभावो यस्य ईदृशोऽसि ॥४१६॥ एतद्धवलवचः श्रुत्वा कुमरो हसित्वा भणति,एषां सर्वेषां भटानां यावन्मात्रं त्वया जीवनवित्तं-जीवनद्रव्यं दत्तं तावन्मात्रं मह्यमेकस्मै देयम् ॥४१७॥ ततः - तदनन्तरं श्रेष्ठी धवलो विस्मितः-आश्चर्यं प्राप्तः सन् सहसा शीघ्रं लिक्खन्ति दीनारसङ्ख्यां गणयित्वा चिन्तयति- सर्वेषां भटानामेका दीनार-कोटिर्जीवनमस्ति ॥४१८॥ अयमेकः कोटिं मार्ग्गयति, अहह इति खेदे, नूनमयुक्तं विमार्ग्गितं अमुनाऽपि-अनेनापि एतेभ्योऽधिकं किं कार्यं सेत्स्यति ? ॥४१९॥ इति चिन्तयित्वा-विचार्य धवलेनोक्तं- हे कुमार ! यदि दशसहस्राणि दीनाराणां गृह्णासि तत्-तर्हि अहं ददामि, यत्पुनस्त्वया कोटिर्मार्ग्गिता तत् कूटं-मृषावाक्यमित्यर्थः ॥४२०॥

कुमरेणुत्तं मह तायतुल्ल ! तुह जीवणेण नो कज्जं । किंतु अहं देसंतरगंतुमणो एमि तुह सत्थे ॥४२१॥
जइ भाडएण चडयं, देसि ममं हरिसिओ तओ सिट्ठी । मग्गेइ भाडयं पइमासं दीणारसयमेगं ॥४२२॥
तं दाऊणं चडिए, कुमरे मूलिल्लवाहणे तस्स । भेरीउ ताडियाओ, पत्थाणे रयणदीवस्स ॥ ४२३॥
हक्कारिज्जंति सढे तह वड्डिज्जंति सिक्कियाओ अ । चालिज्जंते सुक्काणयाइं आउल्लयाइं च ॥४२४॥

तदा कुमरेणोक्तं-हे ताततुल्य !- हे पितृसदृश ! तव जीवनेन-तव पार्श्वे जीविकाद्रव्यग्रहणेन मम कार्यं नो अस्ति, किन्तु अहं देशान्तरे गन्तुं मनो यस्य स देशान्तरगन्तुमनाः सन् तव सार्थे एमि -आगच्छामि ॥४२१॥ यदि भाटकेन मह्यं चटनं-प्रवहणे आरोहणं ददासि तर्हि त्वत्सार्थे आगच्छामीति भावः, ततः-तदनन्तरं श्रेष्ठी हर्षितः सन् मासं मासं प्रतीति प्रतिमासमेकं दीनाराणां शतं भाटकं मार्गयति ॥४२२॥ तद्भाटकं दत्त्वा श्रीपालाख्ये कुमारे तस्य श्रेष्ठिनो मूलवहने-प्रधानयानपात्रे चटिते-आरूढे सति रत्नद्वीपस्य प्रस्थाने-रत्नद्वीपाभिमुखचलनार्थं भेर्य्यस्ताडिता-वादिता इत्यर्थः ॥४२३॥ तदा सढा-वस्त्रमयपोतोपकरणविशेषा वायुपूरणार्थे पोतोपरि हक्कार्यन्ते-ऊर्ध्वं प्रसार्यन्ते, तथा शिक्यान्येव शिक्यिका-रज्जुमय्य आरोहणार्थोपकरणविशेषाः वर्ध्यन्ते-विस्तार्यन्ते, तथा सुक्कानकानि-पोताग्रभागवर्त्यूर्ध्वकाष्ठानि चाल्यन्ते-स्फोर्यन्ते, च- पुनः आउल्लकानि-काष्ठमयचालनोपकरणानि चाल्यन्ते ॥४२४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एगे मवंति धुवमंडलं च एगे हरंति थागत्तं । एगे मवंति वेलं, एगे मग्गं पलोयंति ॥४२५॥
कत्थवि दट्ठुं मगरं, एगे वायंति ढुक्कलुकाइं । एगे य अग्गितिल्लं, खिवंति लहुढिंकलीआहिं ॥४२६॥
चोराण वाहणाइं, दट्ठुं निययाइं पक्खरिज्जंति । पंजरिएहिं भडेहिं, चोरा दूरे गमिज्जंति ॥४२७॥
उग्गमणं अत्थमणं, रविणो दीसेइ जलहिमज्झंमि। वडवानलपज्जलिया, दिसाउ दिसंति रयणीसु ॥४२८॥

पुनस्तदा एके-केचन पोतवाहका ध्रुवमण्डलं - ध्रुवतारकमण्डलं मिमते-मानविषयं कुर्वन्ति, च - पुनः एके-केचन थागत्तं हरन्ति-अन्तःप्रविष्टं जलं निष्कासयन्ति, तथा एके काष्ठप्रयोगेण जलधेर्वेलां मिमतेऽन्ये पुनरेके मार्गं प्रलोकन्ते- निरीक्षन्ते ॥४२५॥ कुत्रापि मकरं-महामत्स्यविशेषं दृष्ट्वा एके - केचन लोका ढुक्कलुक्कानि - ढुक्कलुक्काख्यान् चर्मावनद्धवाद्यविशेषान् वादयन्ति, च- पुनः एके लोका लघुभिर्ढिङ्कलिकाभिः-पात्रविशेषैः अग्नौ तैलं क्षिपन्ति, एतावता वाद्यशब्दं श्रुत्वाऽग्निज्वालां च विलोक्य मकरा दूरतः प्रयान्तीति भावः ॥४२६॥ क्वचित्प्रदेशे चौराणां वहनानि-पोतान् दृष्ट्वा निजकानि-स्वकीयानि वहनानि पञ्जरीकैः-तदधिकारिविशेषैः‘पक्खरिज्जन्ती’ति-सन्नद्धानि कार्यन्ते, ततो भटैः-वीरपुरुषैः चौरा दूरे गम्यन्ते - गमनं कार्यन्ते ॥४१७॥ पुनस्तदा रवेः:-सूर्यस्य उद्गमनमुदयः अस्तंगमनमस्तमयनं द्वे अप्येते जलधिमध्ये-समुद्रान्तः एव दृश्येते, तथा रजनीषु-रात्रिषु वडवानलेन-समुद्रोत्थवह्निविशेषेण ज्वलिता दिशो दृश्यन्ते ॥४२८॥

एवंविहाइं कोऊहलाइं पिक्खंतओ समुद्दस्स । जा वच्चइ कुमरवरो, ता पंजरिओ भणइ एवं ॥४२९॥
भो भो जइ जलइंधण-पमुहेहिं किंपि अत्थि तुम्हाणं । कज्जं ता कहह फुडं, बब्बरकूलं समणुपत्तं ॥४३०॥
संजत्तिएहिं भणिअं, बब्बरकूलस्स मंदिराभिमुहं । वच्चह जेण जलाइं, गिण्हामो मा विलंबेह ॥४३१॥
पत्ता य तत्थ लोआ, सपमोआ उत्तरंति भूमीए । दससहसभडसमेओ धवलोवि ठिओ तडमहीए ॥४३२॥
इत्थंतरंमि तेसिं, हलबोलं सुणिअ आगया तत्थ । बब्बररायनिउत्ता, बंदिरलागत्थिणो पुरिसा ॥४३३॥

एवंविधानि-एतादृशानि समुद्रस्य कुतूहलानि - कौतुकानि प्रेक्षमाणः-पश्यन् यावत् कुमारवरः-कुमारश्रेष्ठः श्रीपालो व्रजति तावत्पञ्जरिक-ऊर्ध्वपञ्जरस्थः पुमान् एवं-वक्ष्यमाणप्रकारेण भणति-वक्ति ॥४२९॥ भो भो लोकाः ! यदि युष्माकं जलेन्धनप्रमुखैः किमपि कार्यमस्ति तत् - तर्हि स्फुटं-प्रकटं यूयं कथयत यतो बब्बरकूलं समनुप्राप्तं-बब्बरकूलाख्यं बिन्दरं सम्प्राप्तमस्तीत्यर्थः ॥४३०॥ एतद्वचनं श्रुत्वा सांयात्रिकैः-पोतवणिग्भिर्भणितम् - उक्तं बर्ब्बरकूलस्य बिन्दराभिमुखं व्रजत-यूयं चलत येन जलादिकं गृह्णीमः अत्रार्थे मा विलम्बध्वं-विलम्बं मा कुरुतेत्यर्थः ॥४३१॥ तत्र बिन्दरे प्राप्ताश्च लोकाः सप्रमोदाः-सहर्षाः, सन्तो भूम्यां उत्तरन्ति, तदा दशसहस्रभटैः समेतः-सहितो धवलोऽपि श्रेष्ठी तटमह्यां-समुद्रतटभूमौ स्थितः ॥४३२॥ अत्रान्तरे-अस्मिन्नवसरे तेषां-पोतमनुजानां हलबोलं-अव्यक्तध्वनिं श्रुत्वा तत्र-प्रदेशे बर्ब्बरराजेन नियुक्ताः-अधिकारिणः कृता बन्दिरलागार्थिनो- बन्दिरलागग्राहकाः पुरुषाः आगताः, लागो - राजदेयं द्रव्यम् ॥४३३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मग्गंताणवि तेसिं, लागं नो देइ जाव सो सिट्ठी । ता तेहिं महाकालोऽवहाविओ बब्बराहिवई ॥४३४॥
महाकालो भूरिबलो, तत्थागंतूण मग्गए लागं । सिट्ठी न देइ पद्धरपएहिं सुहडे पचारेइ ॥४३५॥
तो धवलभडा उब्भडसत्था सहसत्ति बब्बरभडेहिं । जुज्झंति जओ लोए, मरंति पच्चारिआ सुहडा ॥४३६॥
पढमं धवलभडेहिं, भग्गं महकालभडबलं सयलं । तो महकालनिवेणं, उट्ठविअं सबलतुरएणं ॥ ४३७॥

मार्गयतां-याचमानानामपि तेषां राजपुरुषाणां यावत् स श्रेष्ठी लागं न ददाति तावत् तैः पुरुषैर्महाकालो नाम बर्ब्बराधिपतिः-बर्बरकूलस्वामी अवधावितः, तत्र गमनार्थं प्रेरित इत्यर्थः ॥४३४॥ ततो भूरि-प्रचुरं बलं-सैन्यं यस्य स एवंविधो महाकालो राजा तत्र-बिन्दरे आगत्य लागं मार्गयति, परं धवलः श्रेष्ठी न ददाति,किन्तु प्रधरपदैः सुभटान् प्रचारयति-युद्धार्थं प्रेरयति ॥४३५॥ ततः-तदनन्तरं उद्भटानि-भयजनकानि शस्त्राणि येषां ते एवंविधा धवलभटाः सहसा इति-सद्यस्तत्क्षणमित्यर्थः बर्ब्बरराजस्य भटैः सह युद्ध्यन्ते-युद्धं कुर्वन्ति, यतो-यस्मात्कारणात् लोके सुभटाः प्रचारिताः-पौरुषोत्पादकवचनैः प्रेरिताः सन्तो म्रियन्ते, स्वस्वामिनोऽग्रे प्राणान् त्यजन्तीत्यर्थः ॥४३६॥ तदा प्रथमं धवलस्य भटैः सकलं - समस्तं महाकालराजस्य भटानां बलं-सैन्यं भग्नं, ततः-तदनन्तरं महाकालनृपेण सबलो-बलवान् तुरगः अश्वो यस्य स तेन अश्वरत्नारूढेन सता उत्थितं, स्वयं युद्धाय गम्यते स्मेत्यर्थः ॥४३७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नट्ठं धवलभडेहिं, बब्बरवइतेअमसहमाणेहिं । पयचारी जुज्झंतो, धवलो पुण पाडिओ बद्धो ॥४३८॥
तं बंधिऊण रुक्खे, राया सुहडे निओइऊण निए । सत्थस्स रक्खणत्थं, सयं च चलिओ पुराभिमुहं ॥ ४३९॥
इत्थंतरंमि कुमरो, धवलं बुल्लावए कहसु इण्हिं । ते सुहडा कत्थ गया, जेसिं दिन्ना तए कोडी ? ॥४४०॥
धवलो भणेइ- भो भो, खयंमि किं कुणसि खारपक्खेवं ? । किं वा दड्डाणुवरिं, फोडयदाणक्कियं कुणसि ? ॥४४१॥
तो कुमरो भणइ फुडं, अज्जवि जइ कोऽवि तुज्झ सव्वस्सं । वालेइ तस्स किं देसि ? मज्ज साहेसु तं सव्वं ॥४४२॥

तदा बर्बरपतेः-बर्बरकुलस्वामिनो राज्ञस्तेजोऽसहमानैर्धवलस्य भटैर्नष्टं-प्रतिदिशं भग्नं, ततः पदचारी सन् युध्यमानो धवलः पुनः पातितो बद्धश्च ॥४३८॥ राजा-महाकालस्तं-धवलं वृक्षे बन्धयित्वा सार्थस्य रक्षणार्थं निजान्-स्वकीयान् सुभटान् नियोज्य-संस्थाप्य स्वयम्-आत्मना च पुराभिमुखं चलितः ॥४३९॥ अत्रान्तरे-अस्मिन्नवसरे श्रीपालकुमारो धवलं जल्पयति, अहो धवल ! त्वं कथय इदानीं-साम्प्रतं ते सुभटाः क्व गता ? येभ्यस्त्वया दीनाराणां कोटिर्दत्ता ॥४४०॥ तदा धवलो भणति-भो भो क्षते-प्रहतेऽङ्गे क्षारस्य प्रक्षेपं किं करोषि-कथं विदधासीत्यर्थः, वाऽथवा दग्धानामुपरि स्फोटकदानक्रियां किं करोषि ? इदमयुक्तं भवादृशानामित्यर्थः ॥४४१॥ ततः-तदनन्तरं कुमारः स्फुटं-प्रकटं भणति, भो श्रेष्ठिन् ! अद्यापि यदि कोऽपि तव सर्वस्वं वालयति तर्हि तस्मै त्वं किं ददासि ? मह्यं तत् सत्यं कथय ॥४४२॥

For Private and Personal Use Only

धवलो भणेइ न हु संभवेइ एवं तहावि तस्स अहं। देमि सव्वस्स अद्धं, इत्थ पमाणं परमपुरिसो ॥ ४४३॥
तो कुमरो धणुहकरो, अंसेसुऽणुबद्धउभयतूणीरो। बुल्लावइ महकालं, पिट्ठी गंतूण इक्किल्लो ॥४४४॥
भो बब्बरदेसाहिव !, एवं गंतुं न लब्भए इण्हिं। ता वलिऊण बलं मे, पिक्खसु खणमित्तमिक्कस्स ॥४४५॥
तो वलिओ महकालो, पभणइ बालोऽसि दंसणीओऽसि। वररूवलक्खणधरो, मुहियाइ मरेसि किं इक्को ? ॥४४६॥
कुमरोवि भणइ-नरवर !, इअ वयणांडबरेण काउरिसा। भज्जंति तुह सरेहिवि, मह हिययं कंपए नेव ॥४४७॥

तदा धवलो भणति- हु इति निश्चये, एवं न सम्भवत्येव-गतस्य पश्चाद्वलनं कुतोऽपि इत्यर्थः,तथापि यो मम सर्वस्वं वालयति तस्मै अहं सर्वस्वस्य-सर्वद्रव्यस्य अर्धं ददामि, अत्र परमपुरुषः-परमेश्वरः प्रमाणं-साक्षीत्यर्थः ॥४४३॥ ततः-तदनन्तरं धनुः-कोदण्डं करे-हस्ते यस्य स धनुःकरः, तथांऽसयोः-स्कन्धयोः अनुबद्धौ-पश्चाद्बद्धौ उभौ-द्वौ तूणीरौ-शराश्रयौ येन स एवंविधः कुमारः एकाकी सन् पृष्ठौ गत्वा महाकालं राजानं जल्पयति ॥४४४॥ कथं जल्पयतीत्याह-भो बर्बराधिप ! इदानीं-साम्प्रतं एवम्-अमुना प्रकारेण गन्तुं त्वया न लभ्यते- न प्राप्यते, तस्माद्वलित्वा क्षणमात्रमेकस्य मम बलं प्रेक्षस्व ॥४४५॥ ततो वलितो महाकालः प्रभणति-प्रकर्षेण वक्ति, त्वं बालोऽसि पुनः दर्शनीयोऽसि-द्रष्टुं योग्योऽसि तथा (वराणि-श्रेष्ठानि) रूपं च लक्षणानि च धरतीति धर एवंविधस्त्वम् एकः- एकाकी मुधिकया-वैयर्थ्येन किं म्रियसे ?॥४४६॥ तदा कुमारोऽपि भणति-हे नरवर-हे राजन्! इत्येतद्वचनाडम्बरेण कापुरुषाः-कातरा नरा भज्यन्ते, मम हृदयं तव शरैः-बाणैरपि नैव कम्पतेऽतो वृथा वागाडम्बरं मा कृथाः- ममापि हस्तौ पश्येत्यर्थः ॥४४७॥

इअ भणिऊण कुमारो, अप्फालेऊण धणुमहारयणं । मिल्हंतो सरनिअरं, पाडइ केउं नरिंदस्स ॥४४८॥
तो बब्बरसुहडेहिं, विहिओ सरमंडवो गयणमग्गे । तहवि न लग्गइ अंगे, इक्कोवि सरो कुमारस्स ॥४४९॥
कुमरसरेहिं ताडिअ-देहा ते बब्बराहिवइसुहडा । केऽवि हु पडंति केवि हु, भिडंति नासंति केवि पुणो ॥४५०॥
महकालोवि नरिंदो, मिल्हइ सयहत्थियं सहत्थेणं । सोवि न लग्गइ ओसहि-पभावओ कुमरअंगंमि ॥४५१॥
तो वेगेणं कुमरो, गहिउं सयहत्थियं तयं चेव । अप्फालिऊण पाडइ, भूमीए बब्बराहिवइं ॥४५२॥

इत्येवं भणित्वा-उक्त्वा कुमारः स्वकीयं धनुर्महारत्नं आस्फाल्य शरनिकरं-बाणसमूहं मुञ्चन्-बाणवृष्टिं कुर्व्वन्नित्यर्थः, नरेन्द्रस्य-राज्ञः केतुं-पुरोवर्त्तिध्वजं पातयति ॥४४८॥ ततो बर्ब्बरदेशाधिपसुभटैर्गगनमार्गे - आकाशमार्गे शराणां-बाणानां मण्डपो विहितः-कृतः, तथापि कुमारस्य अङ्गे एकोऽपि शरो न लगति ॥४४९॥ कुमारस्य शरैस्ताडितो देहो येषां ते एवंविधास्ते बर्ब्बराधिपतेः सुभटाः केऽपि पतन्ति, केऽपि च 'भिडन्ती'ति अन्योऽन्यं शरीरसंस्पर्शेन एकत्रीभवन्ति, केऽपि पुनर्नश्यन्ति-पलायन्ते ॥४५०॥ महाकालोऽपि नरेन्द्रो-राजा स्वहस्ते भवं सौवहस्तिकं-शस्त्रविशेषं स्वहस्तेन मुञ्चति, सोऽपि शस्त्रविशेषः औषधिप्रभावतः कुमारस्य अङ्गे न लगति ॥४५१॥ ततः कुमारो वेगेन तदेव राज्ञः सौवहस्तिकं शस्त्रं गृहीत्वा आस्फाल्य च बर्ब्बराधिपतिं भूमौ पातयति ॥४५२॥

तं बंधिऊण कुमरो, आणइ जा निअयसत्थपासंमि । तं दट्ठुं ते नट्ठा, सत्थाहिवरक्खगा पुरिसा ॥४५३॥
धवलो बंधविमुक्को, खग्गं घित्तूण धावए सिग्घं । महकालमारणत्थं, सिरिपालो तं निवारेइ ॥४५४॥
गेहागयं च सरणागयं च बद्धं च रोगपरिभूयं । नस्संतं बुड्ढं बालयं च न हणंति सप्पुरिसा ॥४५५॥
जे दससहस्ससुहडा, बब्बरसुहडेहिं ताडिया नट्ठा । तेसिं रुट्ठो सिट्ठी, जीवणवित्तीउ भंजेइ ॥४५६॥
ते सव्वेवि हु कुमरस्स तस्स मुहिआइ सेवगा जाया । कुमरेण ते निउत्ता, निअभागागयपवहणेसु ॥४५७॥

ततस्तं-राजानं बद्ध्वा कुमारो यावत् निजकसार्थपार्श्वे आनयति तावत्तं स्वनृपं बद्धं दृष्ट्वा ते सार्थाधिपस्य-धवलस्य रक्षकाः पुरुषा नष्टाः- पलायिताः ॥४५३॥ अथ धवलो बन्धविमुक्तः सन् खड्गं गृहीत्वा महाकालस्य राज्ञो मारणार्थं शीघ्रं-सत्वरं धावति, तदा श्रीपालकुमारस्तं धवलं निवारयति-वर्ज्जयति ॥४५४॥ किमुक्त्वा निवारयतीत्याह- अहो श्रेष्ठिन् ! गेहागतं-स्वगृहमागतं च - पुनः शरणागतं च - पुनः बद्धं च - पुनः रोगेण परिभूतं-पीडितं पुनर्नश्यन्तं-पलायमानं तथा वृद्धं-जरसाभिभूतं च - पुनः बालकमेतान् पुरुषान् वैरिणोऽपि सत्पुरुषा न घ्नन्ति-न मारयन्ति, इति नीतिवचनात् अयमपि गृहागतत्वेन बद्धत्वेन च अवध्य इति भावः ॥ ४५५॥ ये दशसहस्रसुभटा बर्बरभूपसुभटैस्ताडिताः सन्तो नष्टाः तेषामुपरि श्रेष्ठी रुष्टः सन् तेषां जीवनवृत्तीर्भनक्ति-निषेधयति ॥४५६॥ ततस्ते सर्वेऽपि भटा अन्यां गतिमलभमानाः तस्य कुमारस्य मुधिकया-विना मूल्येनैव सेवका जाताः, तदा कुमारेण ते सुभटा निजभागे आगतेषु प्रवहणेषु-पोतेषु नियुक्ता-अधिकारिणः कृताः ॥४५७॥

सयमेव महाकालं, बंधाओ मोइऊण सिरिपालो । निअभागपवहणाणं, वत्थाईहिं तमच्चेइ ॥४५८॥
सव्वेवि हु ते सुहडा, पहिरावेऊण पवरवत्थेहिं । संतोसिऊण मुक्का, कुमरेण विवेअवंतेण ॥४५९॥
महकालोवि हु दट्ठूण तस्स कुमरस्स तारिसं चरिअं । चित्ते चमक्किओ तं, अब्भत्थइ विणयवयणेहिं ॥४६०॥
पुरिसुत्तम ! मह नयरं, नियचरणेहिं तुमं पवित्ते ह । अम्हेवि जेण तुम्हं, नियभत्तिं किंपि दंसेमो ॥४६१॥
कुमरो दक्खिन्ननिही, जा मन्नइ ता पुणो धवलसिट्ठी ॥ वारेइ घणं कुमरं, सव्वत्थवि संकिया पावा ॥४६२॥

अथ श्रीपालः स्वयमेव महाकालं-राजानं बन्धनात् मोचयित्वा निजभागप्रवहणानां वस्त्रादिभिः-तन्मध्यगतवस्त्राभरणादिकैस्तं-महाकालं नृपम् अर्चति-सत्करोति ॥४५८॥ पुनर्विवेकवता कुमारेण ते सर्वेऽपि सुभटाः प्रवरवस्त्रैः परिधाप्य सन्तोष्य मुक्ताः॥ ४५९॥ महाकालोऽपि नृपस्तस्य-कुमारस्य तादृशं चरितम्-आचारं दृष्ट्वा चित्ते चमत्कृतः-चमत्कारं प्राप्तः सन् तं कुमारं विनययुक्तवचनैः अभ्यर्थयते-प्रार्थयते ॥४६०॥ हे पुरुषोत्तम ! त्वं निजचरणैर्मम नगरं पवित्रय-पवित्रीकुरु येन कारणेन वयमपि युष्मभ्यं कामपि निजभक्तिं दर्शयामः ॥४६१॥ दाक्षिण्यं-परचित्तानुकूल्यं तस्य निधिः-निधानं कुमारो यावन्मन्यते-नृपवचनमङ्गीकुरुते तावत्पुनः धवलश्रेष्ठी कुमारं घनं-प्रचुरं वारयति शत्रुगृहे सर्वथा न गन्तव्यमित्यादिवाक्यैः, कथमित्यत्राह-यतः पापाः -दुष्टाः प्राणिनः सर्वत्रापि शङ्किताः स्युः ॥४६२॥

वारंतस्सवि धवलस्स तस्स कुमरो समत्थपरिवारो । पत्तो महकालपुरं, तोरणमंचाइकयसोहं ॥४६३॥
महकालो तं कुमरं, भत्तीइ नियासणंमि ठावित्ता ॥ पभणेइ इमं रज्जं, मह पाणावि हु तुहायत्ता ॥ ४६४॥
अन्नं च मज्झ पुत्ती, पाणेहिंतोऽवि वल्लहा अत्थि । नामेण मयणसेणा, तं च तुमं पसिय परिणेसु ॥४६५॥
कुमरेणं भणियमहं, विदेसिओ तह अनायकुलसीलो । तस्स कहं नियकन्ना, दिज्जइ ? सम्मं विआरेसु ॥४६६॥
पभणेइ महाकालो, आयारेणावि तुह कुलं नायं । न य कारणं विएसो, कुणसु इमं पत्थणं सहलं ॥४६७॥

तस्य धवलस्य वारयतोऽपि सतः-एतावता वारयन्तमपि धवलमनादृत्येत्यर्थः समस्तः-संपूर्णः परिवारो यस्य स एवंविधः कुमारो महाकालभूपस्य पुरं प्राप्तः, कीदृशं पुरं ?-तोरणमञ्चादिभिः कृता शोभा यस्य तत् तथोक्तम् ॥४६३॥ अथ महाकालो नृपस्तं कुमारं भक्त्या निजासने स्थापयित्वा-उपवेश्य प्रकर्षेण भणति- इदं राज्यं त्वदायत्तं-तवाधीनमस्ति, किं बहुना ?, हु इति निश्चितं, मम प्राणा अपि त्वदायत्ताः -त्वदधीनाः सन्ति ॥४६४॥ अन्यच्च- प्राणेभ्योऽपि वल्लभा नाम्ना मदनसेना मम पुत्री अस्ति, तां च मम पुत्रीं त्वं प्रसद्य-प्रसन्नीभूय परिणयस्व ॥४६५॥ कुमारेण भणितम्- अहं वैदिशिकस्तथाऽज्ञाते कुलशीले यस्य सोऽज्ञातकुलशीलोऽस्मि, तस्मै मह्यं निजकन्या कथं दीयते ?, सम्यग् विचारय ॥४६६॥ एवं कुमारेणोक्ते सति महाकालः प्रभणति- अस्माभिस्तु आचारेणापि तव कुलं ज्ञातं, पुनस्त्वया स्वस्य वैदेशिकत्वमुक्तं तत्रोच्यते- न च विदेशः कारणं कन्याऽप्रदाने इति शेषः, तस्मात् इमां प्रार्थनां सफलां कुरुष्व ॥४६७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आमंति कुमारेणं, भणिए महया महुस्सवेण निवो । परिणावइ नियधूयं देइ सिरिं भूरिवित्थारं ॥४६८॥
नवनाडयाइं दाइज्जयंमि दाऊण चारुवत्थेहिं । परिहावइ परिवारं, कुमरेण सहागयं सयलं ॥४६९॥
एगं च महाजुंगं , वाहणरयणं च मंदिरे पत्तं । काऊण कुमरसहिओ, रायावि समागओ तत्थ ॥४७०॥
सिट्ठीवि महाजुंगं, दट्ठुं चउसट्ठिकूवयसणाहं । मणिकंचणपडिपुन्नं, चिन्तइ नियमंमि हिययंमि ॥४७१॥

तदा कुमारेण [1]आममिति भणिते सति-अङ्गीकृतमित्युक्ते सति महता महोत्सवेन-अतिमहोत्सवेन नृपो-महाकालभूपो निजपुत्रीं परिणाययति-उद्वाहयति, भूरिः-बहुर्विस्तारो यस्याः सा भूरिविस्तारा तां श्रियं-लक्ष्मीं ददाति ॥४६८॥ परिणयनकाले वधूवरयोर्देयद्रव्ये नवसङ्ख्यानि नाटकानि दत्त्वा कुमारेण सह-सार्द्धमागतं सकलं-समस्तं परिवारं चारु वस्त्रैः-मनोज्ञदुकूलादिभिः परिधापयति ॥४६९॥ च - पुनः एकं महाजुङ्गनामकं वाहनरत्नं-प्रधानयानपात्रं बिन्दरे प्राप्तं कृत्वा कुमारसहितो राजापि तत्र-बिन्दरे समागतः ॥४७०॥ अथ धवलाख्यश्रेष्ठी अपि चतुष्षष्ट्या कूपकैः-कूपस्तम्भैः सनाथं-सहितं पुनः मणिकाञ्चनैः प्रतिपूर्णं महाजुङ्गं यानपात्रं दृष्ट्वा निजके-स्वकीये हृदये-मनसि चिन्तयति-विचारयति । किं चिन्तयति ? इत्याह- ॥४७१॥

१ आमिति निपातोऽङ्गीकारार्थे ॥

For Private and Personal Use Only

अहह किमेयं जायं, जं एसो मज्झ सेवगसमाणो । सामित्तमिमं पत्तो भाडयमित्तं न मे दाही ॥४७२॥
इअ चिंतिय सो जायइ, कुमरं गयमासभाडयं सोऽवि । दावेइ दसगुणं तं, ही केरिसमंतरं तेसिं? ॥४७३॥
आरोविऊण कुमरं, तत्थ महापवहणे सपरिवारं । मुकलाविऊण धूयं, महकालो जाइ नियनयरिं ॥४७४॥
पोएण जणा जलहिं, लंघिय पावंति रयणदीवं तं । जह संजमेण मुणिणो, संसारं तरिय सिवठाणं ॥४७५॥
तत्थ य पोए तडमंदिरेसु गुरुनंगरेहिं थंभित्ता । उत्तारिऊण भंडं, पडमंडवमंडले ठवियं ॥४७६॥

अहहेति खेदे, एतत् किं जातं यत्-यस्मात्कारणात् एषः- श्रीपालो मम सेवकसमानः-अनुचरतुल्य इदं-स्वामित्वं प्राप्तः, अथ भाटकमेव-भाटकमात्रं मे-मह्यं न दास्यति ॥४७२॥ इति चिन्तयित्वा-विचार्य सः-धवलः कुमारं गतमासस्य भाटकं याचते, सः-कुमारोऽपि तद् भाटकं दशगुणं दापयति, ही इति विस्मये, तयोर्द्वयोः-कुमारश्रेष्ठिनोः कीदृशमन्तरं ?, महान् भेद इत्यर्थः ॥४७३॥ अथ महाकालो राजा तत्र महाप्रवहणे-बृहद्यानपात्रे सपरिवारं कुमारमारोप्य पुत्रीं मुकलाप्य-पुत्र्या मुकलापं कृत्वा निजनगरीं याति ॥४७४॥ जना-लोकाः पोतेन-प्रवहणेन जलधिं-समुद्रं लङ्घित्वा तं प्रसिद्धं रत्नद्वीपं प्राप्नुवन्ति, तत्र दृष्टान्तमाह- यथा मुनयः संयमेन संसारं तीर्त्वा शिवस्थानं-मुक्तिपदं प्राप्नुवन्ति तथेत्यर्थः ॥४७५॥ तत्र च-रत्नद्वीपे तटबिन्दरेषु पोतान् गुरुनङ्गरैः-लोहमयबृहत्पोतस्तम्भनोपकरणैः स्तम्भित्वा-रुद्ध्वा तन्मध्यस्थं भाण्डं-क्रयाणकमुत्तार्य पटमण्डपानां-पटगृहाणां मण्डले-समूहे स्थापितम् ॥४७६॥

१ मुकलाप इत्ययं देशीवचनः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुमरोवि सपरिवारो, पडवंसावासमज्झमासीणो । पिक्खेइ नाडयाइं, विमाणमज्झट्ठियसुरुव्व ॥४७७॥
सिट्ठीवि तंमि दीवे, बहुलाभं मुणिय विन्नवइ कुमरं । देव! निअवाहणाणं, कयाणगे किं न विक्केह ? ॥४७८॥
तो भणइ कुमारो ताय ! अम्हतुम्हाण अंतरं नत्थि । तं चिअ कयाणगाणं, जं जाणसि तं करिज्जासु ॥४७९॥
हिट्ठो सिट्ठी चिंतइ, हुं हुं निअजाणियं करिस्सामि । जेण कयविक्कओ च्चिय, वणिणो चिंतामणिं बिंति ॥४८०॥
इत्तो अ कोऽवि पुरिसो, सुरसरिसो चारुरूवनेवत्थो । सुपसन्ननयणवयणो, उत्तमहयरयणमारूढो ॥४८१॥

कुमारोऽपि स्वपरिवारसहितः पटवंशावासमध्यं-वंशयुक्तपटगृहस्य मध्ये आसीनः-उपविष्टः सन् नाटकानि प्रेक्षते-पश्यति,क इव ?-विमानमध्यस्थितः सुरो-देव इव ॥४७७॥ श्रेष्ठी अपि तस्मिन् द्वीपे बहुलाभं मुणित्वा-ज्ञात्वा कुमारं विज्ञपयति-हे देव ! - हे महाराज ! निजवाहनानां-स्वकीयपोतानां क्रयाणकानां किं नाम-कथं न विक्रीणासि ॥४७८॥ ततः कुमारो भणति-हे तात! अस्माकं युष्माकं च अन्तरं नास्ति, त्वमेव क्रयाणकानां यज्जानासि तत् कुरुष्व ॥४७९॥ एतत् श्रीपालवचः श्रुत्वा श्रेष्ठी हृष्टः सन् चिन्तयति- अथाहं निजज्ञातं करिष्यामि, येन कारणेन वणिजो-व्यापारिणः क्रययुक्तो विक्रयः-क्रयविक्रयः, क्रयविक्रय एव चिन्तामणिं- वाञ्छितार्थसाधकरत्नं ब्रुवन्ति लोकाः ॥४८०॥ इतश्च कोऽपि पुरुषः सुरसदृशो-देवतुल्यः, पुनः रूपम् - आकृतिः नेपथ्यं-वेषः चारुणी-मनोज्ञे रूपनेपथ्ये यस्य सः, पुनः नयने च वदनं च नयनवदनं, सुप्रसन्नं नयनवदनं-नेत्रमुखं यस्य सः, पुनः उत्तमं हयरत्नम्-अश्वरत्नम् आरूढः ॥४८१॥

For Private and Personal Use Only

बहुपरिअरपरिअरिओ, पत्तो कुमरस्स गुड्डरदुवारं । पिक्खेइ नाडयं जा, तो सो कुमरेण आहूओ ॥४८२॥
सो कयकुमरपणामो, आसणदाणेण लद्धसम्माणो । विणयपरो वीसत्थो, उववि‍ट्ठो कुमरपासंमि ॥४८३॥
सुरपिच्छणयसरिच्छं, तं पिच्छणयं पलोइऊण खणं । चिंतइ एस इमाए, लीलाए कोऽवि रायसुओ ॥४८४॥
थक्कंमि नाडए सो, पुट्ठो कुमरेण कोऽसि भद्द ! तुमं ? । कत्थ पुरे तुह वासो ?, दिट्ठं अच्छेरयं किंपि ? ॥४८५॥
सो जंपइ विणयपरो, कुमरं पइ देव ! इत्थ दीवंमि । सेलोऽत्थि रयणसाणू, वलयागारेण गुरुसिहरो ॥ ४८६ ॥

पुनः बहुपरिकरेण-बहुपरिवारेण परिकरितः-परिवृतः ईदृशः कुमारस्य गुड्डरद्वारं-पटावासद्वारं प्राप्तः सन् यावन्नाटकं प्रेक्षते तावत् कुमारेण स पुरुषः आहूतः-स्वपार्श्वे आकारितः ॥४८२॥ स पुरुषः कृतः कुमारस्य प्रणामो-नमस्कारो येन सः, तथा आसनदानेन लब्धः सन्मानो येन सः, कुमारेणासनं दापितं तेन प्राप्तसन्मान इत्यर्थः, पुनः विनयपरो-नम्रताकरणतत्परः, तथा विश्वस्तः-सुस्थचित्तः, एवंविधः सन् कुमारपार्श्वे उपविष्टः ॥४८३॥ सुरप्रेक्षणकेन-देवनाटकेन सदृशं तत्प्रेक्षणकं-नृत्यं क्षणं यावत् प्रलोक्य-दृष्ट्वा चिन्तयति-विचारयति, अनया लीलया एष कोऽपि राजसुतोऽस्ति ॥४८४॥ अथ नाटके पूर्णीभूते सति स पुरुषः कुमारेण पृष्टः- हे भद्र ! त्वं कोऽसि ? कुत्र पुरे तव वासो-निवासोऽस्ति, तथा किमपि आश्चर्यं दृष्टं ?, दृष्टं चेत्कथयेति भावः ॥४८५॥ एवं कुमारेण पृष्टे सति स पुमान् विनयपरः सन् कुमारं प्रति जल्पति-कथयति, हे देव !-हे महाराज ! अत्र-अस्मिन् द्वीपे वलयाकारेण-कटकाकृत्या रत्नसानुर्नाम शैलः-पर्वतोऽस्ति, कीदृशः ? गुरूणि-महान्ति शिखराणि यस्य स गुरुशिखरः ॥४८६॥

तम्मज्झकयनिवेसा, अत्थि पुरी रयणसंचयानाम । तं पालइ विज्जाहरराया सिरिकणयकेउत्ति ॥४८७॥
तस्सत्थि कणयमाला, नाम पिया तीइ कुच्छिसंभूया । कणयपह-कणयसेहर-कणयज्झय- कणयरुइ पुत्ता ॥४८८॥
तेसिं च उवरि एगा, पुत्ती नामेण मयणमंजूसा । सयलकलापारीणा, अइरइरूवा मुणियतत्ता ॥४८९॥
तत्थ य पुरीइ एगो, जिणदेवो नाम सावगो तस्स । पुत्तोऽहं जिणदासो, कहेमि चुज्जं पुणो सुणसु ॥ ४९०॥
सिरिकणयकेउरन्नो, पियामहेणित्थ कारिअं अत्थि । गिरिसिहरसिरोरयणं, भवणं सिरिरिसहनाहस्स । ४९१॥

तन्मध्ये-तस्य गिरेर्मध्यभागे कृतो निवेशो-रचना यस्याः सा एवंविधा रत्नसञ्चयानाम पुरी-नगरी अस्ति, तां पुरीं श्री-कनककेतुरितिनाम्ना विद्याधराणां राजा पालयति ॥४८७॥ तस्य राज्ञः कनकमालानाम प्रियाऽस्ति, तस्याः कुक्षौ सम्भूता-उत्पन्नाः कनकप्रभ १ कनकशेखर २ कनकध्वज ३ कनकरुचि ४ नामानश्चत्वारः पुत्राः सन्ति ॥४८८॥ च - पुनस्तेषां चतुर्णां पुत्राणामुपरि नाम्ना मदनमञ्जूषा एका पुत्री अस्ति, सा कीदृशी ?-सकलकलासु पारीणा-पारं प्राप्तवती पुनः अतिक्रान्तं रतेः-कामस्त्रिया रूपं-सौन्दर्यं यया सा तथा मुणितं-ज्ञातं तत्त्वं यया सा ॥४८९॥ तस्यां च पुर्यामेको जिनदेवो नाम श्रावकोऽस्ति, तस्य-जिनदेवस्य पुत्रोऽहं जिनदासोऽस्मि, चोद्यम्-आश्चर्यं पुनः अहं कथयामि, त्वं श्रुणु ॥४९०॥ श्री कनककेतुराजस्य पितामहेन-पितुः पित्रा अत्र गिरिशिखरशिरोरत्नं श्रीऋषभनाथस्य भवनं-मन्दिरं कारितमस्ति ॥४९१॥

तं च केरिसं ?-

संतमणोरहतुंगं, उत्तमनरचरियनिम्मलविसालं । दायारसुजसधवलं, रविमंडलदलिअतमपडलं । ४९२॥

तम्मज्झे रिसहेसरपडिमा कणयमणिनिम्मिआ अत्थि । तिहुअणजणमणजणिआऽऽणंदा नवचंदलेहव्व ॥४९३॥

तं सो खेयरराया, निच्चं अच्चेइ भत्तिसंजुत्तो । लोओऽवि सप्पमोओ नमेइ पूएइ झाएइ ॥४९४॥

सा नरवरस्स धूया, विसेसओ तत्थ भत्तिसंजुत्ता । अट्ठपयारं पूयं, करेइ निच्चं तिसंझासु ॥ ४९५॥

तच्च कीदृशमित्याह- सतां-सत्पुरुषाणां ये मनोरथास्तद्वत्तुङ्गम्-उच्चं, पुनरुत्तमनराणां यच्चरितम्-आचारस्तद्वन्निर्मलं विशालं च-विस्तीर्णं तथा दातुर्यत् सुष्ठु-शोभनं यशस्तद्वद्धवलं, पुनः रविमण्डलं- सूर्यमण्डलं तद्वत् दलितं-खण्डितं तमःपटलम्-अन्धकारवृन्दं येन तत् ॥४९२॥ तन्मध्ये-तस्य मन्दिरस्य मध्ये कनकमणिभिः-स्वर्णरत्नैर्निर्मिता-रचिता ऋषभेश्वरस्य प्रतिमा-मूर्त्तिरस्ति, कीदृशी ? इत्याह- नवा-नवीना चन्द्रस्य लेखा इव त्रिभुवनजनानां-त्रैलोक्यलोकानां मनस्सु जनित-उत्पादित आनन्दो-हर्षो यया सा ईदृशी अस्ति ॥४९३॥ स खेचराणां-विद्याधराणां राजा खेचरराजो भक्त्या संयुक्तः सन् तां जिनप्रतिमां नित्यम् अर्चयति-पूजयति,लोकोऽपि-नगरवासिजनोऽपि सह प्रमोदेन-हर्षेण वर्तते इति सप्रमोदः सन् तां नमति पूजयति ध्यायति च ॥ ४९४॥ सा प्रागुक्ता मदनमञ्जूषानाम्नी नरवरस्य-राज्ञः पुत्री विशेषतो भक्तिसंयुक्ता सती तत्र-जिनगृहे त्रिसन्ध्यासु नित्यम् अष्टप्रकाराम्-अष्टविधां पूजां करोति ॥४९५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्नदिणे विहिनिउणा, सा नरवरनंदिणी सपरिवारा । कयविहिवित्थरपूया, भावजुया वंदए देवे ॥४९६॥
ताव नरिंदोवि तहिं, पत्तो पूयाविहिं पलोयंतो । हरिसेण पुलइअंगो, एवं चिंतइ हिययंमि ॥४९७॥
अहो अपुव्वा पूया, रइया एयाइ मज्झ धूयाए । अहो अपुव्वं च नियं, विन्नाणं दंसियमिमीए ॥४९८॥
एसा धन्ना कयपुन्निआ जीए जिणिंदपूयाए । एरिसओ सुहभावो दीसइ सरलो अ सुहहावो ॥४९९॥

अन्यस्मिन् दिने विधौ-पूजाविधौ निपुणा-चतुरा सा नरवरस्य नन्दिनी-पुत्री परिवारेण सह वर्त्तते इति सपरिवारा तथा विधेर्विस्तरो विधिविस्तरः कृतः विधिविस्तरेण पूजा यया सा कृत० पुनर्भावेन युता एवंविधा सती देवान् वन्दते, देववन्दनं करोतीत्यर्थः ॥४९६॥ तावन्नरेन्द्रोऽपि पूजाविधिं प्रलोकयन्-प्रकर्षेण विलोकयन् तत्र जिनगृहे प्राप्तः विशिष्टपूजादर्शनात् हर्षेण पुलकितं-रोमोद्गमयुक्तमङ्गं यस्य स ईदृशः सन् हृदये एवं चिन्तयति ॥ ४९७॥ यथा राजा चिन्तयति तथाऽऽह- अहो इति आश्चर्ये, एतया मम पुत्र्याऽपूर्वा पूजा रचिता, ईदृशी पूजा पूर्वं कदापि न दृष्टेत्यर्थः, पुनरहो इति आश्चर्येऽनया मत्पुत्र्याऽपूर्वं निजं-स्वकीयं विज्ञानं-कलाकौशलं दर्शितम् ॥४९८॥ एषा मत्पुत्री धन्या, च - पुनः कृतपुण्याऽस्ति कृतं पुण्यं यया सा, यस्या जिनेन्द्रपूजायामीदृशः शुभभावो वर्त्तते, च- पुनर्यस्याः सरल-ऋजुः सुष्ठु-शोभनः स्वभावो दृश्यते ॥४९९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थिरयापभावणाकोसलत्तभत्तीसुतित्थसेवाहिं । सालंकारमिमीए, नज्जइ चित्तंमि संमत्तं ॥५००॥
ता एयाए एयारिसीइ धूयाइ हवइ जइ कहवि । अणुरूवो कोइ वरो, ता मज्झ मणो सुही होइ ॥५०१॥
एवं निअधूयाए, वरचिंतासल्लसल्लिओ राया । अच्छइ खणं निसन्नो, सुन्नमणो झाणलीणुव्व ॥५०२॥
सावि हु नरिंदधूया, पूयं काऊण विहियतिपणामा । नीसरइ जाव पच्छिमपएहिं जिणगब्भगेहाओ ॥५०३॥
तक्कालं तह मिलिअं, तद्दारकवाडसंपुटं कहवि । केणवि जह बलिएणवि, पणुल्लियं उग्घडइ नेव ॥५०४॥

स्थिरता-धर्मे स्थिरत्वं १ प्रभावना-धर्मोद्दीपकत्वं २ कुशलत्वं- जिनप्रवचने निपुणत्वं ३ भक्तिः- जिनादिषु आन्तरप्रीतिः ४ सुतीर्थसेवा- स्थावरजङ्गमशोभनतीर्थसेवनम् ५, एतैः पञ्चभिरलङ्कारैः अस्याश्चित्ते सम्यक्त्वम् अलङ्कारैः सह वर्त्तते इति सालङ्कारं ज्ञायते ॥५००॥ तस्मात् एतादृश्या एतस्या मम पुत्र्या अनुरूपो-योग्यः यदि कोऽपि वरो-भर्त्ता भवति, तत् - तर्हि मम मनः सुखि-सुखभाग् भवति ॥५०१॥ एवम् - अमुना प्रकारेण निजपुत्र्या वरस्य चिन्ता एव शल्यं तेन शल्यितः शल्ययुक्तो राजा क्षणं यावत् ध्यानलीनो-ध्यानलग्न इव शून्यं मनो यस्य स शून्यमनाः सन् निषण्ण-उपविष्टः 'अच्छति'त्ति-अवतिष्ठते ॥५०२॥ सा नरेन्द्रस्य-राज्ञः पुत्री अपि पूजां कृत्वा विहिताः कृतास्त्रयः प्रणामा यया सा एवंविधा सती यावत् जिनस्य गर्भगृहात्-मूलमण्डपात् पश्चिमपदैर्निःसरति ॥५०३॥ तावत् तत्कालं तस्य-जिनगर्भगृहस्य द्वारे यत्कपाटसम्पुटं तत् कथमपि-केनापि प्रकारेण तथा मिलितं यथा केनापि बलिकेन-बलवतापि प्रणोदितं-प्रेरितं सत् नैव उद्घटते ॥५०४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्तो सा निवधूया, अप्पं निंदेइ गरुअसंतावा । हाहा अहं हयासा, किंकयपावा असुहभावा ? ॥५०५॥
जेण मए पावाए, पमायलग्गाइ मंदभग्गाए । संकरकयाइ पूयाइ दंसणं खणमवि न लद्धं ॥५०६॥
ही ही अहं अहन्ना, अन्नाणवसेण कम्मदोसेणं । आसायणंपि काहं, किंपि धुवं वंचिया तेण ॥५०७॥
एवं ममावराहं, खमसु तुमं नाह ! कुणसु सुपसायं । मह पुन्नविहीणाए, दीणाए दंसणं देसु ॥५०८॥
एवं तं रुयमाणिं, दट्ठूणं नंदिणिं भणइ राया । वत्थे! तुहावराहो, नत्थि इमो किंतु मह दोसो ॥५०९॥

ततः-तदन्तरं सा नृपपुत्री गुरुको-बहुः सन्तापो यस्याः सा एवंविधा सती आत्मानं निन्दति, कथमित्याह- हा हा इति खेदेऽहं हताशा जाता हता आशा-इच्छा यस्याः सा, कीदृशी अहं ?- अशुभभावात् किमपि कृतं पापं यया सा किंकृतपापा ॥५०५॥ येन कारणेन मया पापया प्रमादे लग्नया पुनर्मन्दभाग्यया सत्या सङ्करेण- शुभाशुभरूपमिश्रभावेन कृतया पूजया दर्शनं- प्रभोर्निरीक्षणं क्षणमपि न लब्धं- न प्राप्तम् ॥५०६॥ ही हीति खेदेऽहमधन्याऽस्मि अज्ञानवशेन कर्म्मदोषेण कामपि आशातनां- विराधनामपि अकार्ष-कृतवती अस्मि तेन कारणेन ध्रुवं-निश्चितं वञ्चिताऽस्मि ॥५०७॥ हे नाथ ! एवं ममापराधं क्षमस्व, त्वं सुष्ठु-शोभनं प्रसादम्-अनुग्रहं कुरुष्व, पुण्यविहीनायै दीनायै मह्यं दर्शनं दत्स्व ॥५०८॥ एवं-अमुना प्रकारेण रुदन्तीं -रोदनं कुर्वाणां तां पुत्रीं दृष्ट्वा राजा भणति- हे वत्से ! अयं तवापराधो नास्ति, किन्तु मम दोषोऽस्ति ॥५०९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जं जिणहरमज्झगओ, तुहकयपूअं निरिक्खमाणोऽवि । जाओऽहं सुन्नमणो, तुह वरचिंताइ खणमिक्कं ॥५१०॥
तीए य मणोणेगत्तरूवआसायणाइ फलमेयं । संजायं तेण अहं, निआवराहं वियक्केमि ॥५११॥
देवो अ वीयराओ, नेवं रूसेइ कहवि किंतु इमं । जिणभवणाहिट्ठायगकयमपसायं मुणसु वच्छे ! ॥५१२॥
तत्तो नरेहिं आणाविऊण बलिकुसुमचंदणाईयं । कप्पूरागुरुमयनाहिधूवरूवं च वरभोगं ॥५१३॥
राया धूयाइजुओ, धूवकडुच्छेहिं कुणइ भोगविहिं । निम्मलचित्तो निच्चलगत्तो तत्थेव उवविट्ठो ॥५१४॥

कथमित्याह- यत् अहं जिनगृहमध्यगतः त्वया कृता या पूजा तां निरीक्षमाणोऽपि तव वरस्य चिन्तया एकं क्षणं यावत् शून्यं मनो यस्य स शून्यमना जातः ॥५१०॥ तस्याश्च मनसोऽनेकस्वरूपाया आशातनाया एतत्-जिनगृहद्वारपिधानलक्षणं फलं सञ्जातं तेन कारणेन अहं निजापराधं वितर्क्कयामि-चिन्तयामीत्यर्थः ॥५११॥ देवश्च वीतराग एवं कथमपि न रुष्यति-न रोषं प्राप्नोति, किन्तु हे वत्से ! जिनभवनस्य अधिष्ठायको यो देवस्तेन कृतम् अप्रसादम् - अप्रसन्नत्वं त्वं मुण-जानीहि ॥५१२॥ ततः-तदनन्तरं बलये-पूजानिमित्तं कुसुमचन्दनादिकं नरेभ्यः- सेवकलोकेभ्यः आनाय्य च- पुनः कर्प्पूरागुरुमृगनाभीनां-घनसारागरुकस्तूरीणां यो धूपस्तद्रूपं-तत्स्वरूपं वरं-प्रधानं भोगं-देवयोग्यं द्रव्यं-आनाय्य ॥५१३॥ राजा पुत्र्या युतः-सहितो धूपकडुच्छैर्भोगविधिं- धूपदानादिविधिं करोति, कीदृशः सन् ? -निर्म्मलं चित्तं यस्य स निर्म्मलचित्तः पुनः निश्चलं गात्रं-शरीरं यस्य स निश्चलगात्र एवंविधस्तत्रैव उपविष्टः सन् ॥ ५१४ ॥ युग्मम् ॥

For Private and Personal Use Only

उववासतिगं जायं, धूयासहियस्स नरवरिंदस्स । तो रंगमंडवोऽवि हु, रंगं नो जणइ जणहियए ॥५१५॥
सामंतमंतिपरिगह - पउरजणेसुवि विसन्नचित्तेसु । उवविट्ठेसु निरंतर- जलंतदिप्पंतदीवेसु ॥५१६॥
केवि हु दियंति कन्नाइ दूसणं केवि नरवरिंदस्स । एवं बहुप्पयारं, परप्परालावमुहरजणे ॥५१७॥
तइयाए रयणीए, पच्छिमजामंमि निज्झुणिसहाए । सहसत्ति गयणवाणी, संजाया एरिसी तत्थ ॥ ५१८ ॥
दोस न कोइ कुमारिअह, नरवर दोस न कोइ । जिण कारणे जिणहरु जडिओ, तं निसुणउ सहु कोइ ॥५१९॥

तत्रैवं कुर्वतः पुत्रीसहितस्य नरवरेन्द्रस्य-राजेश्वरस्य उपवासत्रिकं जातं ततो रङ्गमण्डपोऽपि जनानां-लोकानां हृदये रङ्गं-रागं न जनयति-उत्पादयति ॥५१५॥ सामन्ताश्च मन्त्रिणश्च परिग्रहश्च - तत्परिकर एव पौरजनाश्च-नगरवासिलोकास्तेष्वपि विषण्णं चित्तं येषां ते विषण्णाचित्तास्तेषु उपविष्टेषु सत्सु तथा निरन्तरं ज्वलत्सु अत एव दीप्यमानेषु दीपेषु सत्सु ॥५१६॥ केऽपि लोकाः कन्यायै दूषणं ददति, केऽपि नरवरेन्द्राय दूषणं ददति, एवम्-अमुना प्रकारेण बहु प्रकारं यथा स्यात्तथा परस्परम्-अन्योऽन्यं यः आलापो-भाषणं तेन मुखरे-दुर्मुखे जने-लोके सति ॥५१७॥ तृतीयस्या रजन्याः पश्चिमयामे- चतुर्थप्रहरे निर्गतो ध्वनिः-शब्दो यस्याः सा निर्ध्वनिः ईदृशी या सभा तस्याम्, तत्र रङ्गमण्डपे सहसेति-अकस्मात् ईदृशी - वक्ष्यमाणस्वरूपा गगनवाणी-आकाशवाक् सञ्जाता ॥५१८॥ तामेव दोहाछन्दसा आह- अत्र कुमार्या दोषः कोऽपि नास्ति, नरवरस्य-राज्ञोऽपि दोषः न, येन कारणेन जिनगृहं जटितं-पिहितं तत्कारणं सर्वः कोऽपि लोको निश्रुणोतु-आकर्णयतु ॥५१९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं सोऊणं बाला, संजाया हरिसजणिअरोमंचा । रायाविहु साणंदो, संजाओ तेण वयणेण ॥५२०॥
लोयावि सप्पमोआ, जाया सव्वेवि चिंतयंति अहो । किं कारणं कहिस्सइ ?, तत्तो वाणी पुणो जाया ॥५२१॥
जसु नरदिट्ठिइं होइसइ, जिणहरउ मुक्कदुवारु । सोइज मयणमंजूसियह, होइसइ भत्तारु ॥ ५२२॥
गाढयरं तो तुट्ठा, सव्वे चिंतंति कस्सिमा वाणी । एवं च कया होही तत्तो जाया पुणो वाणी ॥५२३॥
सिरिरिसहेसर ओलगिणि, हउं चक्केसरिदेवि । मासब्भंतरि तसु नरह, आविसु निच्छइ लेवि ॥५२४॥

तदनन्तरोक्तं वाक्यं श्रुत्वा बाला-राजकन्या हर्षेण जनित- उत्पादितो रोमाञ्चो-रोमोद्गमो यस्याः सा ईदृशी सञ्जाता, राजाऽपि तेन वचनेन सानन्द-आनन्दवान् सञ्जातः ॥५२०॥ लोका अपि सप्रमोदाः-सहर्षा जाताः सन्तः सर्वेऽपि चिन्तयन्ति-अहो इति आश्चर्ये, किं कारणं कथयिस्यति?, ततः-तदनन्तरं पुनर्वाणी जाता ॥५२१॥ यस्य नरस्य दृष्ट्या जिनगृहं मुक्तम्-उद्घटितं द्वारं यस्य तत् मुक्तद्वारं भविष्यति स एव नरो मदनमञ्जूषाया राजपुत्र्या भर्त्ता-वरयिता भविष्यति ॥५२२॥ ततः सर्वेऽपि लोका गाढतरम्-अत्यर्थं तुष्टाः सन्तश्चिन्तन्ति- कस्येयं वाणी अस्ति, च-पुनः कदा-कस्मिन्काले एवं भविष्यति, तत-एतच्चिन्तनानन्तरं पुनर्वाणी जाता ॥५२३॥ श्री ऋषभेश्वरस्य 'ओलगिणि'त्ति सेवाकर्त्री अहं चक्रेश्वरीदेवी अस्मि, मासाभ्यन्तरे-एकमासमध्ये तं पुरुषं लात्वा निश्चयेन आयास्यामि ॥५२४॥

इत्थंतरंमि जायं, विहाणयं वज्जिआइं तूराइं । रायावि सपरिवारो, समुट्ठिओ निअगिहं पत्तो ॥५२५॥
तत्तो कयगिहपडिमा-पूयाइविहीहिं पारणं विहियं । सव्वत्थवि वित्थरिया, सा वत्ता लोयमज्झमि ॥५२६॥
आवंति तओ लोया, सपमोया जिणहरस्स दारंमि । अणउग्घडिए तंमिवि, पुणोवि गच्छंति सविसाया ॥५२७॥
तं जिणहरस्स दारं, केणवि नो सक्कियं उघाडेउं । किंतु कओ बहुएहिंवि उग्घाडो निययकम्माणं ॥५२८॥
एवं च तस्स चेईहरस्स ढंकिअदुवारदेसस्स । संजाओ किंचूणो, मासो एयं तमच्छरियं ॥५२९॥
जइ पुण पुरिसुत्तम! तंसि चेव तं जिणहरस्स वरदारं । उग्घाडेसि धुवं तो, मिलिया चक्केसरीवाणी ॥ ५३०॥

अत्रान्तरे-अस्मिन्नवसरे 'विहाणय'न्ति विभातं-प्रभातं जातं, तूराणि-प्रातःकालोचितवाद्यानि वादितानि, राजापि सपरिवारः समुत्थितः सन् निजगृहं प्राप्तः ॥५२५॥ ततः कृतगृहप्रतिमापूजादिविधिभिः उपवासत्रयस्य पारणं विहितं-कृतं, सा वार्ता सर्वत्रापि लोकमध्ये विस्तृता-विस्तारं प्राप्ता ॥५२६॥ ततः -तदनन्तरं लोकाः सप्रमोदाः-सहर्षाः सन्तो जिनगृहस्य द्वारे आयान्ति-आगच्छन्ति,अपिः पादपूरणे, तस्मिन् द्वारेऽनुद्घटिते सति सह विषादेन वर्त्तन्ते इति सविषादाः सन्तः पुनरपि गच्छन्ति स्वस्वस्थानम् ॥५२७॥ तज्जिनगृहस्य द्वारं केनापि उद्घाटयितु नो शक्तं- न समर्थीभूतं, किन्तु बहुभिरपि लोकैर्निजककर्मणाम्-स्वकीयकर्मणाम् उद्घाटः कृतः ॥ ५२८॥ एवं च -अमुना प्रकारेण 'ढङ्किय' त्ति पिहितो द्वारदेशो यस्य स तथा एवंविधस्य तस्य चैत्यगृहस्य किञ्चिदूनो मासः सञ्जातः तदेतदाश्चर्यम् ॥ ५२९॥ हे पुरुषोत्तम ! यदि पुनः त्वमेव तत्-जिनगृहस्य वरद्वारं उद्घाटयसि तत्-तर्हि ध्रुवं-निश्चितं चक्रेश्वर्या वाणी मिलिता ॥ ५३०॥

तो तं कुणसु महायस !, जिणभवणुग्घाडणं तुरियमेव । उग्घडिए तंमि जओ, अम्हाणवि उग्घडइ पुन्नं ॥५३१॥
तत्तो कुमरो तुरिअं, तुरयारूढो पयंपए सिट्ठिं । आगच्छसु ताय ! तुमंपि जिणहरं जेण गच्छामो ॥५३२॥
तो सिट्ठी कुमरं पइ, जंपइ तुब्भे अवेयणा जेण । भुंजह अणज्जियं चिय, निच्चं निक्खीणकम्माणो ॥५३३॥
नूणं तुम्हाणंपिव, अम्हेवि न तारिसा इहच्छामो । गच्छ तुमं चिय अम्हे, नियकज्जाइं करिस्सामो ॥५३४॥
ततो धवलं मुत्तूणं, अन्नो सव्वोऽवि सत्थपरिवारो । चलिओ कुमरेण समं, पत्तो जिणभवणपासंमि ॥५३५॥

तत्-तस्मात्कारणात् हे महायशः - हे महायशस्विन् ! त्वं जिनभवनस्य-जिनगृहस्य उद्घाटनं त्वरितं-शीघ्रमेव कुरुष्व, यतस्तस्मिन् जिनगृहे उद्घटिते सति अस्माकमपि पुण्यं उद्घटते ॥ ५३१॥ ततः कुमारस्तुरगारूढः सन् त्वरितं-शीघ्रं धवलश्रेष्ठिनं प्रजल्पति-कथयति, किं जल्पतीत्याह- हे तात ! त्वमपि आगच्छ येन जिनगृहं गच्छामः ॥ ५३२॥ ततः श्रेष्ठी कुमारं प्रति जल्पति, यूयं अवेदनाः स्थ, न विद्यते वेदनं- विचारणं येषां ते ईदृशा इत्यर्थः, कथमित्याह- येन कारणेन यूयं नित्यं निश्शेषेण क्षीणंकर्म- कार्यं येषां ते निःक्षीणकर्माणः सन्तोऽनर्जितमेव भुङ्ग्ध्वं-अभ्यवहरत ॥५३३॥ नूनं - निश्चितं यूयमिव-भवद्वत् वयमपि इह-अस्मिन् स्थानेऽवसरे वा तादृशा निःक्षीणकर्माणोऽनर्जितभोक्तारो न तिष्ठामः तस्मात्त्वमेव गच्छ, वयं निजकार्याणि करिष्यामः ॥५३४॥ ततो धवलं मुक्त्वा-त्यक्त्वाऽन्यः सर्वोऽपि सार्थपरिवारः कुमारेण समं-सार्द्धं चलितः सन् जिनभवनस्य-जिनगृहस्य पार्श्वे प्राप्तः ॥५३५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुमरो भणेइ भो भो !, पिहु पिहु गच्छेह जिणहरदुवारं । जेण फुडं जाणिज्जइ, सो दारुग्घाडओ पुरिसो ॥५३६॥
तो जंपइ परिवारो, मा सामिय ! एरिसं समाइससु । किं सूरमंतरेणं, पडिबोहइ कोवि कमलवणं ? ॥५३७॥
ससिमंडलं विणा किं, कुमुयवणुल्लासणं कुणइ कोवि ? । किंच वसंतेण विणा, वणराइं कोवि मंडेइ ? ॥५३८॥
किं सहकारेण विणा, उग्घाडइ कोवि कोइलाकंठं ? । ता देव ! तं दुवारं, तुमं विणा केण उग्घडइ ? ॥५३९॥
तो कुमरो तुरयाई, मोइत्ता विहियउत्तरासंगो । कयनिस्सीहीसद्दो, सीहदुवारंमि पविसेइ ॥५४०॥

तदा कुमारो भणति-भो भो लोका ! जिनगृहद्वारं पृथक् पृथक् यूयं गच्छत, येन स्फुटं - प्रकटं यथा स्यात्तथा सः द्वारोद्घाटकः पुरुषो ज्ञायते ॥५३६॥ ततः परिवारो जल्पति- हे स्वामिन् ! ईदृशं मा समादिश-माऽनुजानीहि,यतः सूरमन्तरेण-सूर्यं विना किं कोऽपि कमलानां वनं प्रतिबोधयति-विकसितं करोति ?, नैवेत्यर्थः ॥५३७॥ तथा शशिमण्डलं - चन्द्रबिम्बं विना किं कोऽपि कुमुदवनोल्लासनं करोति ? न करोतीत्यर्थः , च - पुनः वसन्तेन विना किं कोऽपि वनराजिं - वनश्रेणिं मण्डयति?, नैवेत्यर्थः ॥५३८॥ तथा सहकारेण -आम्रेण विना किं कोऽपि कोकिलायाः कण्ठम् उद्घाटयति ? न कोऽपीत्यर्थः 'ता' इति ततः-तस्मात् तज्जिनगृहस्य द्वारं त्वां विना केन उद्घटते ? न केनापीत्यर्थः ॥ ५३९॥ ततः कुमारस्तुरगादिकं मुक्त्वा विहितः-कृत उत्तरासङ्गो-देहोत्तरीयवस्त्रविन्यासविशेषो येन स तथा, कृतो नैषेधिकीशब्दो येन स एवंविधः सन् सिंहद्वारे-चैत्यस्य प्रथमद्वारे प्रविशति ॥५४०॥

For Private and Personal Use Only

जा जाइ मंडवंतो, कुमरो उप्फुल्लनयणमुहकमलो । ता कयकिंकाररवं अररिजुयं झत्ति उग्घडियं ॥५४१॥
सो तत्थ रिसहनाहं, वत्थालंकारघुसिणकयपूयं । अमिलाणकुसुमदामं, वंदिय ढोएइ फलमउलं ॥५४२॥
इत्थंतरंमि राया धूयासहिओ समागओ तत्थ । अच्छरियकारिचरियं, पिच्छइ कुमरं निहुयनिहुयं ॥५४३॥
कुमरोऽवि हरिसवसओ, पंचंगपणामलीढमहिवीढो । सिरसंठियकरकमलो, रिसहजिणिंदं थुणइ एवं ॥५४४॥

अथ कुमारः उत्फुल्लनयनमुखकमलो-विकसितनेत्रमुखकमलः सन् यावन्मण्डपान्तः-मण्डपमध्ये याति तावत् कृतः किङ्काररवः -किङ्कारशब्दो येन तत् ईदृशं अररियुगं-कपाटयुग्मं झटिति-शीघ्रं उद्घटितम् ॥५४१॥ सः श्रीपालकुमारस्तत्र-जिनगृहे ऋषभनाथं देवाधिदेवं वन्दित्वाऽतुलम् -अनुपमं-सर्वोत्कृष्टमित्यर्थः फलं ढौकयति, कीदृशमृषभनाथं? -वस्त्रैः -उत्तमचीरैः अलङ्कारैः-आभूषणैः घुसृणेन-कुङ्कुमेन च कृता पूजा यस्य स तं, पुनः अम्लानं-विकस्वरं कुसुमदाम-पुष्पमाला कण्ठे यस्य स तम् ॥५४२॥ अत्रान्तरे- अस्मिन्नवसरे राजा कनककेतुः पुत्रीसहितस्तत्र-जिनगृहे समागतः सन् आश्चर्यकारि चरितम्-आचारो यस्य स तं तथाविधं कुमारं निभृतनिभृतं-यथा स्यात्तथाऽतिनिश्चलदृष्ट्येत्यर्थः प्रेक्षते-पश्यति ॥ ५४३ ॥ कुमारोऽपि हर्षवशात् पञ्चाङ्गप्रणामेन लीढम्-आश्लिष्टं महीपीठं येन स तथा, शिरसि-मस्तके संस्थिते करकमले यस्य स एवंविधः सन् एवं-वक्ष्यमाणप्रकारेण ऋषभजिनेन्द्रं स्तौति ॥५४४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिरिसिद्धचक्कनवपय-महल्लपढमिल्लपयमय ! जिणिंद !। असुरिंदसुरिंदच्चियपयपंकय ! नाह ! तुज्झ नमो ॥५४५॥
सिरिरिसहेसरसामिय !, कामियफलदाणकप्पतरुकप्प !। कंदप्पदप्पगंजण !, भवभंजण ! देव ! तुज्झ नमो ॥५४६॥
सिरिनाभिनामकुलगर-कुलकमलुल्लासपरमहंससम !। असमतमतमतमोभर-हरणिक्कपईव ! तुज्झ नमो ॥५४७॥

श्रीसिद्धचक्रे यानि नवपदानि तेषु महत् यत्प्रथमं पदं तत्स्वरूपमस्येति श्री सिद्धचक्रनवपदमहाप्रथमपदमयस्तत्सम्बुद्धौ हे श्री० हे जिनेन्द्र ! पुनः असुरेन्द्राः- चमरबल्याद्याः सुरेन्द्राः- सौधर्मेशानादयः उपलक्षणान्नागेन्द्रादयोऽपि ग्राह्यास्तैरर्चिते - पूजिते पदपङ्कजे-चरणकमले यस्य तत्सं० हेऽसुरेन्द्रसुरेन्द्रार्चितपदपङ्कज ! हे नाथ ! तुभ्यं नमः ॥५४५॥ हे श्रीऋषभेश्वर-स्वामिन्! तथा कामितफलदाने-वाञ्छितफलप्रदाने कल्पतरुकल्पः - कल्पवृक्षतुल्यः तत्सम्बोधने हे कामितफलदानकल्पतरु-कल्प ! पुनः कन्दर्पस्य-कामस्य यो दर्पः-अभिमानस्तस्य गञ्जनो-मर्दकस्तत्सं० हे कन्दर्प्पदर्प्पगञ्जन ! पुनः हे भवभञ्जन ! हे देव ! तुभ्यं नमः ॥५४६॥ श्रीनाभिनामा यः कुलकरस्तस्य यत्कुलं तदेव कमलं तस्योल्लासे-विकासने परमः-प्रकृष्टो हंसः-सूर्यस्तत्समः-तत्तुल्यस्तत्सं० हे श्रीनाभि० ! पुनः न विद्यते समं-तुल्यं तत् असमम् उत्कृष्टमित्यर्थः, अतिशयेन असमं असमतमम् ईदृशं यत्तमः-अज्ञानं तदेव तमोभरः-अन्धकारप्राग्भारस्तस्य हरणे एकः- अद्वितीयः प्रदीप असम०प्रदीपस्तत्सं०असम० ! तुभ्यं नमः ॥५४७॥

सिरिमरुदेवासामिणि-उदरदरीदरिअकेसरिकिसोर ! । घोरभुयदंडखंडिय-पयंडमोहस्स तुज्झ नमो ॥५४८॥
इक्खागुवंसभूसण ! गयदूसण ! दूरियमयगलमइंद ! । चंदसमवयण ! वियसियनीलुप्पलनयण ! तुज्झ नमो ॥५४९॥
कल्लाणकारणुत्तम-तत्तकणयकलससरिससंठाण ! । कंठट्ठियकलकुंतल-नीलुप्पलकलिय ! तुज्झ नमो ॥५५०॥

श्रीमरुदेव्याः स्वामिन्या उदरमेव दरी-गुहा तस्यामदरितो -निर्भीकः केशरिकिशोर इव-सिंहबाल इव श्रीमरु०तत्सम्बोधने हे श्रीमरुदेवा ० !, अत्र 'दरिय' त्ति दृप्तो हृष्ट इत्यर्थः, घोरौ-दारुणौ यौ भुजदण्डौ ताभ्यां खण्डितः प्रचण्डो मोहो येन स तस्मै तुभ्यं नमः ॥५४८॥ हे इक्ष्वाकुवंशभूषण ! पुनः गतानि दूषणानि यस्मात् स गतदूषणस्तत्सं० हे गतदूषण ! पुनः दुरितानि-पापान्येव मदकला-मदोत्कटगजास्तेषां वारणे मृगेन्द्रः-सिंह इव दूरितमदकलमृगेन्द्रस्तत्सं० हे दुरित०पुनश्चन्द्रेण समं-तुल्यं वदनं-मुखं यस्य स चं०तत्सं० हे चन्द्रसमवदन ! पुनः विकसिते ये नीलोत्पले-नीलकमले तद्वन्नयने-नेत्रे यस्य तत्सं० हे विकसित० नयन ! तुभ्यं नमः ॥५४९॥ कल्याणस्य कारणं यत् उत्तमं तप्तं कनकं- सुवर्णं तस्य यः कलशस्तेन सदृशं संस्थानम्-आकारो यस्य तत्सं० हे कल्याणकारण०संस्थान ! पुनः कण्ठे स्थिता ये कला-मनोहराः कुन्तलाः- पञ्चममुष्टिसम्बन्धिकेशास्त एव नीलोत्पलानि तैः कलितो-युक्तस्तत्सं० हे कण्ठस्थित ०कलित ! तुभ्यं नमः, कलशस्य कण्ठे नीलोत्पलानि ज्ञेयानि ॥५५०॥

आईसर ! जोईसर-लयगयमणलक्खलक्खियसरूव ! । भवकूवपडिअजंतुत्तारण ! जिणनाह! तुज्झ नमो ॥५५१॥
सिरिसिद्धसेलमंडण ! दुहखंडण ! खयररायनयपाय ! । सयलमहसिद्धिदायग ! जिणनायग ! होउ तुज्झ नमो ॥५५२
तुज्झ नमो तुज्झ नमो, तुज्झ नमो देव तुज्झ चेव नमो । पणयसुररयणसेहर-रुइरंजियपाय ! तुज्झ नमो ॥५५३॥

इति स्तवनम्

रायावि सुयासहिओ, निसुणंतो कुमरविहियसंथवणं । आणंदपुलइअंगो, जाओ अमिएण सित्तुव्व ॥५५४॥

हे आदीश्वर ! पुनर्योगीश्वराणां लयं गतानि-लीनतां प्राप्तानि यानि मनोलक्षाणि तैर्लक्षितं स्वरूपं यस्य सः तत्सम्बुद्धौ हे योगीश्वरलयगत० स्वरूप ! पुनर्भवकूपे पतितान् जन्तून् उत्-ऊर्द्ध तारयतीति भवजन्तूत्तारणस्तत्सं० हे भव० ! जिननाथ ! तुभ्यं नमः ॥५५१॥ हे श्रीसिद्धशैलस्य-शत्रुञ्जयगिरेर्मण्डन ! हे दुःखखण्डन ! पुनः खचरराजेन-विद्याधरभूपेन नतौ पदौ यस्य स खचर०पादस्तत्सं० हे खचर० ! । पुनर्महां सकलसिद्धिदायक ! हे जिननायक ! तुभ्यं नमोऽस्तु ॥५५२॥ तुभ्यं नमः तुभ्यं नमः तुभ्यं नमः हे देव ! तुभ्यमेव नमः पुनः प्रणताः-प्रकर्षेण नता ये सुरा-देवास्तेषां यानि रत्नशेखराणि तेषां रुचिभिः-दीप्तिभी रञ्जितौ पादौ यस्य स प्रणत०पादस्तत्सं० हे प्रणत० तुभ्यं नमोऽस्तु ॥५५३॥ सुतासहितो राजापि कुमारेण विहितं-कृतं संस्तवनं निश्रुण्वन् आनन्देन पुलकितं-रोमोद्गमयुक्तमङ्गं यस्य स एवंविधः सञ्जातः, क इव ? -अमृतेन सिक्त इव ॥५५४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुमरोवि जिणं नमिउं, सीसंमि निवेसिऊण जिणसेसं । बहिमंडवंमि करवंदणेण वंदेइ नरनाहं ॥५५५॥
नरनाहो अभिणंदिअ, तं पभणइ वच्छ ! जह तए भवणं । उग्घाडियं तहा नियचरियंपि हु अम्ह पयडेसु ॥५५६॥
निअनामंपि हु (? न)卐 जंपंति उत्तमा ता कहेमि कह चरिअं । इमं चिंतइ जा कुमरो, ता पत्तो चारणमुणिंदो ॥५५७॥
सो वंदिऊण देवे, उवविट्ठो जाव ताव तं नमिउं । उवविट्ठेसु निवाइसु, चारणसमणो कहइ धम्मं ॥५५८॥
भो भो महाणुभावा !, सम्मं धम्मं करेह जिणकहियं । जइ वंछह कल्लाणं इहलोए तहय परलोए ॥५५९॥

कुमारोऽपि जिनं नत्वा-प्रणम्य शीर्षे-निजमस्तके जिनशेषां-जिननिर्माल्यं पुष्पादिकं निवेश्य-संस्थाप्य बहिर्मण्डपे कराभ्यां वन्दनेन नरनाथं-राजानं वन्दते-प्रणमति ॥५५५॥ नरनाथो-राजा तं श्रीपालम् अभिनन्द्य-आशिषा सन्तोष्य प्रभणति-हे वत्स ! यथा त्वया भवनं-जिनमन्दिरं उद्घाटितं तथा निजचरितमपि अस्माकं पुरस्तात् प्रकटय-प्रकटीकुरु ॥५५६॥ हु इति निश्चितम्, उत्तमाः पुरुषा निजनामापि न जल्पन्ति-न कथयन्ति, ततः-तर्हि स्वस्य चरितं कथं कथयामि ? इत्येवं यावत्कुमारश्चिन्तयति तावत्तत्र चारणमुनीन्द्रः प्राप्त-आकाशमार्गेणाजगाम ॥५५७॥ सः-चारणलब्धिमान् साधुर्देवान् वन्दित्वा यावत् उपविष्टस्तावत् तं साधुं नत्वा नृपादिषु उपविष्टेषु सत्सु चारणश्रमणो नृपादीनां पुरस्तात् धर्मं कथयति ॥५५८॥ महान् अनुभावः- प्रभावो येषां ते म०, भो भो महानुभावा ! यूयं जिनैः कथितं धर्मं सम्यक् कुरुत, यदि इह लोके-अस्मिन् भवे तथा च परलोके- परभवे कल्याणं वाञ्छत ॥५५९॥

卐 **'हु'**ના સ્થાને **न** હોવો જોઈએ. તથા ૫૫૭મી ગાથાની ટીકામાં **'हु इति निश्चितं'** એ વાક્ય ૫૫૬મી ગાથાની ટીકામાં હોવું જોઈએ.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धम्मो जिणेहिं कहिओ, तत्ततिगाराहणामओ रम्मो । तत्ततिगं पुण भणिअं, देवो अ गुरू अ धम्मो अ ॥५६०॥
इक्किक्कस्स उ भेआ नेया कमसो दु तिन्नि चत्तारि । तत्थऽरिहंता सिद्धा, दो भेआ देवतत्तस्स ॥५६१॥
आयरिअउवज्झाया, सुसाहुणो चेव तिन्नि गुरुभेआ । दंसणनाणचरित्तं, तवो अ धम्मस्स चउभेआ ॥५६२॥
एएसु नवपएसुं, अवयरिअं सासणस्स सव्वस्सं । ता एयाइं पयाइं, आराहह परमभत्तीए ॥ ५६३॥

जिनैस्तत्त्वत्रिकस्य आराधना स्वरूपमस्येति तत्त्वत्रिकाराधनामयो रम्यो-मनोज्ञो धर्मः कथितः, तत्त्वत्रिकं पुनर्भणितं देवश्च गुरुश्च धर्मश्च-देवतत्त्वं १ गुरुतत्त्वं २ धर्मतत्त्वं ३ चेत्यर्थः ॥ ५६० ॥ तु - पुनः एकैकस्य तत्त्वस्य क्रमेण द्वौ त्रयश्चत्वारश्च भेदा ज्ञेयाः, देवतत्त्वस्य द्वौ भेदौ गुरुतत्त्वस्य त्रयो भेदाः धर्म्मतत्त्वस्य चत्वार इत्यर्थः, तत्र देवतत्त्वस्य द्वौ भेदौ अर्हन्तः १ सिद्धाश्च २ ॥ ५६१ ॥ आचार्या १ उपाध्यायाः २ सुसाधव३श्चैव एते त्रयो गुरुतत्त्वस्य भेदाः, तथा दर्शनं-सम्यक्त्वं १ ज्ञानं-तत्त्वावबोधः २ चारित्रं-विरतिरूपं ३ तपश्च-अनशनादि ४ एते धर्मतत्त्वस्य चत्वारो भेदाः ॥ ५६२ ॥ एतेषु नवपदेषु जिनशासनस्य सर्वस्वं-सर्वसारमवतीर्णमस्तीति शेषः, ततः-तस्मात् भो भो भव्या ! यूयमेतानि पदानि परमभक्त्या आराधयत-सेवध्वम् ॥ ५६३ ॥

For Private and Personal Use Only

जहा-जिअंतरंगारिजणे सुनाणे सुपाडिहेराइसयप्पहाणे संदेहसंदोहरयं हरंते, झाएह निच्चंपि जिणेऽरिहंते ॥५६४॥
दुट्ठट्ठकम्मावरणप्पमुक्के, अणंतनाणाइसिरीचउक्के समग्गलोगग्गपयप्पसिद्धे, झाएह निच्चंपि मणंमि सिद्धे ॥५६५॥
न तं सुहं देइ पिया न माया, जं दिंति जीवाणिह सूरिपाया ।
तम्हा हु ते चेव सया महेह जं मुक्खसुक्खाइं लहुं लहेह ॥ ५६६ ॥

यथा- जिता अन्तरङ्गारिजनाः-कामक्रोधाद्यान्तरवैरिलोका यैस्ते जिता० तान्, पुनः सुष्ठु ज्ञानं येषां ते तान्, तथा सुप्रातिहार्यैः-अशोकादिभिः शेषैरतिशयैश्च प्रधानाः-प्रकृष्टास्तान्, प्रधानशब्दस्त्रिलिङ्गोऽप्यस्ति, पुनः सन्देहानां-संशयानां यः सन्दोहः-समूहस्तदेव रजस्तत् हरन्तीति हरन्तस्तान् हरन्तः, एवंविधान् जिनान्-अर्हतो नित्यमपि यूयं ध्यायत ॥ ५६४ ॥ दुष्टाष्टकर्माण्येव आवरणानि तेभ्यः प्रकर्षेण मुक्तान्, पुनः अनन्तं ज्ञानादिलक्ष्मीचतुष्कं येषां ते तान्, अनन्तज्ञानदर्शनसुखाकरणवीर्ययुतानित्यर्थः, तथा समग्रः-सम्पूर्णो यो लोकस्तस्य यदग्रपदं-उपरितनस्थानं तत्र प्रसिद्धान्-प्रकर्षेण सिद्धत्वप्राप्तान् एवंविधान्, सिद्धान् नित्यमपि यूयं मनसि ध्यायत ॥ ५६५ ॥ इह-संसारे जीवेभ्यः तत्सुखं पिता न ददाति माता न ददाति यत् सुखं सूरिपादा-आचार्यपूज्या ददति-प्रयच्छन्ति, तस्मात् तानेव आचार्यान् यूयं सदा महत-पूजयत, यत्-येन मोक्षसौख्यानि लघु-शीघ्रं लभध्वं-प्राप्नुत ॥ ५६६ ॥

सुत्तत्थसंवेगमयस्सुएणं, सन्नीरखीरामयविस्सुएणं । पीणंति जे ते उवज्झायराए, झाएह निच्चंपि कयप्पसाए ॥५६७॥
खंते अ दंते अ सुगुत्तिगुत्ते, मुत्ते पसंते गुणजोगजुत्ते । गयप्पमाए हयमोहमाए, झाएह निच्चं मुणिरायपाए ॥ ५६८
जं दव्वछक्काइसुसद्दहाणं, तं दंसणं सव्वगुणप्पहाणं । कुग्गाहवाहीउ वयंति जेण, जहा विसुद्धेण रसायणेण ॥ ५६९ ॥

ये उपाध्यायाः सूत्रार्थसंवेगमयश्रुतेन भव्यान् प्रीणन्ति-तृप्तीकुर्वन्ति तान् उपाध्यायराजान् नित्यमपि यूयं ध्यायत, सूत्रं च अर्थश्च संवेगमयश्रुतं च एषां समाहारः सूत्रार्थसंवेगमयश्रुतं तेन, कीदृशेन-सन्नीर० सन्नीरं-सम्यग्जलं क्षीरं-पयः अमृतं-सुधा तद्वद्विश्रुतेन-प्रसिद्धेन, अयं भावः- सूत्रं स्वादुनीरोपम् अर्थश्च क्षीरोपमः संवेगमयश्रुतं तु अमृतोपममिति, कीदृशान् उपाध्यायराजान् ? कृतः प्रसादः-अनुग्रहो यैस्ते तान् ॥ ५६७ ॥ क्षान्तान्-क्षमायुक्तान् दान्तान्-दमयुक्तान् चकारौ समुच्चये सुगुप्तिभिः-मनोगुप्त्यादिभिर्गुप्तान्-गुप्तिमतः मुक्तान्-निर्लोभान् प्रशान्तान्-शान्तरसोपेतान् पुनः गुणानां योगः-सम्बन्धस्तेन युक्तान्, तथा गताः प्रमादा-मद्यादयो येभ्यस्ते तान्, पुनर्मोहश्च माया च मोहमाये हते मोहमाये यैस्ते तान्, एवंस्वरूपान् मुनिराजपादान्-मुनिराजपूज्यान् यूयं नित्यं ध्यायत ॥ ५६८ ॥ यत् द्रव्यषट्कादेः सुष्ठु-शोभनं श्रद्धानं तद् दर्शनं नाम धर्मे सर्वगुणेषु प्रधानं वर्त्तते येन सम्यग्दर्शनेन कुग्राहा-हतवादा एव व्याधयो-रोगा व्रजन्ति-गच्छन्ति यथा विशुद्धेन-निर्मलेन रसायनेन, अयं भावः- जराव्याधिजिदौषधं रसायनमुच्यते, तेन यथा रोगाः सर्वेऽपि गच्छन्ति तथा दर्शनेन कुग्राहा व्रजन्ति ॥ ५६९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाणं पहाणं नयचक्कसिद्धं, तत्तावबोहिक्कमयं पसिद्धं । धरेह चित्तावसहे फुरंतं, माणिक्कदीवुव्व तमो हरंतं ॥५७०॥
सुसंवरं मोहनिरोहसारं, पंचप्पयारं विगयाइयारं । मूलोत्तराणेगगुणं पवित्तं, पालेह निच्चंपिहु सच्चरित्तं ॥५७१॥
बज्झं तहाभिंतरभेअमेअं, कयाइदुब्भेअकुकम्मभेअं । दुक्खक्खयत्थं कयपावनासं, तवं तवेहागमिअं निरासं ॥५७२॥

नयानां-नैगमादीनां चक्रेण-समूहेन सिद्धं-निष्पन्नं पुनस्तत्त्वावबोधः-तत्त्वज्ञानमेकं स्वरूपमस्येति तत्त्वावबोधैकमयं प्रसिद्धं-सर्वत्र विदितं प्रधानं-मुख्यमेवम्भूतं ज्ञानं चित्तावसथे-मनोमन्दिरे धरत, कीदृशं ज्ञानं ?-स्फुरत्-दीप्यमानमत एव माणिक्यदीपमिव तमः-अज्ञानान्धकारं हरत् ॥ ५७० ॥ भो भव्याः ! सुष्ठु संवरो यस्मिंस्तत् सुसंवरं तथा मोहनिरोध एव सारः-श्रेष्ठो यत्र तत् मो० पुनः पञ्च प्रकाराः-सामायिकादयो भेदा यस्य तत् पं० तथा विगता अतिचारा यस्मात्तत् तथा मूलोत्तररूपा अनेके गुणा यस्मिंस्तत्, मूलगुणाः - प्राणातिपातविरमणादय उत्तरगुणाः - पिण्डविशुद्ध्यादयः, पुनः पवित्रं-पावनम्, एवम्भूतं सच्चारित्रं नित्यमपि यूयं पालयत ॥ ५७१ ॥ भो भव्या ! यूयं एतद् बाह्यं तथाऽभ्यन्तरभेदं तपस्तपत, कीदृशमेतत् ?-अतिशयेन दुर्भेदानि यानि कुकर्म्माणि तेषां भेदो-विदारणं कृतो येन तत् कृत०, अत एव कृतः पापनाशो येन तत्कृतपापनाशं, पुनः कीदृशम् ?-आगमे भवम् आगमिकं, तथा निर्गता आशा-वाञ्छा यस्मात्तन्निराशम्, ईदृशं तपस्तपत, किमर्थमित्याह - दुःखक्षयार्थम् ॥ ५७२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एयाइं जे केवि नवप्पयाइं, आराहयंतिट्ठफलप्पयाइं । लहंति ते सुक्खपरंपराणं, सिरिं सिरीपालनरेसरुव्व ॥ ५७३
राया पुच्छइ भयवं !, को सिरिपालुत्ति ? तो मुणिंदोवि । करसन्नाए दंसइ, एसो तुह पासमासीणो ॥५७४॥
तं नाऊणं राया, सपमोओ विन्नवेइ मुणिरायं । भयवं ! करेह पयडं एयस्स सरूवमम्हाणं ॥ ५७५ ॥
तत्तो चारणसमणेण तेण आमूलचूलमेयस्स । कहियं ताव चरित्तं, जिणभवणुग्घाडणं जाव ॥ ५७६ ॥
इत्तोवि परं एसो, परिणिंतोऽणेगरायकन्नाओ । पिअरज्जे उवविट्ठो, होही रायाहिराओत्ति ॥ ५७७ ॥

ये केऽपि जीवा एतानि इष्टफलप्रदानि-वाञ्छितफलदायकानि नव पदानि आराधयन्ति ते श्रीपालनरेश्वर इव सुखपरम्पराणां श्रियं-लक्ष्मीं लभन्ते-प्राप्नुवन्ति ॥ ५७३ ॥ तदा राजा पृच्छति, हे भगवन् ! कः श्रीपाल इति, ततो मुनीन्द्रोऽपि करस्य-हस्तस्य संज्ञया दर्शयति, एष तव पार्श्वमासीनः, त्वत्समीपे उपविष्ट इत्यर्थः ॥ ५७४ ॥ राजा तं श्रीपालं ज्ञात्वा सप्रमोदः-सहर्षः सन् मुनिराजं विज्ञपयति, हे भगवन् ! एतस्य-श्रीपालस्य स्वरूपमस्माकं पुरस्तात् प्रकटं कुरुत ॥ ५७५ ॥ ततस्तेन-चारणश्रमणेन एतस्य-श्रीपालस्य आमूलचूलं तावच्चरित्रं कथितं यावज्जिनभवनोद्घाटनं कृतमिति शेषः ॥ ५७६ ॥ इतः परमपि एषः श्रीपालोऽनेकराजकन्याः परिणयन् पितृराज्ये उपविष्टः सन् राजाधिराजो भविष्यतीति, राजसु अधिको राजा-राजाधिराजः ॥ ५७७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्थ सिरिसिद्धचक्कं, विहिणा आराहिऊण भत्तीए । पाविस्सइ सग्गसुहं, कमेण अपवग्गसुक्खं च ॥५७८॥
तत्तो एस महप्पा, महप्पभावो महायसो धन्नो । कयपुन्नो महभागो, संजाओ नवपयपसाया ॥५७९॥
जो कोइ महापावो, एयस्सुवरिंपि किंपि पडिकूलं । करिही सुच्चिअ लहिही, तक्कालं चेव तस्स फलं ॥५८०॥
एयस्स सिद्धसिरिसिद्धचक्कनवपयपसायपत्तस्स । धुवमावयावि होही, गुरुसंपयकारणं चेव ॥ ५८१ ॥
एवं चेव कहंतो संपत्तो, मुणिवरो गयणमग्गे । लोओ अ सप्पमोओ, जाओ नरनाहपामुक्खो ॥ ५८२ ॥

तत्र-महाराजावस्थायां श्रीसिद्धचक्रं विधिना भक्त्या आराध्य स्वर्गसुखं प्राप्स्यति, क्रमेण अपवर्ग्गसुखं-मुक्तिसुखं च प्राप्स्यति ॥ ५७८ ॥ ततः-तस्मात्कारणात् एष महात्मा, पुनः महान् प्रभावो यस्य स महाप्रभावः, तथा महद् यशो यस्य स महायशाः, धन्यः, पुनः कृतं पुण्यं येन स कृतपुण्यस्तथा महान् भागो-भाग्यं यस्य स महाभागो नवपदानां प्रसादात्सञ्जातः ॥ ५७९ ॥ यः कोऽपि महापापः पुमान् एतस्योपरि अपि किमपि प्रतिकूलं-विरुद्धं करिष्यति तस्य फलं स एव पुमान् तत्कालमेव लप्स्यते-प्राप्स्यति ॥ ५८० ॥ सिद्धं-निष्पन्नं यत् श्रीसिद्धचक्रं तत्र यानि नव पदानि तेषां प्रसादपात्रस्य एतस्य श्रीपालस्य ध्रुवं-निश्चितम् आपदपि-विपदपि गुरुसम्पत्कारणमेव भविष्यति ॥ ५८१ ॥ एवं कथयन्नेव मुनिवरो गगनमार्गे-आकाशमार्गे सम्प्राप्तः, नरनाथप्रमुखो-राजादिको लोकश्च सह प्रमोदेन-हर्षेण वर्त्तते इति सप्रमोदो-हर्षवान् जातः ॥ ५८२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तक्कालं चिअ कुमरस्स तस्स दाऊण मयणमंजूसं । काऊण य सामग्गिं, सयलंपि विवाहपव्वस्स ॥५८३॥
तस्स भवणस्स पुरओ, मिलिए सयलंमि नयरलोअंमि । महया महेण रन्ना, पाणिग्गहणंपि कारवियं ॥५८४॥
दिन्नाइं बहुविहाइं, मणिकंचणरयणभूसणाईणि । दिन्ना य गयहयावि अ, दिन्नो य सुसारपरिवारो ॥५८५॥
दिन्नो अ वरावासो, तत्थ ठिओ दोहिं वरकलत्तेहिं । सहिओ कुमारराओ, जाओ सव्वत्थ विक्खाओ ॥५८६॥
निच्चंपि तंमि चेइयहरंमि कुमरो करेइ साणंदो । पूआपभावणाहिं, सहलं निअरिद्धिवित्थारं ॥ ५८७ ॥

ततो राज्ञा तत्कालमेव तस्मै कुमाराय मदनमञ्जूषां स्वकन्यां दत्त्वा च - पुनः विवाहपर्वणो-विवाहोत्सवस्य सकलां-समस्तामपि सामग्रीं कृत्वा ॥ ५८३ ॥ तस्य जिनभवनस्य पुरतः-अग्रतः सकलेऽपि नगरलोके मिलिते सति महता महेन-उत्सवेन पाणिग्रहणमपि कारितम् ॥ ५८४ ॥ बहुविधानि-बहुप्रकाराणि मणिकाञ्चनरत्नानां भूषणादीनि दत्तानि च - पुनः हया-अश्वा गजा-हस्तिनोऽपि च दत्ताः च - पुनः सुतरां सारः परिवारो दत्तः अतिशयेन ॥ ५८५ ॥ वरः-प्रधान आवासश्च दत्तः, तत्रावासे स्थितो द्वाभ्यां कलत्राभ्यां सहितो-युक्तः कुमारराजः सर्वत्र विख्यातः-प्रसिद्धो जातः ॥ ५८६ ॥ तस्मिन् चैत्यगृहे नित्यमपि-सर्वदापि कुमारः सानन्दः सन् पूजाप्रभावनाभिर्निजस्य ऋद्धिविस्तारं सफलं-फलयुक्तं करोति ॥ ५८७ ॥

For Private and Personal Use Only

अह चित्तमासअट्ठाहिआउ विहिआउ तत्थ विहिपुव्वं । सिरिसिद्धचक्कपूआविहीवि आराहिओ तेण ॥५८८॥
अन्नदिणे तस्स जिणालयस्स सुबलाणयंमि आसीणो । राया कुमारसहिओ, कारावइ जाव जिणमहिमं ॥५८९॥
ता दंडपासिएणं, विन्नत्तो देव ! सत्थवणिएणं । एगेण दाणभंगं, काउं आणावि तुह भग्गा ॥५९०॥
सो अत्थि मए बद्धो, एसो को तस्स सासणाएसो ? ! राया भणेइ आणाभंगे पाणा हरिज्जंति ॥५९१॥
कुमरो भणेइ मा मा, मारणादेसमिह ठिओ देसु । सावज्जवयणकहणेवि जिणहरे जेण गुरुदोसो ॥५९२॥

अथ-अनन्तरं तेन श्रीपालकुमारेण तत्र नगर्यां विधिपूर्वं चैत्रमासस्य अष्टाह्निका विहिता-कृता, श्रीसिद्धचक्रस्य पूजाविधिरपि आराधितः-सेवितः, अत्र पूर्वार्धे एकस्तुशब्दो विशेषे द्वितीयः पादपूरणे ॥ ५८८ ॥ अन्यस्मिन् दिने तस्य जिनालयस्य-जिनगृहस्य सुबलानके-जनोपवेशनस्थाने आसीन-उपविष्टो राजा कुमारसहितो यावत् जिनस्य-भगवतो महिमानं कारयति ॥ ५८९ ॥ तावत् दण्डपाशिकेन-दण्डनियोगिपुरुषेण राजा विज्ञप्तः हे देव ! - हे राजन् ! एकेन सार्थवणिजा दानभङ्गं कृत्वा तवाज्ञाऽपि भग्ना ॥ ५९० ॥ स एष सार्थवणिक् मया बद्धोऽस्ति, तस्य कः शासनादेशः-का शिक्षणाज्ञा ? को दण्ड इत्यर्थः, तदा राजा भणति- आज्ञाभङ्गे प्राणा ह्रियन्ते, प्राणापहारः क्रियते इत्यर्थः ॥ ५९१ ॥ एतन्नृपवचः श्रुत्वा कुमारो भणति हे महाराज ! इह-जिनालयभूमौ स्थितः सन् मारणादेशं मा मा-मा दत्स्व, मा देहीत्यर्थः, येन कारणेन जिनगृहे सावद्यस्य-सदोषस्य वचनस्य कथनेऽपि गुरुः-महान् दोषोऽस्ति ॥ ५९२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो राया छोडाविअ, आणावइ जाव निअयपासंमि । तं दट्ठूणं कुमरो, उवलक्खइ धवलसत्थवइं ॥५९३॥
चिंतइ मणे कुमारो, अहह कहं एरिसंपि संजायं ? । अहवा लोहवसेणं, जीवाणं किं न संभवइ ? ॥५९४॥
तं निअजणयसमाणं, कहिउं मोआविओ नरिंदाओ । उवयारपरो कुमरो, विसज्जए निअयठाणे अ ॥५९५॥
अह अन्नदिणे कुमरो, विन्नत्तो वाणिएण एगेण । सामिअ ! पूरिअपोआ, अम्हे सव्वेवि संवहिआ ॥५९६॥
तो जह चिअ कुसलेणं, अम्हे तुम्हेहिं आणिया इहयं । तह निअदेसंमि पुणो, सामिअ ! तुरिअं पराणेह ॥ ५९७॥

ततो राजा तं छोटयित्वा-बन्धनात् मोचयित्वा यावन्निजपार्श्वे आनाययति तावत् कुमारः-श्रीपालस्तं दृष्ट्वा धवलसार्थपतिमुपलक्षते-धवलसार्थपतिरेवायमिति जानातीत्यर्थः ॥ ५९३ ॥ कुमारो मनसि चिन्तयति, अहह इति खेदे, ईदृशमपि अकार्यं कथं सञ्जातं ? अथवा जीवानां लोभवशेन किं न सम्भवति, सर्वमप्यकार्यं सम्भवेदित्यर्थः ॥ ५९४ ॥ अथोपकारपर-उपकारकरणतत्परः कुमारस्तं धवलं निजजनकसमानं कथयित्वा-मम पितृतुल्योऽयमिति भणित्वा नरेन्द्रात्-राज्ञो मोचयति, च - पुनः निजकस्थाने विसर्ज्जयति-गमनाज्ञां दापयति ॥ ५९५ ॥ अथ अन्यस्मिन् दिने एकेन वणिजा कुमारो विज्ञप्तः-हे स्वामिन् ! पूरिताः-क्रयाणकैर्भृताः पोता-वहनानि यैस्ते एवम्भूता वयं सर्वेऽपि संव्यूढा-गमनाय प्रगुणीभूताः स्म ॥ ५९६ ॥ ततः-तस्मात्कारणात् यथैव युष्माभिर्वयं कुशलेन इह आनीताः तथा-तेनैव प्रकारेण हे स्वामिन् ! निजदेशे पुनस्त्वरितं-शीघ्रं प्रापय-प्राप्तान् कुरु, अत्र पूर्वार्द्धे नियकुसलेण इति पाठोऽपि, तत्र नित्यकुशलेनेत्यर्थः ॥ ५९७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो कुमरो नरनाहं, आपुच्छइ निअयदेसगमणत्थं । कहकहवि सो विसज्जइ, काऊणं गुरुअसम्माणं ॥५९८॥
दाउं सुयाइ सिक्खं, कुमरस्स भलाविऊण धूयं च । पोयंमि समारोविअ कुमरं वलिओ नरवरिंदो ॥५९९॥
कुमरो बहुमाणेणं, धवलंपि हु सारसारपरिवारं । नियपोयंमि निवेसइ, सेसजणे सेसपोएसु ॥ ६०० ॥
पत्थाणमंगलंमी, पहयाओ दुंदुहीउ भेरीओ । सज्जीकया य पोया, चल्लंति महल्लवेगेणं ॥ ६०१ ॥
पोयारूढो कुमरो, जलहिंमिवि अणुहवेइ लीलाओ । जह पालयाहिरूढो, देविंदो गयणमग्गेवि ॥६०२॥

ततः-तदनन्तरं कुमारो नरनाथं-राजानं प्रति निजकदेशगमनार्थमापृच्छति, स राजा गुरुकं-बहुलं सन्मानं कृत्वा कथं-कथमपि महता कष्टेन विसृजति-गमनाज्ञां ददाति ॥ ५९८ ॥ नरवरेन्द्रो-राजेन्द्रः सुतायै-पुत्र्यै शिक्षां दत्त्वा च - पुनः मम पुत्री सम्यक्तया रक्षणीयेत्याद्युक्तिपूर्वं पुत्रीं कुमाराय समर्प्य कुमारं पोते-यानपात्रे समारोप्य वलितः स्वयं स्वस्थानं प्रति ॥ ५९९ ॥ कुमारः सारसारपरिवारं धवलमपि बहुमानेन-आदरेण निजपोते निवेशयति-उपवेशयति, शेषजनान् शेषपोतेषु निवेशयति ॥ ६०० ॥ प्रस्थानमङ्गले-प्रस्थानमङ्गलसमये इत्यर्थः, दुन्दुभयो-दुन्दुभिनाम्न्यो भेर्यः प्रहताः-ताडिताः, वादिता इति यावत्, च - पुनः सज्जीकृताः पोता महावेगेन चलन्ति ॥ ६०१ ॥ अथ पोतारूढः-प्रवहणोपविष्टः कुमारो जलधौ-समुद्रेऽपि लीलाः-क्रीडा अनुभवति, कथमित्याह- यथा पालकाधिरूढः-पालकविमानावस्थितो देवेन्द्रः-शक्रो गगनमार्गे-आकाशमार्गेऽपि लीला अनुभवति तथेत्यर्थः ॥ ६०२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दट्ठूण कुमरलीलं, रमणीजुयलं च रिद्धिवित्थारं । धवलो विचलिअचित्तो एवं चिंतेउमाढत्तो ॥६०३॥
अहह अहो जणमित्तो, संपत्तो केरिसिं सिरिं एसो । अन्नं च रमणिजुयलं, एरिसयं जस्स सो धन्नो ॥६०४॥
ता जइ एयस्स सिरी, रमणीजुयलं च होइ मह कहवि । ताऽहं होमि कयत्थो, अकयत्थो अन्नहा जम्मो ॥६०५॥
एवं सो धणलुद्धो, रमणीझाणेण मयणसरविद्धो । दुज्झवसायाणुगओ, न लहेइ रइं ससल्लुव्व ॥६०६॥

तदा धवलः श्रेष्ठी कुमारस्य लीलां तथा रमणीयुगलं-स्त्रीद्वयं च - पुनः ऋद्धिविस्तारं दृष्ट्वा-विलोक्य विशेषेण चलितं चित्तं यस्य स विचलितचित्तः सन् एवं-वक्ष्यमाणप्रकारेण चिन्तयितुमारब्ध-आरम्भं कृतवान्, चिन्तयितुं लग्न इत्यर्थः ॥ ६०३ ॥ अहहेति खेदे, अहो इत्याश्चर्ये, एष श्रीपालो जनमात्र-एकाकिमनुष्यमात्रः सन् कीदृशीं श्रियं-लक्ष्मीं सम्प्राप्तः-प्राप्तवान्, अन्यच्च-अन्यत्पुनर्यस्य ईदृशं रमणीयुगलं-पत्नीद्वयमस्ति स एष धन्यः ॥ ६०४ ॥ तत्-तस्मात् यदि एतस्य श्रीपालस्य श्रीः-लक्ष्मीः च - पुनः रमणीयुगलं-स्त्रीद्वयं कथमपि-केनापि प्रकारेण मम भवति, तत्-तर्हि अहं कृतार्थो-निष्पन्नप्रयोजनो भवामि, अन्यथा एतयोः प्राप्त्यभावे मम जन्म अकृतार्थं-निष्फलमित्यर्थः ॥ ६०५ ॥ एवम्-अमुना प्रकारेण धनलुब्धः-परद्रव्यलोभयुक्तस्तथा मदनशरैः-कामबाणैर्विद्धः-ताडितोऽत एव दुरध्यवसायान्-दुष्टपरिणामान् अनुगतो-अभिव्याप्तः स धवलः सह शल्येन वर्तते इति सशल्य इव रतिं-सातं न लभते-न प्राप्नोति ॥ ६०६ ॥

For Private and Personal Use Only

इक्किल्लओवि लोहो, बलिओ सो पुण सदप्पकंदप्पो । जलणुव्व पवणसहिओ, संतावइ कस्स नो हिययं ? ॥६०७॥
तत्तो सो गयनिद्दो, सयणीअगओऽवि मज्झरयणीए । दुक्खेण टलवलंतो, दिट्ठो तम्मित्तपुरिसेहिं ॥६०८॥
पुट्ठो अ तेहिं को अज्ज तुज्झ अंगंमि बाहए वाही ? । जेण न लहेसि निद्दं, तो कहसु फुडं निअं दुक्खं ॥६०९॥
कहकहवि सोवि दीहं, नीससिऊणं कहेइ मह अंगं । वाही न बाहए किंतु बाहए मं दुरंताही ॥६१०॥

एकाक्यपि लोभो बलिको-बलवान् अस्ति, च - पुनः दर्प्पकन्दर्प्पाभ्यां-अभिमानकामाभ्यां सह वर्त्तमानः कस्य पुरुषस्य हृदयं-चित्तं नो सन्तापयति ?, सर्वस्यापि हृदयं सन्तापयतीत्यर्थः, क इव ?-पवनेन-वायुना सहितः-संयुक्तो ज्वलनो-वह्निरिव, यथा वायुप्रेरितो वह्निः सर्वस्यापि मनः सन्तापयेत्तथेत्यर्थः ॥ ६०७ ॥ ततः-तदनन्तरं स धवलो गता निद्रा यस्य स गतनिद्रः सन् मध्यरजन्यां-अर्द्धरात्रेऽपि शयनीयगतः-शय्यां प्राप्तो दुःखेन टलवलन् तस्य - धवलस्य मित्रपुरुषैर्दृष्टः ॥ ६०८ ॥ च - पुनः तैर्मित्रैः पृष्टः अद्य तवाङ्गे को व्याधिः-रोगो बाधते ?-पीडामुत्पादयति, येन त्वं निद्रां न लभसे, ततः-तस्मात् त्वं स्फुटं-प्रकटं निजं-स्वकीयं दुःखं कथय ॥ ६०९ ॥ अथ स धवलोऽपि दीर्घं निःश्वस्य-दीर्घनिःश्वासं मुक्त्वा कथंकथमपि-महता कष्टेन कथयति, किं कथयतीत्याह- मम अङ्गं-शरीरं व्याधिर्न बाधते, किन्तु मां दुःखेन अन्तो यस्य स दुरन्त आधिः-मानसिकं दुःखं बाधते ॥ ६१० ॥

पुट्ठो पुणोवि तेहिं, का सा तुह माणसी महापीडा ? । तो सो कहेइ सव्वं, तं निअयं चिंतिअं दुट्ठं ॥६११॥
तं निसुणिऊण तेवि हु, भणंति चउरोऽवि मित्तवाणिअगा । हहहा किमियं तुमए, भणिअं कन्नाण सूलसमं ? ॥६१२॥
अन्नस्सवि धणहरणं, न जुज्जए उत्तमाण पुरिसाणं । जं पुण पहुणो उवयारिणो अ तं दारुणविवागं ॥६१३॥
इअरित्थीणवि संगो, उत्तमपुरिसाण निंदिओ लोए । जा सामिणीइ इच्छा, सा तक्खय-सिरमणिसरिच्छा ॥ ६१४

ततस्तैः पुनरपि पृष्टः सा तव मानसी-मनसि भवा महापीडा का ?, ततः स-धवलस्तत्सर्वं निजकं-स्वकीयं दुष्टं चिन्तितं कथयति ॥ ६११ ॥ तद्धवलचिन्तितं श्रुत्वा ते चत्वारोऽपि मित्रवाणिजका भणन्ति-जल्पन्ति, किं भणन्तीत्याह- हहहा इति खेदे, त्वया कर्णानां शूलसमं-शूलतुल्यं किमिदं भणितम्-उक्तम् ॥ ६१२ ॥ उत्तमानां पुरुषाणां अन्यस्यापि कस्यचिल्लोकस्य धनहरणं-द्रव्यापहरणं न युज्यते, यत्पुनः प्रभोः-स्वामिनः उपकारिणश्च धनहरणं तद् दारुणो-भयानको विपाकः-फलानुभवो यस्य तत्तादृगस्ति ॥ ६१३ ॥ उत्तमपुरुषाणां इतरस्त्रीणां-अन्यसामान्यलोकस्त्रीणामपि सङ्गः-संयोगो लोके निन्दितोऽस्ति, या पुनः स्वामिन्या इच्छा-अभिलाषः सा तक्षकस्य-नागराजस्य यो शिरसो मणिस्तत्सदृक्षा-तत्तुल्येत्यर्थः महादुःखदायित्वात् ॥ ६१४ ॥

अन्नस्सवि कस्सवि पाणदोहकरणं न जुज्जए लोए । जं सामिपाणहरणं, तं नरयनिबंधणं नूणं ॥६१५॥
ता तुमए एरिसयं, पावं कह चिंतियं निए चित्ते । जइ चिंतियं च ता कह, कहियं तुमए सजीहाए ? ॥६१६॥
आसि तुमं अम्हाणं, सामी मित्तं च इत्तिअं कालं । एरिसयं चिंतंतो, संपइ पुण वेरिओ तंसि ॥६१७॥
पोआण चालणं तं, तह महकालाउ मोअणं तं च । विज्जाहराउ मोआवणं च किं तुज्झ वीसरियं ॥६१८॥
एवंविहोवयाराण कारिणो जे कुणंति दोहमणं । दुज्जणजणेसु तेसिं, नूणं धुरि कीरए रेहा ॥६१९॥

अन्यस्यापि कस्यापि जन्तोः प्राणेषु द्रोहकरणं-जिघांसाविधानं लोके न युज्यतेऽयुक्तमित्यर्थः, यत् स्वामिनः प्राणहरणं तन्नूनं-निश्चितं नरकस्य दुर्गतेर्निबन्धनं-कारणं वर्त्तते ॥ ६१५ ॥ तत्-तस्मात्कारणात् त्वया निजे चित्ते-स्वमनसि ईदृशं पापं कथं चिन्तितम् ? च-पुनर्यदि चिन्तितं तत् - तर्हि त्वया स्वजिह्वया कथं कथितं ? कथयतस्तव लज्जापि न समेतेति भावः ॥ ६१६ ॥ इयन्तं कालं यावत् त्वमस्माकं स्वामी च मित्रं च आसीः-अभवः, सम्प्रति-इदानीं पुनः ईदृशं पापं चिन्तयन् त्वमस्माकं वैरिको-वेरी असि ॥ ६१७ ॥ तत् पोतानां देवतास्तम्भितप्रवहणानां चालनं, तथा महाकालनृपाद् बद्ध्वा व्रजतो मोचनं, तद्विद्याधरात्-विद्याधरराजात् मारयतो मोचनं किं तव विस्मृतम् ? ॥ ६१८ ॥ एवंविधोपकाराणां कारिणः-कर्त्तुः पुरुषस्योपरि ये दुष्टा द्रोहयुक्तं मनः कुर्वन्ति, नूनं-निश्चयेन तेषां दुष्टानां रेखा दुर्जनजनेषु-दुष्टलोकेषु धुरि क्रियते ॥ ६१९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मलिणा कुडिलगईओ, परछिद्दरया य भीसणा डसणा । पयपाणेणवि लालयंतस्स मारंति दोजीहा ॥६२०॥
पयडियकुसीलयंगा, कयकडुयमुहा य अवगणिअणेहा । मलिणा कढिणसहावा, तावं न कुणंति कस्स खला ? ॥६२१॥

मलिणेत्यादि, अस्या गाथाया अन्ते द्विजिह्वशब्दो द्व्यर्थवाचकोऽस्ति, द्विजिह्वः-खलपुरुषः सर्पश्चोच्यते, इहोभयोर्विशेषणसाम्येन तुल्यत्वं दर्शयन्नाह- द्विजिह्वाः-खलाः सर्पाश्च पयःपानेन-दुग्धपायनेन लालयन्तं-पालयन्तमपि पुरुषं मारयन्ति, उभयेऽपि कीदृशाः ? इत्याह- मलिना- वर्णतो भावतश्च मलीमसाः, पुनः कुटिला-वक्रा गतिः-गमनं चेष्टा च येषां ते तथोक्ताः, च - पुनः परच्छिद्रेषु - परकीयदोषेषु परजन्तुनिवासविवरेषु च रता-रक्ताः पुनः भीषणा-भयानकाः तथा दशना-जिह्वया दंष्ट्राभिश्च परघातकारकाः ॥ ६२० ॥ अथ ज्वरोपमया दुर्जनस्वरूपं दर्शयन्नाह- इहानुक्तमपि ज्वरा इति उपमानपदमर्थसम्बन्धाद् ग्राह्यं, ततोऽयमन्वयः- खलाः-दुर्जनाः पुरुषा ज्वरा इव कस्य तापं न कुर्वन्ति ? सर्वस्यापि कुर्वन्तीत्यर्थः, उभयेऽपि कीदृशा इत्याह-प्रकटिता-प्रकटीकृता कुशीलता-कुत्सितस्वभावता अङ्गे-शरीरे यैस्ते तथा (कृतानि कटुकानि मुखानि यैस्ते) तथाऽवगणितः-अनादरविषयीकृतः स्नेहः-प्रेम यैस्ते ज्वरपक्षेऽवगणितः स्नेहो-घृतादिर्येषु सत्सु, तथा मलिना एके भावतोऽन्ये देहमालिन्योत्पादकत्वात्, अत एव उभयेऽपि कठिनस्वभावाः कठिनः स्वभावो येषां ते तथोक्ताः, ज्वरपक्षे देहे काठिन्योत्पादनात् ॥ ६२१ ॥

For Private and Personal Use Only

विरसं भसंति सविसं, डसंति जे छन्नमिंति सुंघंता । ते कस्स लद्धछिद्दा, दुज्जणभसणा सुहं दिंति ? ॥६२२॥
ता तं न होसि धवलो, कालोऽसि इमाइ किण्हलेसाए । ता तुज्झ दंसणेणवि, मालिन्नं होइ अम्हाणं ॥६२३॥
इअ भणिअ गया निअनिअ-ठाणेसुं जाव तिन्नि वरपुरिसा । तुरिओ कुडिलसहावो, पुणोवि तप्पासमासीणो ॥६२४॥
सो जंपइ धवलं पइ, न कहिज्जइ एसिमेरिसं मंतं । जं एए अरिभूया, तुह अहिअं चेव चिंतंति ॥६२५॥

अथ श्वानोपमया दुर्जनस्वरूपं दर्शयन्नाह- ते दुर्जनाः-खला एव भषणाः-श्वाना दुर्जनभषणा लब्धं छिद्रं-छलं यैस्ते लब्धच्छिद्राः सन्तः कस्मै सुखं ददति ?, न कस्मै अपीत्यर्थः, ते के इत्याह- ये विगतो रसो-मधुरात्मको यस्मात्तद्विरसं यथा स्यात्तथा भषन्ति-परं भर्त्सयन्ति श्वानपक्षेऽव्यक्तं जल्पन्ति, पुनः सविषं-विषसहितं यथा स्यात्तथा दशन्ति, तथा पुनर्ये छन्नं-प्रच्छन्नं यथा स्यात्तथा शिङ्घन्तो-जिघ्राणा आयन्ति, दुर्जनपक्षे सविषं दशनं परस्य विनाशकृच्छिद्रप्रकाशनं परच्छिद्रविलोकनार्थं प्रच्छन्नागमनं च बोध्यम् ॥ ६२२ ॥ तत्-तस्मात्कारणात् त्वं धवलो न भवसि, किन्तु अनया कृष्णलेश्यया कालोऽसि, तस्मात्तव दर्शनेनापि अस्माकं मालिन्यं-मलिनत्वं भवति ॥ ६२३ ॥ इति भणित्वा-उक्त्वा यावत् त्रयो वरपुरुषाः-प्रधानपुरुषाः निजनिजस्थानेषु गताः तावत्कुटिलो-वक्रः स्वभावो यस्य स कुटिलस्वभावस्तुर्यः-चतुर्थः पुरुषः पुनरपि तस्य धवलस्य पार्श्वे आसीन-उपविष्टः ॥ ६२४ ॥ स पुमान् धवलं प्रति जल्पति-कथयति, अहो श्रेष्ठिन् ! ईदृशो मन्त्रः-आलोचः एभ्यस्त्रिभ्यो न कथ्यते, यद्-यस्मात्कारणात् एतेऽरिभूताः-शत्रुतुल्यास्तव अहितमेव चिन्तयन्ति ॥ ६२५ ॥

इक्कोऽहं तुह मणवंछियत्थसंसाहणिक्कतल्लिच्छो । अच्छामि ता तुमं मा, निअचित्ते किंपि चिंतेसु ॥६२६॥
किंतु विसेसेण तुमं, सिरिपालेण समं कुणसु मित्तिं । जं सो वीसत्थमणो अम्हाणं सुहहओ होइ ॥६२७॥
तो धवलो तुट्ठमणो, भणइ तुमं चेव मज्झ वरमित्तो । किं तु मह वंछियाणं, सिद्धी होही कहं कहसु ॥६२८॥
सो आह जुज्झणत्थं, दोराधारेण मंडिए मंचे । कह कहवि तं चडाविअ, केणवि कोऊहलमिसेणं ॥६२९॥
छन्नं चिय छिन्ने दोरयंमि सो निच्छयं समुद्दंमि । पडिही तो तुह वंछिय-सिद्धी होही निरववायं ॥६३०॥

एकोऽहं तव मनोवाञ्छितार्थसंसाधने एका सा एव लिप्सा यस्य सः, त्वन्मनश्चिन्तितार्थसम्यक्साधनतत्पर इत्यर्थः, 'अच्छामि' त्ति स्थितोऽस्मि, तस्मात् त्वं निजचित्ते किमपि मा चिन्तय-कामपि चिन्तां मा कृथा इत्यर्थः ॥ ६२६ ॥ किन्तु त्वं श्रीपालेन समं-सार्द्धं विशेषेण मैत्र्यं कुरुष्व, यद्-यस्मात्कारणात् विश्वस्तं-विश्वासयुक्तं मनो यस्य स विश्वस्तमनाः सन् सः-श्रीपालोऽस्माकं सुखहतो भवति, सुखेन हतं-हननं यस्य स इति समासः ॥ ६२७ ॥ ततो धवलस्तुष्टं मनो यस्य स तुष्टमनाः सन् भणति-कथयति, मम वरमित्रं-प्रधानसुहृद् त्वमेवासि, किन्तु मम वाञ्छितानां सिद्धिः कथं भविष्यति त्वं कथय ॥ ६२८ ॥ स आह- योधनार्थं-युद्धादिकरणार्थं दवरकाधारेण मण्डिते मञ्चे कथंकथमपि-केन केनापि प्रकारेण केनापि कुतूहलमिषेण-कौतुकव्याजेन तं श्रीपालं 'चडाविय' त्ति आरोह्य ॥ ६२९ ॥ छन्नं-प्रच्छन्नमेव दवरके छिन्ने सति सः निश्चयतः समुद्रे पतिष्यति, ततः-तदनन्तरं निरपवादं यथा स्यात्तथा तव वाञ्छितस्य सिद्धिः-निष्पत्तिः भविष्यति, निर्गतः अपवादो-लोकनिन्दा यत्र कर्मणि तन्निरपवादमिति क्रियाविशेषणम् ॥ ६३० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो संतुट्ठो धवलो, कुमरसहाए करेइ केलीओ। बहुहासपेसलाओ, तहा जहा हसइ कुमरोऽवि ॥६३१॥
अन्नदिणे सो उच्चे, मंचे धवलो सयं समारूढो। सिरिपालं पइ जंपइ, पिच्छह पिच्छह किमेयंति ॥६३२॥
दीसइ समुद्दमज्झे, अदिट्ठपुव्वं मइत्ति जंपंतो। उत्तरइ सयं तत्तो, कहेइ कुमरस्स सविसेसं ॥ ६३३ ॥
कुमर ! अपुव्वं कोऊहलंति तुज्झवि पलोयणसरिच्छं। जं जीवियाउ बहुअं, दिट्ठं पवरं भणइ लोओ ॥६३४॥
तो सहसा कुमरोऽवि हु, चडिओ जा तत्थ उच्चए मंचे। ता मंचदोरछेओ, विहिओ य कुमंतिणा तेण ॥६३५॥

ततो धवलः सन्तुष्टः सन् कुमारस्य सभायां बहुहासेन पेशला-रम्याः केलयः-क्रीडास्तथा-तेन प्रकारेण करोति यथा श्रीपालकुमारोऽपि हसति-मनाक्हास्यं करोति ॥ ६३१ ॥ अन्यस्मिन् दिने स धवलः स्वयम्-आत्मना उच्चे मञ्चे समारूढः सन् श्रीपालं प्रति इति जल्पति-कथयति, इतीति किं ?-भो यूयं प्रेक्षध्वं प्रेक्षध्वं किमेतत् वारिधावस्तीति शेषः ॥ ६३२ ॥ मया न पूर्वं दृष्टं-अदृष्टपूर्वं समुद्रमध्ये दृश्यते इति जल्पन् धवलः स्वयं ततो मञ्चादुत्तरति, पुनः कुमाराय सविशेषं कथयति, किं कथयतीत्याह- ॥ ६३३ ॥ हे कुमार ! अपूर्वं कुतूहलमेतत् इतिहेतोस्त्वापि प्रलोकनसदृशं-दर्शनसदृशं विद्यते, यद्-यस्मात्कारणात् लोको जीविताद्बहुकं दृष्टं प्रवरं-प्रधानं भणति-वदति ॥ ६३४ ॥ ततः-तदनन्तरं कुमारोऽपि सहसा-अकस्मात् यावत्तत्र उच्चके मञ्चे चटित-आरूढः तावत्तेन कुमन्त्रिणा-कुबुद्धिमित्रेण मञ्चदवरकच्छेदो विहितः-कृतः ॥ ६३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो सहसा मंचाओ कुमरोऽवि पडंतओ नवपयाइं । झाएइ तक्खणं चिय, पडिओ मगरस्स पुट्ठीए ॥६३६॥
नवपयमाहप्पेणं, ओसहियबलेण मगरपुट्ठिठिओ । खणमित्तेणवि कुमरो, सुहेण कुंकुणतडे पत्तो ॥६३७॥
तत्थ य वणंमि कत्थवि, चंपयतरुवरतलंमि सो सुत्तो । जा जग्गइ तो पिच्छइ, सेवापरसुहडपरिवेढं ॥६३८॥
विणओणएहिं तेहिं, भडेहिं पंजलिउडेहिं विन्नत्तं । देव ! इह कुंकणक्खे, देसे ठाणाभिहाणपुरे ॥ ६३९ ॥
वसुपालो नाम निवो, तेणं अम्हे इमं समाइट्ठा । जलहितडे जं अचलंतछायतरुतलसमासीणं ॥६४०॥

ततः सहसा-सद्यो मञ्चात् पतन् कुमारोऽपि नव पदानि ध्यायति, तद्ध्यानप्रभावात् तत्क्षणं-तत्कालमेव मकरस्य-महामत्स्यविशेषस्य पृष्ठौ पतितः ॥ ६३६ ॥ ततो नवपदमाहात्म्येन औषधिकाबलेन च मकरस्य पृष्ठौ स्थितः सन् कुमारः क्षणमात्रेणापि सुखेन कुङ्कुणतटे प्राप्तः ॥ ६३७ ॥ तत्र च कुत्रापि वने चम्पकश्चासौ तरुवरश्च-प्रधानवृक्षस्तस्य तले स श्रीपालः सुप्तो-निद्रां प्राप्तः, ततो यावज्जागर्त्ति तावत्सेवापरैः सुभटैः परिवेष्टम्-आत्मानं परिवेष्टितं प्रेक्षते पश्यति ॥ ६३८ ॥ विनयेन अवनतैः-नम्रैरत एव प्राञ्जलिपुटैः-बद्धाञ्जलिभिस्तैर्भटैर्विज्ञप्तम्, तथाहि- हे देव ! इह-अस्मिन् कुङ्कणाख्ये देशे स्थानाभिधाने-स्थानाख्ये पुरे-नगरे ॥ ६३९ ॥ वसुपालो नाम नृपो-राजाऽस्ति, तेन राज्ञा वयमिदं-वक्ष्यमाणं समादिष्टाः, इदं किमित्याह-जलधितटे-समुद्रतीरे अचलन्ती छाया यस्य सः अचलच्छायो यस्तरुः-वृक्षस्तस्य तले समासीनम्-उपविष्टम् ॥ ६४० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पिच्छेह पुरिसरयणं, अज्जदिणे चेव पच्छिमे जामे । तं तुरियं चिय तुरयारूढं काऊण आणेह ॥ ६४१ ॥
ता अम्हेहिं तुमं चिय, दिट्ठोऽसि जहुत्ततरुतलासीणो । सामिय ! पुन्नवसेणं, ता तुरियं तुरयमारुहह ॥६४२॥
कुमरोऽवि हयारूढो, तेहिं सुहडेहिं चेव परियरिओ । खणमित्तेणवि पत्तो, ठाणयपुरपरिसरवणंमि ॥६४३॥
तस्साभिमुहं रायावि मंतिसामंतसंजुओ एइ । महया महेण कुमरं, पुरे पवेसेइ, कयसोहे ॥ ६४४ ॥
काऊण य पडिवत्तिं, तस्स कुमारस्स असणवसणेहिं । पभणेइ सबहुमाणं, राया एयारिसं वयणं ॥६४५॥

यं पुरुषरत्नमद्यदिन एव पश्चिमे यामे-पाश्चात्त्ये प्रहरे प्रेक्षध्वं-यूयं विलोकयत, तं पुरुषं त्वरितं-शीघ्रमेव तुरगारूढम्-अश्वारूढं कृत्वा आनयत ॥ ६४१ ॥ अयं नृपादेशोऽस्ति तस्मात् हे स्वामिन् ! अस्माभिर्यथोक्ततरुतले आसीनस्त्वमेव पुण्यवशेन दृष्टोऽसि-निरीक्षितोऽसि, तस्मात्त्वरितं-शीघ्रं तुरगम्-अश्वमारोहत यूयम् ॥ ६४२ ॥ कुमारोऽपि हयारूढः-अश्वारूढः तैरेव सुभटैः परिकरितः-परिवृतः क्षणमात्रेणापि स्थानपुरस्य पार्श्ववर्तिवने प्राप्तः ॥ ६४३ ॥ राजा वसुपालोऽपि मन्त्रिसामन्तैः संयुतः-सहितस्तस्य श्रीपालस्य अभिमुखं - सम्मुखं प्रति गच्छति, कृता शोभा यस्य तत् कृतशोभं तस्मिन् पुरे नगरे महता महेन-उत्सवेन कुमारं प्रवेशयति ॥ ६४४ ॥ च -पुनः तस्य कुमारस्य अशनवसनैः-भोजनवस्त्रैः प्रतिपत्तिं-भक्तिं कृत्वा राजा-वसुपालः सबहुमानं-बहुमानसहितमेतादृशं वचनं प्रकर्षेण भणति-कथयति ॥ ६४५ ॥

For Private and Personal Use Only

पुव्विं सहाइ पत्तो, एगो नेमित्तिओ मए पुट्ठो । को मयणमंजरीए, मह पुत्तीए वरो होही ? ॥ ६४६ ॥
तेणुत्तं जो वइसाहसुद्धदसमीइ जलहितीरवणे । अचलंतछायतरुतल-ठिओ हवइ सो इमीइ वरो ॥६४७॥
अज्जं चिय तंसि तहेव पाविओ वच्छ ! पुण्णजोएणं । ता मयणमंजरिमिमं, मह धूयं झत्ति परिणेसु ॥६४८॥
एवं भणिऊण नरेसरेण अइवित्थरेण वीवाहं । काराविऊण दिन्नं, हयगयमणिकंचणाईयं ॥ ६४९ ॥
तत्तो सिरिसिरिपालो, नरनाहसमप्पियंमि आवासे । भुंजइ सुहाइं जं पुन्नमेव मूलं हि सुक्खाणं ॥६५०॥

कीदृशमित्याह- पूर्वं मम सभायां प्राप्तः एको नैमित्तिको मया पृष्टः मम पुत्र्या मदनमञ्जर्याः को वरो-भर्ता भविष्यति ? ॥ ६४६ ॥ एवं मया पृष्टे सति तेन नैमित्तिकेनोक्तं- यो वैशाखसुदिदशम्यां जलधेः-समुद्रस्य तीरे यद्वनं तस्मिन् अचलच्छायस्य तरोस्तले स्थितो भवति स पुमान् अस्या वरो भावी ॥ ६४७ ॥ अद्यैव हे वत्स ! पुण्ययोगेन तथैव-नैमित्तिकोक्तप्रकारेणैव त्वं प्राप्तोऽसि, तस्मात् कारणात् इमां मदनमञ्जरीं मम पुत्रीं झटिति-शीघ्रं परिणयस्व ॥ ६४८ ॥ एवं भणित्वा-उक्त्वा नरेश्वरेण-राज्ञाऽतिविस्तारेण विवाहं-पाणिग्रहणं कारयित्वा हयगजमणिकाञ्चनादिकम्-अश्वहस्तिरत्नस्वर्णादिकं दत्तम् ॥ ६४९ ॥ ततः-तदनन्तरं श्रीमान् श्रीपालो नरनाथेन-राज्ञा समर्पिते आवासे-मन्दिरे सुखानि भुङ्क्ते-अनुभवति, यद्-यस्मात्कारणात् सुखानां मूलं कारणं पुण्यमेवास्ति, पुण्यवान् यत्र गच्छति तत्र सुखमेवानुभवतीत्यर्थः ॥ ६५० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रन्नो दिंतस्सवि देसवासगामाइआहिवत्तंपि । कुमरो न लेइ इक्कं थइयाइत्तं नु मग्गेइ ॥ ६५१ ॥
राया तं हीणंपि हु, कम्मं दाऊण तस्स तुट्ठिकए । अच्चंतमाणणिज्जाण तेण दावेइ तंबोलं ॥ ६५२ ॥
इओ य- जइया समुद्दमज्झे, पडिओ कुमरो तया धवलसिट्ठी । तेण कुमित्तेण समं, संतुट्ठो हिययमज्झंमि ॥
लोयाण पच्चयत्थं, धवलो पभणइ अहह किं जायं । जं अम्हाणं पहु सो, कुमरो पडिओ समुद्दंमि ॥ ६५४ ॥
हिययं पिट्टेइ सिरं, च कुट्टए पुक्करेइ मुक्कसरं । धवलो मायाबहुलो, हा कत्थ गओऽसि सामि ! तुमं ? ॥ ६५५॥

देशवासग्रामादेराधिपत्यं-स्वामित्वमपि ददतोऽपि राज्ञः सकाशात् कुमरो न लाति-न गृह्णाति, नु इति विशेषे, एकं 'थइयाइत्तं' ति स्थगीधरत्वं-ताम्बूलदानाधिकारित्वं मार्गयति ॥ ६५१ ॥ राजा वसुपालस्तस्य कुमारस्य तुष्टिकृते-तोषनिमित्तं हीनमपि तत्ताम्बूलदानलक्षणं कर्म्म दत्त्वाऽत्यन्तमाननीयेभ्यः पुरुषेभ्यस्तेन श्रीपालेन ताम्बूलं दापयति ॥ ६५२ ॥ इतश्च यदा कुमारः समुद्रमध्ये पतितस्तदा धवलाख्यश्रेष्ठी तेन कुमित्रेण समं-सह हृदयमध्ये सन्तुष्टः सञ्जातः ॥ ६५३ ॥ लोकानां प्रत्ययार्थं-प्रतीत्युत्पादनार्थं धवलः प्रकर्षेण भणति, अहहेति खेदे, किं जातं ?, कुत्सितं कार्यं जातमित्यर्थः, यत्-यस्मात्कारणात् अस्माकं प्रभुः-स्वामी स कुमारः समुद्रे पतितः ॥ ६५४ ॥ अथ माया बहुला-प्रचुरा यस्य स मायाबहुलो धवलः श्रेष्ठी हृदयं-वक्षस्थलं पिट्टयति, च - पुनः शिरो-मस्तकं कुट्टयति, पुनर्मुक्तः स्वरो यत्र कर्म्मणि तत् मुक्तस्वरं यथा स्यात्तथा पूत्करोति-पूत्कारं करोति, कथमित्याह- हा इति खेदे, हे स्वामिन् ! त्वं कुत्र गतोऽसि ? एवं पूत्करोति स्मेत्यर्थः ॥ ६५५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं सोऊणं मयणाउ ताओ हाहारवं कुणंतीओ । पडियाउ मुच्छियाओ, सहसा वज्जाहयाओव्व ॥६५६॥
जलणिहिसीयलपवणेण लद्धसंचेयणाउ ताउ पुणो । दुक्खभरपूरियाओ, विमुक्कपुक्काउ रोयंति ॥६५७॥
हा पाणनाह ! गुणगण-सणाह! हा तिजयसारउवयार !। हा चंदवयण! हा कमलनयण! हा रूवजियमयण!॥६५८ ॥
हाहा हीणाण अणाहयाण दीणाण सरणरहियाणं । सामिय ! तए विमुक्काण सरणमम्हाण को होही ॥६५९॥

तं-धवलं कृतपूत्कारं श्रुत्वा ते मदनसेनामदनमञ्जूषे हाहारवं कुर्वत्यौ सहसा-अकस्मात् वज्रेण आहते इव मूर्च्छिते पतिते, मूर्च्छां प्राप्य पतिते इत्यर्थः ॥ ६५६ ॥ जलनिधेः-समुद्रस्य शीतलपवनेन-शिशिरवायुना लब्धा प्राप्ता संचेतना-सम्यक्चेतना याभ्यां ते लब्धसञ्चेतने दुःखस्य भरः -समूहस्तेन पूरिते-भरिते अत एव 'विमुक्कपुक्काओ' त्ति विमुक्तपूत्कारे सत्यौ रुदितो-रोदनं कुरुतः ॥ ६५७ ॥ कथं रुदित इत्याह- हा इति खेदे, हे प्राणनाथ! हे गुणगणैः सनाथ- सहित! हा त्रिजगति सार उपकारो यस्य तत्सम्बुद्धौ हे त्रिजगत्सारोपकार ! हा चन्द्रवदन-चन्द्रवद्वदनं-मुखं यस्य तत्सम्बुद्धौ हे चन्द्रवदन! हा कमलनयन-कमलवन्नयने-नेत्रे यस्य तत्सम्बुद्धौ हे कमलनयन ! हा रूपजितमदन-रूपेण जितो मदनः-कामो येन तत्सम्बुद्धौ हे रूपजितमदन ! ॥ ६५८ ॥ हाहा इति खेदे, हे स्वामिन् ! त्वया विमुक्तयोः-त्यक्तयोरत एव शरणरहितयोरावयोः कः शरणं भविष्यतीति ?, कीदृशयोरावयोः ?-हीनयोः पुनरनाथयोः तथा दीनयोः, इत्थं तयो रोदनं श्रुत्वा ॥ ६५९ ॥

For Private and Personal Use Only

तो धवलो सुयणो इव, जंपइ सुयणू ! करेह मा खेयं । एसोऽहं निच्चंपि हु, तुम्हं दुक्खं हरिस्सामि ॥ ६६० ॥
तं सोऊणं ताओ, सविसेसं दुक्खियाउ चिंतंति । नूणमणेणं पावेण चेव कयमेरिसमकज्जं ॥ ६६१ ॥
इत्थंतरे उच्छलियं जलेहिं, वियंभियं उब्भडमारुएहिं । समुन्नयं घोरघणावलीहिं, कडक्कियं रुद्दतडिल्लयाहिं॥६६२
घोरंधयारेहिं विवड्ढियं च, रउद्दसद्देहिं समुट्ठियं च । अट्टट्टहासेहिं पयट्टियं च, सयं च उप्पायसएहिं जायं ॥६६३॥

ततः-तदनन्तरं धवलः श्रेष्ठी स्वजन इव जल्पति, हे सुतनू-हे शोभनाङ्ग्यौ युवां मा खेदं कुरुतं, एषोऽहं नित्यमपि हु इति निश्चितं युवयोः-भवत्योर्दुःखं हरिष्यामि-दूरीकरिष्यामि ॥ ६६० ॥ ततस्तद्वचनं श्रुत्वा ते स्त्रियौ सविशेषं दुःखिते सत्यौ चिन्तयतः, किं चिन्तयत इत्याह- नूनं-निश्चितम् अनेन पापेन-क्रूरेणैव ईदृशमकार्यं कृतमिति ज्ञायते॥ ६६१ ॥ अत्रान्तरे-अस्मिन्नवसरे जलैः-समुद्रपानीयैः उच्छलितं, तथा उद्भटमारुतैः-दुस्सहवायुभिर्विजृम्भितं-विस्तृतं, तथा घोरघनावलीभिः-भयानकमेघमालाभिः समुन्नतं-उन्नम्यागतं, तथा रुद्रतडिल्लताभिः-भयङ्करविद्युद्भिः कडक्कितम्, अनुकरणशब्दोऽयम्॥ ६६२ ॥ च - पुनः घोरान्धकारैर्विशेषेण वर्द्धितम्, च -पुनः रौद्रशब्दैः-भयानकध्वनिभिः समुत्थितं, च- पुनः अट्टट्टहासैः प्रवर्तितं, च -पुनः स्वयम्-आत्मना उत्पातशतैः-उपद्रवशतैर्जातम्-उत्पन्नम्, अत्र पद्यद्वये सर्वा अपि भावोक्तयो ज्ञेयाः ॥ ६६३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्तो हल्लोहलिएसु तेसु पोएसु पोयलोएहिं । खलभलिअं जलजलिअं कलकलिअं मुच्छियं च खणं ॥६६४॥
डमडमडमंतडमरुयसद्दो अच्चंतरुद्दरूवधरो । पढमं च खित्तवालो, पयडीहूओ सकरवालो ॥६६५॥
तो माणिपुन्नभद्दा, कविलो तह पिंगलो इमे चउरो । गुरुमुग्गरवग्गकरा, पयडीहूआ सुरा वीरा ॥६६६॥
कुमुयंजणवामणपुप्फदंतनामेहिं दंडहत्थेहिं । पयडीहूअं च तओ, चउहिंवि पडिहारदेवेहिं ॥६६७॥

ततस्तेषु पोतेषु-प्रवहणेषु हल्लोहलितेषु-अतिव्याकुलीभूतेषु सत्सु पोतलोकैः-सांयात्रिकजनैः खलभलितं पुनः जलजलितं पुनः कलकलितं-कलकलशब्दयुक्तैर्जातं च - पुनः क्षणं यावन्मूर्च्छितम् ॥ ६६४ ॥ ततः किं जातमित्याह-प्रथमं क्षेत्रपालः प्रकटीभूतः, कीदृशः ?-डमडमडमेति अन्तः-स्वरूपं यस्य स एवंविधो डमरुकस्य-वाद्यविशेषस्य शब्दो यस्य स डमडमडमान्तडमरुकशब्दः, पुनः अत्यन्तरौद्रं रूपं धरतीति अत्यन्तरौद्ररूपधरः पुनः सह करवालेन-खड्गेन वर्त्तते इति सकरवालः ॥ ६६५ ॥ ततो माणिभद्र १ पुर्णभद्रौ २ कपिलः ३ तथा पिङ्गलः ४ इमे चत्वारो वीराः सुराः प्रकटीभूताः, कीदृशाः ? गुरुः-महान् यो मुद्गरः-शस्त्रविशेषस्तेन व्यग्रा-व्याकुलाः करा-हस्ता येषां ते गुरुमुद्गरव्यग्रकराः ॥ ६६६ ॥ च - पुनः ततः-तदनन्तरं कुमुदाऽञ्जन - वामन - पुष्पदन्त - नामभिश्चतुर्भिरपि प्रतिहारदेवैः प्रकटीभूतं, कीदृशैः- ? दण्डः हस्तेषु येषां ते दण्डहस्तास्तैः ॥ ६६७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चक्केसरी अ देवी, जलंतचक्कदुयं भमाडंती । बहुदेवदेविसहिया, पयडीहूआ भणइ एवं ॥ ६६८ ॥
रेरे गिण्हह एयं, पढमं दुब्बुद्धिदायगं पुरिसं । जं सव्वाणत्थाणं, मूलं एसुच्चिय न अन्नो ॥ ६६९ ॥
तो झत्ति खित्तवालेण सो नरो बंधिऊण पाएहिं । अवलंबिओ य कूवय-थंभंमि अहोमुहं काउं ॥६७०॥
दाऊण मुहे असुइं, खग्गेणं छिन्निऊण अंगाइं । सो दिसिपालाण बलिव्व दिन्नओ संतिकरणत्थं ॥६७१॥
तत्तो सो भयभीओ, धवलो मयणाण ताण पिट्ठिठिओ । पभणेइ ममं रक्खह, रक्खह सरणागयं निययं ॥६७२॥

च - पुनः चक्रेश्वरीदेवी प्रकटीभूता सती एवं-वक्ष्यमाणप्रकारेण भणति, कीदृशी देवी ? -ज्वलद्-दीप्यमानं करद्वये चक्रद्वयं भ्रामयन्तीति, पुनः बहुभिर्देवैः देवीभिश्च सहिता-परिवृता ॥ ६६८ ॥ किं भणतीत्याह- रेरे देवा ! यूयं प्रथममेतं दुर्बुद्धिदायकं पुरुषं गृह्णीत यद्-यस्मात्कारणात् सर्वेषामनर्थानां मूलमेष एव पुरुषोऽस्ति, नाऽन्यः ॥ ६६९ ॥ ततः क्षेत्रपालेन झटिति-शीघ्रं स नरः पादाभ्यां बद्ध्वा तस्य मुखं अधः कृत्वा कूपस्तम्भेऽवलम्बितश्च स पुमान् ॥ ६७० ॥ तस्य मुखे अशुचिं-विष्ठां दत्त्वा खड्गेन अङ्गानि-बाह्वादीनि छित्त्वा स दुष्टपुरुषो दिक्पालेभ्यो बलिरिव-उपहार इव शान्तिकरणार्थं दत्तः, अङ्गानि खण्डशः कृत्वा दशादेक्षु विक्षिप्त इत्यर्थः ॥ ६७१ ॥ ततो भयभीतः स धवलस्तयोर्मदनसेनामदनञ्जूषयोः पृष्ठे स्थितः सन् प्रभणति-प्रकर्षेण कथयति, किमित्याह- निजकं-स्वकीयं शरणागतं मां रक्षतं रक्षतम् ॥ ६७२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ता चक्केसरिदेवी, पभणइ हे दुट्ठ ! धिट्ठ पाविट्ठ ! । एयाण सरणगमणेण चेव मुक्कोऽसि जीवंतो ॥६७३॥
विणओणयाउ ताओ, मयणाओ दोवि विम्हियमणाओ । भणियाओ देवीए, सपसायं एरिसं वयणं ॥६७४॥
वच्छा ! वल्लह तुम्हतणउ गरुईरिद्धिसमेउ । मासब्भिंतरि निच्छइण मिलिसइ धरहु म खेउ ॥६७५॥
एम भणेविणु चक्कहरि परिमलगुणिहिं विसाल । मयणह कंठिहिं पक्खिवइ सुरतरुकुसुमह माल ॥६७६॥
तुम्हह दुट्ठ न देखिसिइ मालह तणइ पमाणि । एम भणेविणु चक्कहरि देवी गई नियठाणि ॥ ६७७ ॥

ततश्चक्रेश्वरीदेवी प्रभणति-रे दुष्ट ! धृष्ट ! पापिष्ठ ! एतयोर्महासत्योः शरणगमनेनैव त्वं जीवन्मुक्तोऽसि ॥ ६७३ ॥ विनयेन अवनते-नम्रे पुनर्विस्मितम्-आश्चर्यप्राप्तं मनो ययोस्ते विस्मितमनसौ ते द्वे अपि मदने देव्या चक्रेश्वर्या सप्रसादं-प्रसादसहितं यथा स्यात्तथा ईदृशं वचनं भणिते ॥ ६७४ ॥ हे वत्से-हे पुत्र्यौ युवयोर्वल्लभो-भर्त्ता गुर्व्या-महत्या ऋद्ध्या समेतः-संयुक्तो मासाभ्यन्तरे-मासमध्ये निश्चयेन मिलिष्यति, युवां खेदं मा धरताम् ॥ ६७५ ॥ एवं भणित्वा-उक्त्वा चक्रधरा-चक्रेश्वरीदेवी मदनसेनामदनमञ्जूषयोः कण्ठयोर्विषये परिमलगुणैर्विशाले-विस्तीर्णे सुरतरुकुसुमानां-कल्पवृक्षपुष्पाणां माले प्रक्षिपति ॥ ६७६ ॥ मालयोः प्रमाणेन-प्रभावेनेत्यर्थः युवां दुष्टः पुमान् न द्रक्ष्यति-न विलोकयिष्यतीत्यर्थः, एवं भणित्वा चक्रधरा-चक्रेश्वरीदेवी निजस्थाने गता, स्वस्थानं गतवतीत्यर्थः ॥ ६७७ ॥ एतानि त्रीण्यपि दोहाछन्दांसि बोध्यानि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पभणंति तओ तिन्निवि, ते पुरिसा सरलबुद्धिणो धवलं । दिट्ठं कुबुद्धिदायगफलं तए एरिसविवागं ॥६७८॥
एयाणं च सईणं, सरणपभावेण जइवि जीवंतो । छुट्टोऽसि तहवि पावं, पुणो करंतो लहसिऽणत्थं ॥६७९॥
जो पररमणीरमणिक्कलालसो होइ रागगहगहिओ । जइ सो वुच्चइ पुरिसो, ता के खरकुक्कुरा अन्ने ? ॥६८०॥
धिद्धी ताण नराणं, जे पररमणीण रूवमित्तेणं । खुहिआ हणंति सव्वं, कुलजससग्गापवग्गसुहं ॥६८१॥

ततः-तदनन्तरं ते त्रयोऽपि सरलबुद्धयः-ऋजुबुद्धिधराः पुरुषाः धवलं प्रभणन्ति-कथयन्ति, किं भणन्तीत्याह-हे धवल ! ईदृशो विपाकः-परिपाको यस्य तत् ईदृशविपाकं कुबुद्धिदायकस्य फलं त्वया दृष्टम् ॥ ६७८ ॥ च - पुनः एतयोः सत्योः शरणप्रमावेण यद्यपि त्वं जीवन् छुटितोऽसि तथापि पुनः पापं कुर्वन् अनर्थं लभसे -प्राप्स्यसीत्यर्थः ॥ ६७९ ॥ यः पुमान् पररमणीभिः-परस्त्रीभिः सह रमणे एका लालसा-तृष्णा यस्य स एवंविधो भवति, कीदृशः सन् ?-रागः-कामरागः एव ग्रहस्तेन गृहीतः सन्, यदि स पुमानपि पुरुष उच्यते तत्-तर्हि मनुष्यरूपेण खरकुर्कुरा-गर्दभश्वाना अन्ये के उच्यन्ते? ॥ ६८० ॥ तान् नरान् धिग् धिगस्तु-धिक्कारोऽस्तु ये पररमणीनां रूपमात्रेण क्षुभिताः-चलिताः सन्तः सर्वं कुलयशःस्वर्गापवर्गसुखं घ्नन्ति-विनाशयन्ति, कुलम्-उच्चैर्गोत्रं, यशः-कीर्त्तिः, स्वर्गसुखं प्रतीतम्, अपवर्गसुखं-मोक्षसुखम्, एतेषां समाहारद्वन्द्वः ॥ ६८१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जलहिंमि वहंताणं पोआणं, जाव कइवयदिणाइं । जायाइं तओ पुणरवि, धवलो चिंतेइ हियंमि ॥६८२॥
अत्थि अहो मह पुन्नोदयत्ति जं सो उवद्दवो टलिओ । फलिया एसा य सिरी, सव्वावि सुहेण मज्झेव ॥६८३॥
जइ रमणीओ एयाओ कहवि मन्नंति मह कलत्तत्तं । ताऽहं होमि कयत्थो, इंदाओ वा समब्भहिओ ॥६८४॥
इअ चिंतिऊण तेणं, जा दूइमुहेण पत्थिया ताओ । ता ताहिं कुवियाहिं, दूई निब्भत्थिया बाढं ॥६८५॥
तहवि हु कामपिसायाहिट्ठिओ नट्ठनिम्मलविवेओ । तेणज्झवसाएणं, खणंपि पावेइ नो सुक्खं ॥ ६८६ ॥

जलधौ-समुद्रे वहतां पोतानां-प्रवहणानां यावत् कतिपयानि-कियन्ति दिनानि जातानि ततः पुनरपि धवलो हृदये चिन्तयति, किं चिन्तयतीत्याह- ॥ ६८२ ॥ अहो इति आश्चर्ये, मम पुण्योदयोऽस्तीति, कथमित्याह यद्-यस्मात् कारणात् सः-प्रागुक्तस्वरूप उपद्रवष्टलितश्च- पुनः एषा सर्वापि श्रीः-लक्ष्मीः सुखेन ममैव फलिता-फलवती जाता, अथ मां विनाऽस्या अन्यः स्वामी क इत्यर्थः ॥ ६८३ ॥ यदि एते द्वे रमण्यौ-स्त्रियौ कथमपि-केनापि प्रकारेण मम कलत्रत्वं-वधूत्वं मन्येते तत्-तर्हि अहं कृतार्थो भवामि-निष्पन्नप्रयोजनः स्यामित्यर्थः, वाऽथवा इन्द्रादपि समभ्यधिकः स्याम् ॥ ६८४ ॥ इति चिन्तयित्वा तेन धवलेन यावत् दूतीमुखेन ते स्त्रियौ प्रार्थिते-प्रार्थनाविषयीकृते तावत् कुपिताभ्यां-क्रुद्धाभ्यां ताभ्यां मदनाभ्यां दूती बाढम् अत्यर्थं निर्भर्त्सिता-तर्जिता ॥ ६८५ ॥ तथापि हु इति-निश्चितं कामः-कन्दर्प एव पिशाचो-दुष्टव्यन्तरस्तेन अधिष्ठितः-आश्रितोऽत एव नष्टो निर्मलो विवेको यस्य स एवंविधः स धवलश्रेष्ठी तेन अध्यवसायेन-मनःपरिणामेन क्षणमपि सुखं न प्राप्नोति ॥ ६८६ ॥

For Private and Personal Use Only

अन्नदिणे सो नारीवेसं काऊण कामगहगहिलो । मयणाणं आवासं, सयं पविट्ठो सुपाविट्ठो ॥६८७॥
जाव पलोएइ तहिं, ताव न पिच्छेइ ताउ मयणाओ । पुरओ ठिआउ मालाइसएण अद्दिस्सरूवाओ ॥६८८॥
सो रागंधो अंधुव्व जाव भमडेइ तत्थ पवडंतो । तो दासीहिं सुणउव्व कड्ढिओ कुट्टिऊण बहिं ॥६८९॥
इत्तो ते बोहित्था, मग्गेणऽन्नेण निज्जमाणावि । सयमेव कुंकुणतडे, पत्ता मासंमि किंचूणे ॥६९०॥
पढमं उत्तरिऊणं, धवलो जा जाइ पाहुडविहत्थो । रायकुलं ता पासइ, नरवरपासंमि सिरिपालं ॥६९१॥

अन्यस्मिन् दिने स धवलो नारीवेषं स्त्रीवेषं-कृत्वा कामरूपग्रहेण ग्रथिलः सन् स्वयम्-आत्मना मदनयोः-श्रीपालस्त्रियोः आवासं-मन्दिरं प्रविष्टः, तयोरावासे प्रविष्टवानित्यर्थः, कीदृशः सः ?-सुतरामतिपापिष्ठः सुपापिष्ठः ॥ ६८७ ॥ यावत्तत्रावासे प्रलोकयति तावत् पुरतः-अग्रतः स्थिते ते मदने न प्रेक्षते-न पश्यति, कीदृश्यौ मदने ?-मालाऽतिशयेन-मालयोः प्रभावेण अदृश्यं रूपं ययोस्ते अदृश्यरूपे ॥ ६८८ ॥ स धवलो रागेण-कामरागेण अन्धः सन् अन्धः पुमानिव प्रपतन्-प्रकर्षेण पतन् यावत्तत्र मदनावासे भ्रमति तावद् दासीभिः-मदनयोश्चेटीभिः शुनकः-कुर्कुर इव कुट्टयित्वा बहिः 'कड्ढिओ' त्ति निष्कासितः ॥ ६८९ ॥ इतः परं ते बोहित्थाः-पोताः अन्येन मार्ग्गेण नीयमानाः-प्राप्यमाणा अपि स्वयमेव किञ्चिदूने मासे कुङ्कुणतटे प्राप्ताः ॥ ६९० ॥ अथ धवलः प्रथममुत्तीर्य प्राभृतेन-ढौकनेन विशिष्टौ युक्तौ हस्तौ यस्य स प्राभृतविहस्तः सन् यावत् राजकुलं-नृपमन्दिरं याति तावन्नरवरस्य-राज्ञः पार्श्वे श्रीपालं पश्यति ॥ ६९१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रायावि सत्थवाहस्स तस्स दावेइ गुरुयबहुमाणं । तंबोलं तेणं चिय, सिरिपालेणं विसेसेणं ॥ ६९२ ॥
सिरिपालकुमारेणं, नाओ सिट्ठी स दिट्ठमित्तोवि । सिट्ठी पुण सिरिपालं, दट्ठूणं चिंतए एवं ॥ ६९३ ॥
धिद्धी किं सो एसो, सिरिपालो धवलसिट्ठिणो कालो । किंवा तेण सरिच्छो, अन्नो पुरिसो इमो कोऽवि ? ॥६९४॥
ठाऊण खणं नरवरसहाइ जा उट्ठिओ धवलसिट्ठी । पडिहाराओ पुच्छइ, थइआइत्तो इमो को उ ? ॥६९५॥
तेणं कहिओ सव्वोऽवि तस्स कुमरस्स चरिअवुत्तंतो । तं सोऊणं सिट्ठी, जाओ वज्जाहउव्व दुही ॥ ६९६ ॥

राजाऽपि तस्मै सार्थवाहाय तेन श्रीपालेनैव विशेषेण गुरुको-महान् बहुमानो यत्र तद् गुरुकबहुमानं ताम्बूलं दापयति ॥ ६९२ ॥ श्रीपालकुमारेण स धवलश्रेष्ठी दृष्टमात्रोऽपि ज्ञात-उपलक्षितः, श्रेष्ठी पुनः श्रीपालं दृष्ट्वा एवं चिन्तयति, किं चिन्तयतीत्याह- ॥ ६९३ ॥ धिग् धिगस्तु, स एष किं श्रीपालोऽस्ति, कीदृशः श्रीपालः ?- धवलश्रेष्ठिनः कालः-कालतुल्यः, किंवा तेन-श्रीपालेन सदृक्षः-तुल्योऽयं कोऽपि अन्यः पुरुषोऽस्ति ॥ ६९४ ॥ एवं चिन्तयित्वा धवलश्रेष्ठी क्षणं यावन्नरवरस्य - राज्ञः सभायां स्थित्वा यावत् उत्थितस्तावद् बहिरागत्य प्रतीहारान्-द्वारपालान् पृच्छति, प्रतीहारं पृच्छतीत्यर्थः, किमित्याह- अयं 'थइयाइत्तो' त्ति ताम्बूलदानाधिकारी कः पुरुषोऽस्ति ॥ ६९५ ॥ तेन प्रतीहारेण तस्य कुमारस्य सर्वोऽपि चरितवृत्तान्तः कथितः, तं वृत्तान्तं श्रुत्वा श्रेष्ठी वज्राहत इव दुःखी जातः ॥ ६९६ ॥

For Private and Personal Use Only

चिंतेइ हिययमज्झे, हीही विहिविलसिएण विसमेण । जं जं करेमि कज्जं, तं तं मे होइ वियरीयं ॥ ६९७ ॥
एसो सो सिरिपालो, जाओ जामाउओ नरिंदस्स । गुरुओ ममावराहो, किं होही तं न याणामि ॥ ६९८ ॥
तहवि निअकज्जविसए, धीरेण समुज्जमो न मुत्तव्वो । जं सम्ममुज्जमंताण पाणिणं संकए हु विही ॥ ६९९ ॥
एवं सो चिंतंतो, जा पत्तो निययंमि उत्तारे । ता तत्थ गीअनिउणं, डुंबकुटुंबं च संपत्तं ॥ ७०० ॥
सो ताण गायणाणं, जाव न चिंताउलो दियइ दाणं । ता डुंबेणं पुट्ठो, रुट्ठो किं देव ! अम्हुवरिं ॥ ७०१ ॥

तदा स हृदयमध्ये चिन्तयति, हीही इति खेदे, विषमेण विधेः-दैवस्य विलासेन यत् यत् कार्यं करोमि तत्तत् मे-मम विपरीतं भवति ॥ ६९७ ॥ स एष श्रीपालो नरेन्द्रस्य-राज्ञो जामाता जातोऽस्ति, ममाऽपराधो गुरुको-महानस्ति, अथ किं भविष्यति ? तन्न जानामि ॥ ६९८ ॥ तथापि धीरेण-बुद्धिमता निजकार्यविषये सं-सम्यक् प्रकारेण उद्यमो न मोक्तव्यो-न त्याज्यो यद्-यस्मात्कारणात् सम्यक् उद्यच्छद्भ्य-उद्यमवद्भ्यः प्राणिभ्यो हु इति-निश्चितं विधिः-दैवोऽपि शङ्कते ॥ ६९९॥ ॥ स धवल एवं चिन्तयन् यावन्निजके-स्वकीये उत्तारे-निवेशस्थाने प्राप्तस्तावत्तत्र गीतेषु निपुणं-चतुरं गीतनिपुणं डुम्बानां कुटुम्बं च सम्प्राप्तम् ॥ ७०० ॥ स धवलश्चिन्तया आकुलः सन् यावत्तेभ्यो गायनेभ्यो दानं न ददाति तावत् डुम्बेन श्रेष्ठी पृष्टः- हे देव- हे महाराज ! अस्माकमुपरि किं रुष्टोऽसि यद्दानं न ददासीति भावः ॥ ७०१ ॥

एगंते डुंबं पइ, सो जंपइ देमि तुज्झ भूरिधणं । जइ इक्कं मह कज्जं, करेसि केणवि उवाएणं ॥ ७०२॥
डुंबोऽवि भणइ पढमं, कहेह मह केरिसं तयं कज्जं । जेण मए जाणिज्जइ, एयं सज्झं असज्झं वा ॥७०३॥
धवलो भणेइ जो नरवरस्स जामाउओ इमो अत्थि । जइ तं मारेसि तुमं, ता तुह मुहमग्गियं देमि ॥ ७०४॥
डुंबो भणेइ तं मारणंमि इक्कुऽत्थि एरिसोवाओ । जं अन्नायकुलं तं, पयडिस्सं एस डुंबुत्ति ॥७०५॥
तत्तो राया जामाउअंपि तं जमगिहंमि पेसेहि । एवं च कए नूणं, होही तुह कज्जसिद्धीवि ॥७०६॥

एतद् डुम्बवचनं श्रुत्वा स श्रेष्ठी एकान्ते डुम्बं प्रति जल्पति-कथयति, तुभ्यं भूरि-प्रचुरं धनं ददामि, यदि केनापि उपायेन एकं मम कार्यं करोषि, एतद्धवलवचः श्रुत्वा ॥७०२॥ डुम्बोऽपि भणति-कथयति, प्रथमं मह्यं कथय तत्कार्यं कीदृशमस्ति, येन कथनेन मया ज्ञायते एतत्कार्यं साध्यमसाध्यं वा ॥७०३॥ तदा धवलो भणति, योऽयं नरवरस्य -राज्ञो जामाताऽस्ति, यदि तं नृपजामातरं त्वं मारयसि तत्-तर्हि तव मुखमार्ग्गितं ददामि-तुभ्यं दानं ददामीत्यर्थः ॥७०४॥ डुम्बो भणति,तस्य-नृपजामातुर्मारणे एक ईदृश उपायोऽस्ति, क इत्याह- यत्- यतो न ज्ञातं कुलं यस्य सोऽज्ञातकुलस्तं तथाविधं तं-नृपजामातरम् एष डुम्ब इति प्रकटयिष्यामि ॥७०५॥ ततः-तदमन्तरं राजा तं जामातरमपि यमगृहे प्रेषयिष्यति, एवं च कृते सति नूनं-निश्चितं तव कार्यसिद्धिरपि भविष्यति ॥७०६॥

For Private and Personal Use Only

मंतेण तेण तुट्ठो, धवलो अप्पेइ कोडिमुल्लंपि । नियकरमुद्दारयणं, वेगेणं तस्स पाणस्स ॥७०७॥
तुट्ठो सोवि हु डुंबो, सकुडुंबो जाइ निवगवक्खस्स । हिट्ठिममहीइ चिट्ठइ गायंतो गीयमइमहुरं ॥७०८॥
ताणं कोमलकंठुब्भवेण गीएण हरियमणकरणो । राया भणेइ भो भो !, जं मग्गह देमि तं तुब्भं ॥७०९॥
पाणो भणेइ सामिअ !, सव्वत्थाहं लहेमि बहुदाणं । किंतु न लहेमि माणं ता तं मह देसु जइ तुट्ठो ॥७१०॥
राया भणेइ माणं, जस्साहं देमि तस्स तंबोलं । दावेमिमिणा जामाउएण पाणप्पिएणावि ॥७११॥

तेन मन्त्रेण-आलोचेन तुष्टः सन् धवलः कोटिमूल्यमपि निजकरस्य-स्वहस्तस्य मुद्रारत्नं वेगेन तस्मै 'पाणस्स' त्ति-डुम्बाय अर्पयति-ददाति ॥७०७॥ स डुम्बोऽपि तुष्टः सन् सकुटुम्बः-कुटुम्बसहितो याति-राजद्वारं गच्छति अतिमधुरं गीतं गायन् नृपगवाक्षस्य अधस्तनपृथिव्यां तिष्ठति ॥७०८॥ तेषां-डुम्बानां कोमलकण्ठोद्भवेन-कोमलकण्ठादुत्पन्नेन गीतेन हृते मनःकरणे-चित्तश्रोत्रेन्द्रिये यस्य स एवंविधः सन् राजा वसुपालो भणति, भो भो गायना ! यत् यूयं मार्गयध्वं - याचध्वं तत् युष्मभ्यं ददामि ॥७०९॥ तदा डुम्बो भणति, हे स्वामिन् ! अहं सर्वत्र बहुदानं लभे-प्राप्नोमि किंतु मानं -सत्कारं क्वापि न लभे-न प्राप्नोमि तत्-तस्मात्कारणात् हे महाराज ! यदि त्वं तुष्टोऽसि तर्हि मह्यं तं मानं दत्स्व-देहीत्यर्थः ॥७१०॥ राजा भणति, यस्मै अहं मानं ददामि तस्मै प्राणेभ्यः प्रियः प्राणप्रियस्तेन प्राणप्रियेणापि अनेन जामात्रा ताम्बूलं दापयामि ॥७११॥

डुंबो सकुडुंबोऽवि हु, पभणइ सामिअ ! महापसाओत्ति । तो रायाएसेणं, कुमरो जा देइ तंबोलं ॥७१२॥
ताव सहसत्ति एगा, बुड्डी डुंबी कुमारकंठंमि । लग्गेइ धाविऊणं, पुत्तय ! पुत्तय ! कओ तंसि ? ॥७१३॥
कंठविलग्गा पभणइ, हा वच्छय ! कित्तियाउ कालाओ । मिलिओऽसि तुमं अम्हं, कत्थ य भमिओऽसि देसंमि ॥
सुणिओऽसि हंसदीवे पत्तो कुसलेण पवहणारूढो । तत्तो इह संपत्तो, कहं कहं पुत्तय ! कहेसु ॥७१५॥
एगा भणेइ भत्तिज्जओऽसि अन्ना भणेइ भायाऽसि । अवरा कहेइ मह देवरोऽसि पुन्नेण मिलिओऽसि ॥७१६॥

तदा सकुटुम्बोपि डुम्बः प्रभणति, हे स्वामिन् ! महाप्रसाद इति-एवं प्रकर्षेण वक्तीत्यर्थः, ततो राज्ञ आदेशेन-आज्ञया कुमारः श्रीपालो यावत्ताम्बूलं ददाति ॥७१२॥ तावत्सहसेति-तत्क्षणमेका वृद्धा डुम्बी धावित्वा कुमारस्य कण्ठे लगति, हे पुत्रक ! हे पुत्रक ! त्वमत्र कुतोऽसि-कुतः समागतोऽसि इति जल्पन्तीति शेषः ॥७१३॥ च- पुनः कण्ठे विलग्ना प्रभणति, हा इति खेदे, हे वत्स ! कियतः कालात् त्वमस्माकं मिलितोऽसि, च- पुनः कुत्र देशे भ्रान्तोऽसि ? ॥ ७१४॥ हे पुत्र ! त्वं प्रवहणारूढः कुशलेन हंसद्वीपे प्राप्तोऽस्माभिः श्रुतोऽसि, ततः कथं कथं-केन केन प्रकारेण इह सम्प्राप्तः अस्मदग्रे कथय ॥७१५॥ एका डुम्बी भणति, मम भ्रातृव्योऽसि-भ्रातुः पुत्रोऽसि, अन्या डुम्बी भणति, मम भ्राताऽसि, अपरा कथयति, मम देवरोऽसि, पुण्येन मिलितोऽसि ॥७१६॥

डुंबो भणेइ सामिअ !, महलहुभाया इमो गओ आसि । संपइ तुम्ह समीवे, ठिओऽवि नो लक्खिओ सम्मं ॥७१७॥
एएण कारणेणं, माणमिसेणं अणाविओ पासे । उवलक्खिओ अ सम्मं, बहुलक्खणलक्खिओ एसो ॥ ७१८॥
राया चिंतेइ मणे, हीही विट्टालिअं कुलं मज्झ ॥ एएणं पावेणं, तो एसो झत्ति हंतव्वो ॥७१९॥
नेमित्तिओ अ बंधाविऊण आणाविओ नरवरेणं । भणिओ रे दुट्ठ! इमो, मायंगो कीस नो कहिओ ? ॥७२०॥
नेमित्तिओवि पभणइ, नरवर ! एसो न होइ मातंगो । किंतु महामायंगाहिवई होही न संदेहो ॥७२१॥

अथ डुम्बो नृपसम्मुखं विलोक्य भणति, हे स्वामिन् ! अयं मम लघुभ्राता क्वापि गत आसीत्, सम्प्रति-अधुना युष्माकं समीपे स्थितोऽपि न सम्यक् उपलक्षितः ॥७१७॥ एतेन कारणेन मानमिषेण-मानव्याजेन पार्श्वे आनायितः सम्यग् उपलक्षितश्च , हे स्वामिन् ! एष मद्भ्राता बहुभिर्लक्षणैर्लक्षितो- युक्तोऽस्ति ॥७१८॥ एतत् डुम्बवचनं श्रुत्वा राजा मनसि चिन्तयति, हीही इति खेदे, एतेन पापेन- दुष्टेन मम कुलं विटालितं-सदोषं कृतं, ततः तस्मात्कारणात् एष पापो झटिति शीघ्रं हन्तव्यो-मार्यः ॥ ७१९॥ च - पुनः नैमित्तिको नरवरेण-राज्ञा बन्धयित्वा आनायितः ,आनाय्य च भणितः- रे दुष्ट! अयं मातङ्गो-डुम्बः कस्मान्न कथितः-कथं नोक्त इत्यर्थः ॥७२०॥ नैमित्तिकोऽपि प्रभणति, हे नरवर ! -हे राजन् ! एष मातङ्गो न भवति, किन्तु महामातङ्गानां-महागजानां अधिपतिर्भविष्यति, अस्मिन्नर्थे सन्देहो नास्ति ॥७२१॥

गाढयरं रुट्ठेणं, रन्ना नेमित्तिओ कुमारो अ । हणणत्थं आइट्ठा, निययाणं जाव सुहडाणं ॥७२२॥
ता मयणमंजरीवि हु, सुणिऊण समागया तहिं झत्ति । पभणेइ ताय ! किमिअं, अवियारियकज्जकरणंति ? ॥
आयारेणवि नज्जइ, कुलंति लोएवि गिज्जए ताय!! लोओत्तरआयारो किं एसो होइ मायंगो ? ॥७२४॥
तो पुच्छइ नरनाहो, कुमरं भो ! निअकुलं पयासेसु । ईसि हसिऊण कुमरो, भणइ अहो तुज्झ छेअत्तं ॥७२५॥
अहवा नरवर ! तुमए, एयं अक्खाणयं कयं सच्चं । पाऊण पाणियं किर पच्छा, पुच्छिज्जए गेहं ॥७२६॥

ततो गाढतरम्-अत्यर्थं रुष्टेन राज्ञा नैमित्तिकः कुमारश्च निजकेभ्यः - स्वकीयेभ्यः सुभटेभ्यो यावत् हननार्थं-मारणार्थमादिष्टौ-आज्ञप्तौ ॥७२२॥ तावन्मदनमञ्जरी नृपपुत्री अपि एतां वार्तां श्रुत्वा झटिति-शीघ्रं तत्र प्रदेशे समागता, आगत्य च प्रकर्षेण भणति, हे तात!- हे पितः ! किमिदं अविचारितस्य कार्यस्य करणमिति ॥७२३॥ पुनः किं भणतीत्याह-हे तात ! आचारेणापि कुलं ज्ञायते इति लोकेऽपि गीयते - कथ्यते 'आचारः कुलमाख्याती'तिवचनात्, लोकेभ्य उत्तर-उपरिवर्त्ती प्रवरो वा आचारो यस्य स एवंविध एष कुमारः किं मातङ्गः-चण्डालो भवति ? ॥७२४॥ ततो नरनाथो-राजा कुमारं पृच्छति, भो कुमार ! निजकुलं प्रकटीकुरु, तदा कुमार ईषत् हसित्वा भणति, अहो तव छेकत्वम्-अतिनिपुणत्वं यतः पूर्वं स्वपुत्रीं दत्त्वा पश्चात्कुलं पृच्छसीति भावः ॥ ७२५॥ अथवा हे नरवर-हे राजन् ! त्वया एतत् आख्यानकं-लौकिककथनं सत्यं कृतं, एतत्किमित्याह-पानीयं पीत्वा किल पश्चाद् गृहं पृच्छ्यते-कस्येदं गृहमिति ॥७२६॥

सिन्नं करेह सज्जं, जं मम हत्था कुलं पयासंति । जीहाए जं कुलवन्नणंति लज्जाकरं एयं ॥७२७॥
अहवा पवहणमज्झट्ठिआउ जा संति दुन्नि नारीओ । आणाविऊण ताओ ,पुच्छेह कुलंपि जइ कज्जं ॥७२८॥
तो विम्हिओ अ राया, आणाविअ धवलसत्थवाहंपि । पुच्छइ कहेसु किं संति पवहणे दुन्नि नारीओ ? ॥७२९॥
धवलोवि हु कालमुहो, जा जाओ ताव नरवरिंदेणं । नारीण आणणत्थं, पहाणपुरिसा समाइट्ठा ॥७३०॥
तेहिं गंतूण तओ तहिं, भणियाओ नरवरिंदधूयाओ । पइणो कुलकहणत्थं, वच्छा ! आगच्छह दुअंति ॥७३१॥

यदि मम कुलश्रवणेच्छा भवेत्तर्हि एतत्कर्त्तव्यं, किमित्याह-स्वकीयं सैन्यं-कटकं सज्जं कुरु यन्मम हस्तौ कुलं प्रकाशयतः, यत्स्वजिह्वया कुलवर्णनं तदेतत् लज्जाकरमिति ॥७२७॥ अथवा प्रवहणस्य-पोतस्य मध्ये स्थिते ये द्वे नार्यौ-स्त्रियौ स्तः ते स्त्रियौ इह आनाय्य यदि युष्माकं कार्यं तर्हि कुलमपि पृच्छत ॥७२८॥ ततश्च राजा विस्मितः सन् धवलसार्थवाहमपि आनाय्य पृच्छति, हे श्रेष्ठिन् ! कथय किं प्रवहणे द्वे नार्य्यौ स्तः ? ॥७२९॥ एतन्नृपवचः श्रुत्वा धवलोऽपि यावत् कालं- श्यामं मुखं यस्य स कालमुखो जातस्तावन्नरवरेन्द्रेण - राज्ञा नार्योरानयनार्थं प्रधानपुरुषाः समादिष्टा-आज्ञप्ताः ॥७३०॥ तैः- प्रधानपुरुषैस्तत्र गत्वा ते - नरवरेन्द्रपुत्र्यौ इति-वक्ष्यमाणप्रकारेण उक्ते, इतीति किं ? तदाह- हे वत्से ! युवां स्वपत्युः कुलकथनार्थं द्रुतं-शीघ्रम् आगच्छतम् ॥७३१॥

तं सोऊणं ताओ मयणाओ हरिसियाओ चित्तंमि । तेणं मणवल्लहेणं, नूणं आणाविया अम्हे ॥७३२॥
सिबिआए चडिआओ, संपत्ता नरवरिंदभवणंमि । दट्ठूण पाणनाहं, जाया हरिसेण पडिहत्था ॥७३३॥
रन्नावि पुच्छियाओ, वच्छा ! भंजेह अम्ह संदेहं । को एसो वुत्तंतो ?, कहेह आमूलचूलंति ॥७३४॥
तो विज्जाहरधूया, कहेइ सव्वंपि कुमरचरिअं जा । ताव निवो साणंदो, भणइ इमो भइणिपुत्तो मे ॥७३५॥
गाढयरं संतुट्ठो, राया कुमरस्स देइ बहुमाणं । डुंबं सकुडुंबंपि हु, ताडावइ गरुअरोसेण ॥७३६॥

तद्वचनं श्रुत्वा ते मदने चित्ते हर्षिते, कथं हर्षिते इत्याह- नूनं-निश्चितं तेन मनोवल्लभेन- भर्त्रा आवाम् आनायिते -आकारिते स्वः, इत्थं हर्षिते इत्यर्थः ॥७३२॥ ततः शिबिकायां-सुखासने चटिते-आरूढे द्वे अपि स्त्रियौ नरवरेन्द्रस्य -राजेन्द्रस्य वसुपालस्य भवने-मन्दिरे प्राप्ते, तत्र च प्राणनाथं-भर्तारं दृष्ट्वा हर्षेण-आनन्देन प्रतिहस्ते-परिपूर्णे व्याप्ते इति यावत् जाते ॥७३३॥ राज्ञापि इति-अमुना प्रकारेण पृष्टे- हे वत्से- हे पुत्र्यौ ! युवाम् अस्माकं सन्देहं -संशयं भङ्क्तं-दूरीकुरुतं, एष को वृत्तान्तः-एषा का वार्ताऽस्ति? आमूलचूलं कथयतं-मूलादारभ्य चूलां यावद्वदतमित्यर्थः ॥७३४॥ ततः-तदनन्तरं विद्याधर-राजस्य पुत्री यावत्सर्वमपि कुमारस्य चरितं कथयति तावन्नृपो-वसुपालो राजा सानन्दो-हर्षसहितः सन् भणति, अयं कुमारो मम भगिनीपुत्रो, भागिनेयोऽस्तीत्यर्थः ॥७३५॥ ततो गाढतरम्-अत्यन्तं सन्तुष्टो राजा कुमाराय बहुमानं ददाति, हु निपातोऽत्र पुनरर्थे, पुनर्गुरुकरोषेण-तीव्रक्रोधेन सकुटुम्बं-कुटुम्बसहितमपि डुम्बं ताडयति-भृत्यैः कुट्टयति ॥७३६॥

डुंबो कहेइ सच्चं, सामिअ ! कारावियं इमं सव्वं । एएण सत्थवाहेण देव ! दाऊण मज्झ धणं ॥७३७॥
तो राया धवलंपि हु, बंधावेऊण निविडबंधेहिं । अप्पेइ मारणत्थं, चंडाणं दंडपासीणं ॥७३८॥
कुमरो निरुवमकरुणारसवसओ नरवराउ कहकहवि । मोआवइ तं धवलं, डुंबं च कुडुंबसंजुत्तं ॥७३९॥
मायंगाहिवइत्तं, पुट्ठो नेमित्तिओ कहइ एवं । मायंगा नाम गया, तेसिं एसो अहिवइत्ति ॥७४०॥
संपूइऊण राया, सम्मं नेमित्तिअं विसज्जेइ । भयणीसुयंति धूयावरंति कुमरं च खामेइ ॥७४१॥

तदा डुम्बः सत्यं कथयति, हे स्वामिन् ! हे देव-हे महाराज ! एतेन सार्थवाहेन मह्यं धनं -द्रव्यं दत्त्वा एतत्सर्वमकृत्यं (कारापितम् अतः) कारणमयमेवास्तीति भावः ॥७३७॥ ततो राजा धवलसार्थवाहमपि निबिडबन्धैः-घनबन्धैर्बन्धयित्वा चण्डेभ्यः-अतिदुष्टेभ्यो दण्डपाशिकेभ्यः-कोट्टपालपुरुषेभ्यो मारणार्थमर्पयति-ददाति ॥७३८॥ कुमारः श्रीपालो निरुपम-उपमारहितो यः करुणारसस्तद्वशात् तं धवलं कथंकथमपि नरवरात्-नृपान्मोचयति, च- पुनः कुटुम्बेन संयुक्तं -सहितं डुम्बं मोचयति ॥७३९॥ ततो राज्ञा मातङ्गाधिपतित्वं पृष्टो नैमित्तिक एवं कथयति, हे राजन् ! मातङ्गा नाम गजा -हस्तिनस्तेषामेषः कुमारोऽधिपतिः- स्वामी इति ॥७४०॥ राजा -वसुपालो नैमित्तिकं सम्यक् वस्त्राभरणादिभिः सत्कार्य विसर्जयति, च- पुनः कुमारं भगिन्याः सुतमिति हेतोः पुत्र्या वरं-भर्त्तारमिति हेतोः क्षमयति ॥७४१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राया भणेइ पिच्छह, अहह अहो उत्तमाण नीयाणं । केरिसमंतरमेयं, अमिअविसाणं व संजायं ॥७४२॥
धवलो करेइ एरिसमणत्थमुवगारिणोऽवि कुमरस्स । कुमरो एयस्स अणत्थकारिणो कुणइ उवयारं ॥७४३॥
जह जह कुमरस्स जसं, धवलं लोअंमि वित्थरइ एवं । तह तह सो धवलोऽवि हु, खणे खणे होइ कालमुहो ॥७४४॥
तहवि कुमारेणं सो, आणीओ नियगिहं सबहुमाणं । भुंजाविओ अ विस्सामिओ अ नियचंदसालाए ॥७४५॥
तत्थ ठिओ सो चिंतइ, अहह अहो केरिसो विही वंको ? । जमहं करेमि कज्जं, तं तं मे निप्फलं होइ ॥७४६॥

राजा भणति, अहहेति खेदे, अहो इति आश्चर्ये, भो लोका ! यूयं प्रेक्षध्वं - विलोकयत उत्तमानाम्-उत्तमपुरुषाणां नीचानां-नीचपुरुषाणामेतत् कीदृशमन्तरं सञ्जातं ?, कयोरिव-अमृतविषयोरिव, यथा सुधाविषयोरन्तरं तथेत्यर्थः ॥७४२॥ धवलः श्रेष्ठी उपकारिणोऽपि कुमारस्य ईदृशमनर्थं करोति, कुमारः अनर्थकारिणोऽपि एतस्य धवलस्य उपकारं करोति ॥७४३॥ यथा यथा कुमारस्य धवलम्-उज्ज्वलं यशो लोके एवमुक्तप्रकारेण विस्तृणाति-विस्तारं प्राप्नोति तथा तथा हु इति निश्चितं स नाम्ना धवलोऽपि क्षणे क्षणे कालमुखः-श्याममुखो भवति ॥७४४॥ तथापि कुमारेण स धवलः सहबहुमानं-बहुमानसहितं यथा स्यात्तथा निजगृहमानीतो विविधभोज्यैः भोजितश्च, ततश्चन्द्रशालायां-स्वगृहोपरिभूमौ विश्रामितश्च-विश्रामं कारितः ॥७४५॥ तत्र-चन्द्रशालायां स्थितः स धवलश्चिन्तयति, किमित्याह- अहह इति खेदे, अहो इति आश्चर्ये, विधिः-दैवः कीदृशो वक्रो वर्त्ततेऽहं यत् यत् कार्यं करोमि तत्तन्मम निष्फलं भवति ॥७४६॥

For Private and Personal Use Only

एवं ठिएवि अज्जवि, मारिज्जइ जइ इमो मए कहवि । ता एयाओ सिरीओ, सव्वाओ हुंति मह चेव ॥७४७॥
अन्नं च इत्थ सत्तम-भूमीए सुत्तओ इमो इक्को। ता हणिऊणं एयं, रमणीवि बलावि माणेमि ॥७४८॥
इअ चिंतिऊण हिट्ठो, धिट्ठो दुट्ठो निकिट्ठपाविट्ठो । असिधेणुं गहिऊणं, पहाविओ कुमरवहणत्थं ॥७४९॥
उम्मग्गमुक्कपाओ, पडिओ सो सत्तमाउ भूमीओ । छुरिआइ उरे विद्धो, मुक्को पाणेहिं पावुत्ति ॥७५०॥
सो सत्तमभूमीओ, पडिओ पत्तो अ सत्तमिं भूमिं । नरयस्स तारिसाणं, समत्थि ठाणं किमन्नत्थ ? ॥७५१॥

एवं स्थितेऽपि यदि अयं कुमारो मयाऽद्यापि कथमपि-केनापि प्रकारेण मार्य्यते-प्राणवियुक्तः क्रियते तत्-तर्हि एताः सर्वाः श्रियो-लक्ष्म्यो ममैव भवन्ति ॥७४७॥ अन्यच्च अत्र-सप्तमभूमौ अयं कुमार एक-एकाकी सुप्तोऽस्ति, तत्-तस्मात्कारणात् एतं कुमारं हत्वा एतस्य तिस्रो रमणीरपि-स्त्रियोऽपि बलादपि मानयामि-भुनज्मि ॥७४८॥ इति चिन्तयित्वा स धवलो हृष्टः सन् असिधेनुं-क्षुरिकां गृहीत्वा कुमारस्य वधार्थं प्रधावितो-हननार्थं चलितः, कीदृशः सः? -धृष्टः पुनर्दुष्टोऽत एव निकृष्टः-अधमः पुनरतिशयेन पाप इति पापिष्ठः ॥ ७४९॥ भयत्वरादिवशात् उन्मार्गे मुक्तौ पादौ येन स उन्मार्गमुक्तपादः सन् सप्तम्या भूमितः पतितः स्वकरस्थया क्षुरिकया उरसि-हृदये विद्धः पापोऽयमितिकृत्वा प्राणैर्मुक्तः-त्यक्तः ॥ ७५० ॥ स धवलः सप्तमभूमितः पतितो नरकस्य सप्तमीं भूमिं-सप्तमनरकपृथ्वीमित्यर्थः प्राप्तश्च, युक्तोऽयमर्थः, यतस्तादृशानां दुष्टानां सप्तमनरकादन्यत्र किं स्थानं समस्ति ?, नास्त्येवेत्यर्थः ॥७५१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं दट्ठूण पभाए, लोओ चिंतइ इमाइ चिट्ठाए । कुमरहणणत्थमेसो, नज्जइ आहाविओ नूणं ॥७५२॥
अहह अहो अहमत्तं, एयस्स कुबेरसिट्ठिणो नूणं । जो उवयारिक्कपरे, कुमरेऽवि करेइ वहबुद्धिं ॥७५३॥
एएणं पावेणं, जो दोहो चिंतिओ कुमारस्स । सो एअस्सवि पडिओ, अहो महप्पाण माहप्पं ॥७५४॥
कुमरोऽवि हु तच्चरिअं, चिंतंतो सोइऊण खणमिक्कं । काऊण पेअकिच्चं, दावेइ जलंजलिं तस्स ॥७५५॥
वरबुद्धिदाइणो जे, मित्ता धवलस्स आसि तिन्नेव । ते सव्वाइ सिरीए, कुमरेणऽहिगारिणो ठविआ ॥७५६॥

प्रभाते लोकः स्वहस्तक्षुरिकया मृतं तं धवलं दृष्ट्वा चिन्तयति, किमित्याह- नूनं-निश्चयेन अनया चेष्टया एष धवलः कुमारस्य हननार्थमाधावितो ज्ञायते ॥७५२॥ पुनः किं चिन्तयतीत्याह- अहहेति खेदे, अहो इति आश्चर्ये, एतस्य कुबेरश्रेष्ठिनोऽधमत्वम्, आश्चर्यकार्यकारीत्यर्थः, नूनं-निश्चितमुपकारैकपरे-उपकारकरणतत्परेऽपि कुमारे यो दुष्टो वधबुद्धिं-मारणबुद्धिं करोति ॥७५३॥ एतेन पापेन-क्रूरेण धवलेन यः कुमारस्य द्रोहश्चिन्तितः स एतस्यैव पतितः, अत्र अपिशब्द एवकारार्थोऽव्ययानामनेकार्थत्वात्, अहो महात्मनां-महापुरुषाणां माहात्म्यम्, आश्चर्यकारीत्यर्थः ॥७५४॥ कुमारोऽपि च तस्य धवलस्य चरितम्-आचारं चिन्तयन् एकं क्षणं यावत् शोचित्वा तस्य प्रेतक्रियां-मृतककर्तव्यं वह्निदानादिकं कृत्वा तस्मै जलस्याञ्जलिं दापयति ॥७५५ ॥ वरबुद्धिदायीनि-प्रधानबुद्धिदायकानि यानि धवलस्य त्रीणि मित्राणि आसन् तान्येव कुमारेण सर्वस्या धवलसम्बन्धिन्याः श्रियो-लक्ष्म्या अधिकारीणि स्थापितानि ॥७५६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मयणातिगेण सहिओ, कुमरो तत्थ ट्ठिओ समाहिए । केवलसुहाइं भुंजइ, मुणिव्व गुत्तित्तयसमेओ ॥७५७॥
अन्नदिणे सो कुमरो, रयवाडीए गंओ सपरिवारो । पिच्छइ एगं सत्थं, उत्तरियं नयरउज्जाणे ॥७५८॥
जो तत्थ सत्थवाहो, सोवि हु कुमरं समागयं दट्ठुं । घित्तूण भिट्टणाइं, पणमइ पाए कुमारस्स ॥७५९॥
कुमरेण पुच्छिओ सो, सत्थाहिव ! आगओ तुमं कत्तो ? । पुरओवि कत्थ गच्छसि, किं कत्थवि दिट्ठमच्छरियं ? ॥७६०॥
तो भणइ सत्थवाहो, कंतीनयरीओ आगओ अहयं । गच्छामि कंबुदीवं निसुणसु अच्छेरयं एयं ॥ ७६१ ॥

मदनात्रिकेण- तिसृभिर्मदनास्त्रीभिः सहितः कुमारस्तत्र पुरे समाधिना-चित्तैकाग्र्येण स्थितः सन् केवलसुखानि-समस्तसुखानि भुनक्ति, क इव ?- गुप्तित्रयेण मनोवाक्कायगुप्तिरूपेण समेतो-युक्तो मुनिरिव, यथा स मुनिः सर्वसुखानि भुनक्ति तथाऽयमपि इत्यर्थः, 'केवलश्चैककृत्स्नयो' रिति हैमः ॥७५७॥ अन्यस्मिन् दिने सपरिवारः- परिवारसहितः कुमारो राजवाटिकायां गतः सन् नगरस्योद्याने उत्तीर्णमेकं सार्थं प्रेक्षते-पश्यति ॥७५८॥ यस्तत्र सार्थवाहः सोऽपि कुमारं समागतं दृष्ट्वा प्राभृतानि गृहीत्वा कुमारस्य पादौ प्रणमति ॥७५९॥ कुमारेण स पृष्टः- हे सार्थाधिप ! -हे सार्थपते ! त्वं कुतः स्थानात् आगतोऽसि ? पुरतः-अग्रतोऽपि कुत्र गच्छसि ? किं कुत्रापि आश्चर्यं दृष्टं ? दृष्टं चेत्कथयेति भावः ॥७६०॥ ततः सार्थवाहो भणति-अहं कान्तीनगरीतः आगतोऽस्मि, कम्बुद्वीपं गच्छामि, एतद्-अनन्तरं वक्ष्यमाणमाश्चर्यं श्रुणु ॥७६१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्तो य जोयणसए, कुंडलनयरं समत्थि विक्खायं । तत्थऽत्थि गुरुपयावो, राया सिरिमगरकेउत्ति ॥७६२॥
तस्स कप्पूरतिलया, देवी कप्पूरविमलसीलगुणा । तत्कुच्छिभवा सुंदर -पुरंदरक्खा दुवे पुत्ता ॥७६३॥
ताण उवरिं च एगा, पुत्ती गुणसुंदरित्ति नामेणं । जा रूवेणं रंभा, बंभी अ कलाकलावेणं ॥७६४॥
तीए कया पइन्ना, जो मं वीणाकलाइ निज्जिणइ । सो चेव मज्झ भत्ता, अन्नेहिं न किंपि मह कज्जं ॥७६५॥
तं सोऊणं पत्ता, तत्थ नरिंदाण नंदणाऽणेगे । वीणाए अब्भासं, कुणमाणा संति पइदिवसं ॥७६६॥

इतश्च-अस्मान्नगरात् योजनशते विख्यातं-प्रसिद्धं कुण्डलपुरनामकं नगरं समस्ति, तत्र गुरुः-महान् प्रतापो यस्य स गुरुप्रतापः श्रीमकरकेतुरिति नाम्ना राजाऽस्ति ॥७६२॥ तस्य राज्ञः कर्पूरतिलकानाम देवी-राज्ञी अस्ति, कीदृशी ? कर्पूरवद्विमलो निर्मलः शीलगुणो यस्या सा कर्पूर०, तस्याः कुक्षौ भव-उत्पत्तिर्ययोस्तौ तत्कुक्षिभवौ सुन्दरपुरन्दराख्यौ-सुन्दरपुरन्दरनामानौ द्वौ पुत्रौ स्तः ॥७६३ ॥ तयोः पुत्रयोरुपरि च एका गुणसुन्दरीति नाम्ना पुत्री अस्ति, या पुत्री रूपेण-लावण्येन सौन्दर्येणेत्यर्थः रम्भा-रम्भादेवाङ्गनातुल्या वर्त्तते, च - पुनः कलाकलापेन- कलानां समूहेन ब्राह्मी-सरस्वती तुल्याऽस्ति ॥७६४॥ तया प्रतिज्ञा कृताऽस्ति, कीदृशीत्याह- यः पुमान् वीणाकलया-वीणावादनचातुर्येण मां निर्जयति-निःशेषेण जयति स एव मम भर्त्ता, अन्यैः पुरुषैर्मम किमपि कार्य-प्रयोजनं नास्ति ॥७६५॥ तत् श्रुत्वा तन्नगरे अनेके- बहवो नरेन्द्राणां-राज्ञां नन्दनाः-पुत्राः प्राप्ताः, प्रतिदिवसं-प्रत्यहं वीणाया अभ्यासं कुर्वाणाः सन्ति ॥७६६॥

For Private and Personal Use Only

मासे मासे तेसिं, होइ परिक्खा परं न केणावि । सा वीणाए जिप्पइ, पच्चक्खसरस्सईतुल्ला ॥७६७॥
एगपरिक्खादिवसे, दिट्ठा सा तत्थ देव ! अम्हेहिं । रमणीण सिरोरयणं, सा पुरिसाणं तुमं देव ! ॥७६८॥
अघडंतोवि हु जइ कहवि होइ दुण्हंपि तुम्ह संयोगो । ता देव ! पयावइणो, एस पयासो हवइ सहलो ॥७६९॥
तं सोऊणं कुमरो, सत्थाहिवइं पसत्थवत्थेहिं । पहिराविऊण संझासमये पत्तो नियावासं ॥७७०॥
चिंतेइ तओ कुमरो, कह पिक्खिस्सं कुऊहलं एयं ? । अहवा नवपयझाणं, इत्थ पमाणं किमन्नेणं? ॥७७१॥

मासे मासे तेषां राजकुमाराणां परीक्षा भवति परं केनापि राजपुत्रेण सा कन्या वीणायां न जीयते, कीदृशी सा ? प्रत्यक्षेण-साक्षात्सरस्वत्या तुल्या-सदृशी ॥७६७॥ एकस्मिन् परीक्षादिवसे तत्र सा राजपुत्री हे देव-हे राजन् ! अस्माभिर्दृष्टा, परमस्माभिरेवं ज्ञायते- हे देव ! रमणीनां-स्त्रीणां सर्वासामपि शिरोरत्नं-शिरोमणिः सा कन्याऽस्ति, पुरुषाणां सर्वेषामपि शिरोरत्नं त्वमसि ॥७६८॥ यद्यपि अघटमानोऽपि- असम्भवन्नपि भवतोर्द्वयोरपि संयोगः-सम्बन्धः कथमपि भवति तत्-तर्हि हे देव ! प्रजापतेः -विधातुः एष भवद्द्वयनिर्माणरूपः प्रयासः सफलो भवति ॥७६९॥ तत्पूर्वोक्तं श्रुत्वा कुमारः सार्थाधिपतिं प्रशस्तवस्त्रैः परिधाप्य सन्ध्यासमये निजावासं-निजमन्दिरं प्राप्तः ॥७७०॥ ततः कुमारश्चिन्तयति- एतत्कुतूहलं-कौतुकं कथं प्रेक्षिष्ये-विलोकयिष्यामि ? अथवा अत्र-अस्मिन् कार्ये नवपदानाम्-अर्हदादीनां ध्यानं प्रमाणमस्ति, अन्येन विमर्शेन किं ?, न किञ्चिदित्यर्थः ॥७७१॥

इअ चिंतिऊण सम्मं, नवपयझाणं मणंमि ठावित्ता । तह झाइउं पवत्तो, कुमरो जह तक्खणा चेव ॥७७२
सोहम्मकप्पवासी, देवो विमलेसरो समणुपत्तो । करकलिउत्तमहारो, कुमरं पइ जंपए एवं ॥७७३॥
इच्छाकृतिर्व्योमगतिः कलासु, प्रौढिर्जयः सर्वविषापहारः ।
कण्ठस्थिते यत्र भवत्यवश्यं, कुमार ! हारं तममुं गृहाण ॥७७४॥

इति चिन्तयित्वा सम्यक् नवपदध्यानं मनसि स्थापयित्वा कुमारः श्रीपालस्तथा-तेन प्रकारेण ध्यातुं प्रवृत्तो यथा तत्क्षणादेव-तत्कालमेव ॥७७२॥ सौधर्मकल्पवासी-सौधर्माख्यदेवलोकनिवासी विमलेश्वरो नाम देवः समनुप्राप्तः, तत्र सम्प्राप्तः सन् कुमारं प्रति एवं-वक्ष्यमाणप्रकारेण जल्पति-वक्ति, कीदृशो देवः ? - करे-हस्ते कलितः- प्राप्तः उत्तमः-प्रधानो हारो यस्य स एवंविधः ॥७७३॥ एवं कथमित्याह- हे कुमार ! त्वममुं हारं गृहाण, तं कमित्याह- यत्र यस्मिन् हारे कण्ठे स्थिते सति अवश्यं-निश्चयेन एतानि पञ्च कार्याणि भवन्ति, तथाहि- इच्छया आकृतिः इच्छाकृतिः, यादृशी इच्छा भवेत् तादृशो देहाकारो भवेत् १ तथा व्योम्नि-आकाशे गतिः-गमनं व्योमगतिः २ तथा कलासु सर्वास्वपि प्रौढिः-प्रागलभ्यं निपुणत्वमिति यावत् ३ तथा जयः-शत्रूणां पराजयप्रापणम् ४ तथा सर्वेषां विषाणामपहारः - अपहरणं सर्वविषापहारः ५ ॥७७४॥

एवं वदन्नेव स सिद्धचक्रा-धिष्ठायकः श्रीविमलेशदेवः । कुमारकण्ठे विनिवेश्य हारं, जगाम धामाद्भुतमात्मधाम ॥
तं लद्धूण कुमारो, निच्चिंतो सुत्तओ अह पभाए । उट्ठंतोऽवि हु कुंडलपुरगमणं निअमणे कुणइ ॥७७६॥
हारपभावेणं कयवामणरूवो गओ पुरे तत्थ । पासइ वीणाहत्थे, रायकुमारे ससिंगारे ॥७७७॥
कुमरो वामणरूवो, रायकुमारेहिं सह गओ तत्थ । जत्थऽत्थि उवज्झाओ वीणासत्थाइं पाढंतो ॥७७८॥
जह जह उवज्झायं पइ, वामणओ कहइ मंऽपि पाढेह । तह तह रायकुमारा, हसंति सव्वे हडहडत्ति ॥७७९॥

स सिद्धचक्रस्याधिष्ठायकः श्रीविमलेशदेवो-विमलेश्वरनामा सुरः एवम्-उक्तप्रकारेण वदन्-ब्रुवन् एव कुमारस्य कण्ठे हारं विनिवेश्य-स्थापयित्वा आत्मनः-स्वस्य धाम-गृहं स्वर्गमित्यर्थः जगाम-गतवान्, कीदृशमात्मधाम ? धाम्ना-तेजसाऽद्भुतं धामाद्भुतम् ॥७७५॥ कुमारस्तं हारं लब्ध्वा-प्राप्य निश्चिन्तः-चिन्तारहितः सुप्तः, अथ प्रभाते उत्तिष्ठन्नेव निजमनसि-स्वचित्ते कुण्डलपुरगमनं करोति ॥७७६॥ हारप्रभावेण कृतं वामनरूपं येन स एवंविधः कुमारस्तत्र पुरे गतः सन् वीणा हस्तेषु येषां ते वीणाहस्तास्तान्, पुनः सह शृङ्गारेण वर्त्तन्ते इति सशृङ्गारास्तान् राजकुमारान् पश्यति ॥७७७॥ कुमारो वामनरूपः सन् अन्यै राजकुमारैः सह तत्र गतः यत्र वीणाशास्त्राणि पाठयन् उपाध्यायोऽस्ति ॥७७८॥ अथ वामनको यथा यथा उपाध्यायं प्रति कथयति, किमित्याह- मामपि पाठयतेति, तथा तथा सर्वे राजकुमारा हडहड इति हसन्ति ॥७७९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दट्ठुं अपाढयंतं, उवज्झायं झत्ति तस्स वामणओ। अप्पेइ हत्थखग्गं हेलाए अइमहग्घंपि ॥७८०॥
तो उवज्झाओ तं आयरेण पुरओ निवेसइत्ताणं। अप्पेइ सिक्खणत्थं, निअवीणं तस्स हत्थंमि ॥७८१॥
वामणओ तं वीणं, विवरीयत्तेण पाणिणा लिंतो। तंतिं वा तोडंतो, फोडंतो तुंबयं वावि ॥७८२॥
सव्वेसिं कुमाराणं, हासरसं चेव वड्डयंतोवि। केवलदाणबलेणं, अग्घइ उवज्झायपासंमि ॥७८३॥
सोऽवि परिक्खासमए, रक्खिज्जंतोवि तेहिं सव्वेहिं। कुंडलदाणवसेणं, कुमरिसहाए गओ झत्ति ॥७८४॥

तदा वामनक उपाध्यायमपाठयन्तं दृष्ट्वाऽतिमहार्घमपि-बहुमूल्यमपि हस्तखड्गं-स्वहस्तकरवालं हेलया-लीलामात्रेण झटिति-शीघ्रं तस्मै उपाध्याय अर्प्पयति-ददाति ॥७८०॥ ततः-तदनन्तरं उपाध्यायस्तं वामनकमादरेण पुरतः - अग्रतो निवेश्य-स्थापयित्वा शिक्षणार्थं तस्य-वामनस्य हस्ते निजवीणां-स्वकीयविपञ्चीं तस्मै-वामनाय अर्पयति ॥७८१॥ वामनकस्तां वीणां पाणिना-हस्तेन विपरीतत्वेन- विपरीततया गृह्णन् चः - पुनः तन्त्रीं त्रोटयन् तुम्बकं वापि स्फोटयन् ॥७८२॥ सर्वेषां कुमाराणां हास्यरसमेव वर्द्धयन्नपि केवलं दानस्य बलेन उपाध्यायस्य पार्श्वे अर्घ्यः- पूजार्हः स इवाचरति अर्घयति- आदरयोग्यो भवतीत्यर्थः ॥७८३॥ स वामनकोऽपि परीक्षायाः समये-अवसरे तैः सर्वैर्लोकैरन्तः प्रविशन् रक्ष्यमाणोऽपि-वार्यमाणोऽपि कुण्डलदानवशेन झटिति-शीघ्रं कुमार्याः सभायां गतः ॥७८४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं कयइच्छारूवं, कुमरी पासेइ निरुवमसरूवं । अन्ने वामणरूवं, पासंति निवाइणो सव्वे ॥७८५॥
चिंतइ मणे कुमारी, मज्ज पइन्ना इमेण जइ पुन्ना । ताऽहं पुन्नपइन्ना, अप्पं मन्नेमि कयपुन्नं ॥७८६॥
जइ पुण मज्झ पइन्ना, इमिणावि ण पूरिया अहन्नाए । ताहं विहिअपइन्ना, सवेरिणी चेव संजाया ॥७८७॥
उवज्झायाएसेणं, तेहिं कुमारेहिं दंसियं जाव । वीणाए कुसलत्तं, ताव कुमारीवि दंसेइ ॥७८८॥
तीए कुमरिकलाए, संकुडियं सयलरायकुमराणं । वीणाए कुसलत्तं, चंदकलाइव्व कमलवणं ॥७८९॥

कृतं इच्छया रूपं येन स कृतेच्छारूपस्तं तादृशं तं कुमारं कुमारी-नृपकन्या निरुपमम्-उपमारहितं स्वरूपं यस्य स तं तथोक्तं पश्यति, अन्ये नृपादयः सर्वेऽपि लोका वामनरूपं पश्यन्ति ॥७८५॥ तदा कुमारी मनसि चिन्तयति,यदि अनेन राजकुमारेण मम प्रतिज्ञा पूर्णा पूरिता तत्-तदाऽहमात्मानं कृतपुण्यं मन्ये-जानामि कृतं पुण्यं येन स तं,कीदृशी अहं ? पूर्णा प्रतिज्ञा यस्याः सा पूर्णप्रतिज्ञा ॥७८६॥ यदि पुनरनेन पुरुषेणापि अधन्याया-अपुण्यवत्या मम प्रतिज्ञा न पूरिता तत्-तर्हि विहिता-कृता प्रतिज्ञा यया सा ईदृशी अहं स्ववैरिणी एव सञ्जाता ॥७८७॥ तत उपाध्यायस्यादेशेन-आज्ञया तैः कुमारैर्यावद्वीणायां-वीणावादने कुशलत्वं-निपुणत्वं दर्शितं तावत्कुमारी अपि दर्शयति, निजवीणावादनविज्ञानमिति शेषः ॥७८८॥ तया कुमार्याः कलया सकलराजकुमाराणां वीणावादने कुशलत्वं सङ्कुचितं-मुद्रितमित्यर्थः,कया किमिव ?-चन्द्रकलया कमलवनमिव, यथा तया तत्सङ्कुचति तथेत्यर्थः ॥७८९॥

तं च कुमारीइ कलं, सयलोवि जणो पसंसए जाव । ताव कुमारो वामणरूवधरो वज्जरइ एवं ॥७९०॥
अहो सुजाणो कुंडल-पुरलोओ केरिसो इमो सव्वो । तो संकिआ कुमारी, उवहसिउं मन्नए अप्पं ॥७९१॥
अप्पेइ नियं वीणं, तस्स कुमारस्स रायधूयावि । कुमरोवि सारिऊणं, तं च असुद्धं कहइ एवं ॥७९२॥
तंती सगब्भरूवा, गलगहियं तुंबयं च एयाए । दंडोऽवि अग्गिदड्ढो, तेण असुद्धा मए कहिया ॥७९३॥
ते दंसिऊण सम्मं, आसारेऊण वायए जाव । ताव पसुत्तुव्व जणो, सव्वोवि अचेयणो जाओ ॥७९४॥

यावच्च तां-कुमार्य्याः कलां सकलोऽपि लोकः प्रशंसति-श्लाघते तावद्वामनरूपधरः कुमारःश्रीपाल एवं-वक्ष्यमाणप्रकारेण 'वज्जरइ' इति ब्रूते ॥ ७९०॥ कथमित्याह- अहो इति अलीकप्रशंसायाम्, अयं सर्वोऽपि कुण्डलपुरलोकः कीदृशः सुज्ञानोऽस्ति?, अज्ञानवानिति भावः, तत- एतत्कुमारवचनश्रवणानन्तरं कुमारी शङ्किता सती आत्मानमुपहसितं मन्यते-कुमारेणाहं उपहसितेति जानातीत्यर्थः ॥७९१॥ तदा राजकन्यापि तस्मै कुमाराय निजां-स्वकीयां वीणामर्प्पयति, कुमारोऽपि च तां वीणां सारयित्वा एवं-वक्ष्यमाणप्रकारेण अशुद्धां कथयति ॥७९२॥ कथमित्याह- एतस्या वीणायास्तन्त्री सगर्भं रूपं यस्याः सा सगर्भरूपा, स्फुटितेत्यर्थः,: अस्तीति शेषः, च- पुनस्तुम्बकं गले गृहीतं-लग्नमस्ति, एतस्या दण्डोऽपि अग्निना दग्धोऽस्ति, तेन कारणेन मया इयं वीणाऽशुद्धा कथिता ॥७९३॥ तान् तन्त्र्यादिदोषान् दर्शयित्वा सम्यक् आसार्य-सारयित्वा यावत्कुमारो वीणां वादयति तावत्प्रकर्षेण सुप्त इव सर्वोऽपि जनो-लोकोऽचेतनो जातः ॥७९४॥

कस्सवि मुद्दारयणं, कस्सवि कडयं च कुंडलं मउलं । कस्सावि उत्तरीयं, गहिऊण कओ अ उक्करडो ॥७९५॥
अह जग्गियंमि लोए, अच्छरिअं पासिऊण सा कुमरी । धन्ना पुन्नपइन्ना, वरइ कुमारं तिजयसारं ॥७९६॥
रायाईओ अ जणो, जा चिंतइ वामणो हहा वरिओ । ताव कुमारो दंसइ, सहावरूवं नियं झत्ति ॥७९७॥
आणंदिओ अ राया, परिणावेऊण तेण निअधूयं । दावेइ हयगयाई, धणकंचणपूरियं भवणं ॥७९८॥
तत्थ ठिओ सिरिपालो, पुन्नविसालो महाभुयालो अ । गुणसुंदरीसमेओ, निच्चंपि करेइ लीलाओ ॥७९९॥

तदा कुमारेण कस्यापि मुद्रारत्नं कस्यापि कटकं-वलयं च -पुनः कस्यापि कुण्डलं कस्यापि मुकुटं कस्यापि उत्तरीयं-वस्त्रं गृहीत्वा 'उक्करडो' त्ति-उत्करः -पुञ्जः कृतः ॥७९५॥अथ-अनन्तरं लोके जागृते सति सा कुमारी एतदाश्चर्यं दृष्ट्वा त्रिजगति-त्रिभुवने सारं कुमारं श्रीपालं वृणीते, कीदृशी कुमारी ?-धन्या पुनः पूर्णा प्रतिज्ञा यस्याः सा पूर्णप्रतिज्ञा ॥७९६॥ राजादिकश्च जनो-लोको हहा इति खेदे वामनो वृत इति यावच्चिन्तयति तावत् श्रीपालकुमारो झटिति-शीघ्रं निजं-स्वकीयं स्वभावरूपं दर्शयति ॥७९७॥ तदा राजा आनन्दितो-हर्षितः सन् तेनेति तं कुमारं निजपुत्रीं परिणाय्य हयगजादिकं दापयति,पुनः धनकाञ्चनपूरितं भवनं-मन्दिरं दापयति ॥७९८॥ तत्र भवने स्थितश्च श्रीपालः कुमारो गुणसुन्दर्य्या स्वपत्न्या समेतः-संयुक्तो नित्यमपि लीलाः-क्रीडाः करोति, कीदृशः श्रीपालः ?-पुण्यं विशालं-विस्तीर्णं यस्य स पुण्यविशालः, प्राकृतत्वाद्विशेष्यस्य पूर्वनिपातः, पुनर्महाभुजालः- प्रचण्डभुजदण्ड इत्यर्थः ॥७९९॥

For Private and Personal Use Only

अन्नदिणे नयराओ, रयवाडीए गएण कुमरेण । दिट्ठो एगो पहिओ, विसेसवत्तं च सो पुट्ठो ॥८००॥
सो भणइ देव ! कुंडिणपुराउ पट्ठावणीइ पट्ठविओ । नयरंमि पइट्ठाणे, इब्भेण धणावहेणाहं ॥८०१॥
आगच्छंतेण मए, कंचणपुरनामयंमि नयरंमि । जं अच्छरिअं दिट्ठं, पुरिसुत्तम ! तं निसामेह ॥८०२॥
तत्थऽत्थि कंचणपुरे, राया सिरिवज्जसेणनामुत्ति । तस्सऽत्थि पट्टदेवी, कंचणमालत्ति विक्खाया ॥८०३॥
तीए कुक्खिसमुब्भवा, पुत्ता चत्तारि संति सोंडीरा । जसधवल -जसोहर-वयरसिंह-गंधव्वनामाणो ॥८०४॥

अन्यस्मिन् दिने नगरात् राजवाटिकायां गतेन कुमारेण एकः पथिकः- पान्थो दृष्टो-विलोकितः च- पुनः स पथिको विशेषवार्ता पृष्टः ॥८००॥ तदा स पथिको भणति, हे देव ! इभ्येन-महर्द्धिकेन धनावहेन-धनावहनाम्ना श्रेष्ठिनाऽहं कुण्डिनपुरात् प्रतिष्ठाने नगरे-प्रतिष्ठानपुरे स्थापनिकया- दिवसनियमनेन प्रस्थापितोऽस्मि-मुक्तोऽस्मि ॥८०१॥ आगच्छता मया काञ्चनपुरनामके नगरे हे पुरुषोत्तम ! यत् आश्चर्यं दृष्टं तत्त्वं निशामय-श्रुणु ॥८०२॥ तत्र काञ्चनपुरे नगरे श्रीवज्रसेन इति नाम्ना राजाऽस्ति, तस्य राज्ञः काञ्चनमाला इति नाम्ना विख्याता-प्रसिद्धा पट्टदेवी-पट्टराज्ञी अस्ति ॥८०३॥ तस्याः कुक्षौ समुद्भव-उत्पत्तिर्येषां ते ईदृशाः पुत्राश्चत्वारः सन्ति, कीदृशाः ? 'सोंडीर' त्ति शौण्डीर्यवन्तः पराक्रमवन्त इत्यर्थः, किंनामान इत्याह- यशोधवल- यशोधर- वज्रसिंह -गान्धर्वनामानः ॥८०४॥

ताण उवरिं च एगा, पुत्ती तियलुक्कसुंदरी अत्थि । तिअलोएवि न अन्ना, जीए पडिछंदए कन्ना ॥८०५॥
तीए अणुरूववरं, अलहंतेणं च तेण नरवइणा । पारद्धो अत्थि तहिं, सयंवरामंडवो देव ! ॥८०६॥
तत्थऽत्थि सुविच्छिन्नो, उत्तुंगो मूलमंडवो रम्मो । मणिकंचणथंभट्ठिअ- पुत्तलियाखोहिअजणोहो ॥८०७॥
तत्तो चउपासेसुं, रइआ कोऊहलेहिं परिकलिआ । मंचाइमंचसेणी सग्गविमाणावलिसरिच्छा ॥८०८॥
जे संति निमंतिअनरवराण पडिवत्तिगउरवनिमित्तं । तत्थ कणतिणसमूहा, ते गरुया गिरिवरेहिंतो ॥८०९॥

तेषां पुत्राणामुपरि च एका त्रैलोक्यसुन्दरी नाम पुत्री अस्ति, यस्याः कन्यायाः प्रतिच्छन्दके-प्रतिबिम्बे यत्सदृशीत्यर्थः अन्या कन्या त्रैलोक्येऽपि नास्ति॥८०५॥ तस्या कन्याया अनुरूपं-योग्यं वरमलभमानेन-अप्राप्नुवता च तेन नरपतिना -राज्ञा हे देव- हे राजन् ! तत्र नगरे स्वयंवरामण्डपः प्रारब्धोऽस्ति ॥८०६॥ तत्र—स्वयंवरामण्डपे सुतराम्- अतिशयेन विस्तीर्ण उत्तुङ्ग-उच्चैस्तरो रम्यो-रमणीयो मूलमण्डपोऽस्ति, पुनः कीदृशः ? मणिकाञ्चनस्तम्भेषु-रत्नस्वर्णमयस्तम्भेषु स्थिता याः पुत्रिका शालभञ्जिकास्ताभिः क्षोभितः-क्षोभं प्रापितो जनौघो- जनसमूहो यत्र स मणि ० ॥८०७॥ ततो मण्डपाच्चतुर्षु पार्श्वेषु रचिताः कुतूहलैः-कौतुकैः परिकलिता-समन्तात् युक्ता मञ्चातिमञ्चश्रेणी अस्ति, पुनः कीदृशी? स्वर्गे-देवलोके या विमानानामावलिः-श्रेणिस्तत्सदृशा,तत्सदृशीत्यर्थः ॥८०८॥ तत्र प्रदेशे निमन्त्रितनरवराणाम्- आकारितभूपतीनां प्रतिपत्तिगौरवनिमित्तं-भक्ताद्यर्थं ये कणानाम्-अन्नानां तृणानां -घासानां समूहाः-पुञ्जाः सन्ति ते गिरिवरेभ्यो-महापर्वतेभ्योऽपि गुरुका-महान्तः सन्ति ॥८०९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आसाढपढमपक्खे, बीयाए अत्थि तत्थ सुमुहुत्तो । कल्ले सा पुण बीआ, मग्गो पुण जोअणे तीसं ॥ ८१०॥
तं सोऊणं कुमरेण तस्स पहिअस्स दाविअं झत्ति । निअतुरयकंठकंदलभूसणसोवन्नसंकलयं ॥८११॥
कुमरो अ निआवासं, पत्तो चिंतेइ पच्छिमनिसाए । काऊण खुज्जरूवं, तंपि हु गंतूण पिच्छामि ॥८१२॥
हारस्स पभावेणं, संपत्तो तत्थ खुज्जरूवेणं । पिच्छेइ रायचक्कं, उववि‌ट्ठं उच्चमंचेसु ॥८१३॥
कुमरोवि खुज्जरूवो, सयंवरामंडवंमि पविसंतो । पडिहारेण निसिद्धो, देइ तओ तस्स करकडयं ॥८१४॥

आषाढमासस्य प्रथमपक्षे द्वितीयायां तिथौ तत्र-तस्मिन्नगरे विवाहस्य सुमुहूर्त्तोऽस्ति, सा द्वितीया पुनः कल्ये-प्रभातेऽस्ति मार्गः पुनस्त्रिंशद्योजनानि अस्ति ॥८१०॥ तत्पथिकवचनं श्रुत्वा कुमारेण तस्मै पथिकाय झटिति-शीघ्रं निजतुरगस्य-स्वकीयाश्वस्य यः कण्ठकन्दलस्तस्य भूषणं-शोभाकारकं यत्सौवर्णं-स्वर्णमयं सङ्कलकं तद् दापितम्, कण्ठो-गलः कन्दल इव-नवाङ्कुर इवेति कण्ठकन्दलः ॥८११॥ कुमारश्च निजावासं-स्वमन्दिरं प्राप्तः सन् पश्चिमरात्रौ चिन्तयति, किमित्याह-कुब्जरूपं कृत्वा तत्र गत्वा हु इति निश्चितं तमपि स्वयंवरामण्डपं प्रेक्षे-पश्यामीत्यर्थः ॥८१२॥ ततः कुमारो हारस्य प्रभावेण तत्र-पुरपार्श्ववर्त्तिस्वयंवरामण्डपे कुब्जरूपेण सम्प्राप्तः सन् उच्चमञ्चेषु उपविष्टम्-आसीनं राजचक्रं-राज्ञां समूहं प्रेक्षते-पश्यति ॥८१३॥ कुमारोऽपि कुब्जरूपः स्वयंवरामण्डपे प्रविशन् प्रतीहारेण-द्वारपालेन निषिद्धो-निवारितस्ततः-तदनन्तरं तस्मै-प्रतीहाराय करस्य कटकं-वलयं ददाति ॥८१४॥

For Private and Personal Use Only

पत्तो अ मूलमंडव-थंभट्ठिअपुत्तलीण पासंमि । चिट्ठइ सुहं निसन्नो, कुमरो कयकित्तिमकुरूवो ॥८१५॥
तं उच्चपिट्ठिदेसं, संकुडियउरं च चिविडनासउडं । रासहदंतं तह उट्टहुट्ठयं कविलकेससिरं ॥८१६॥
पिंगलनयणं च पलोइऊण लोया भणंति भो खुज्ज!! कज्जेण केण पत्तो, तुमंति ? तत्तो भणइ सोऽवि ॥८१७॥
जेण कज्जेण तुब्भे, सव्वे अच्छेह आगया इत्थ । तेणं चिअ कज्जेणं, अहयंपि समागओ एसो ॥८१८॥

च- पुनर्मूलमण्डपस्य स्तम्भेषु स्थिता याः पुत्रिकाः- शालभञ्जिकास्तासां पार्श्वे प्राप्तः सन् कुमारः सुखं निषण्णः-उपविष्ट इति, कीदृशः कुमारः ?-कृतं कृत्रिमं कुरूपं येन सः ॥८१५॥ अथ विशेषणैः कृत्रिमकुरूपस्य वर्णनमाह- तं कुब्जकं प्रलोक्येत्युत्तरत्र सम्बन्धः, कीदृशं तम् ?-उच्चः पृष्ठिदेशः-पृष्ठिभागो यस्य स तं,पुनः सङ्कुचितम् उरो-हृदयं यस्य स तं, च-पुनः चिपिटं-कुत्सितविस्तृतं नासापुटं यस्य स तं, पुना रासभस्य-गर्दभस्य दन्ता इव दन्ता यस्य स तं, तथा उष्ट्रस्येव ओष्ठौ यस्य स तं, पुनः कपिलाः-पिङ्गलाः केशा-वालाः शिरसि यस्य स तम् ॥८१६॥ च -पुनः पिङ्गले-पीते नयने-लोचने यस्य स तं, ईदृशं तं कुब्जं प्रलोक्य-निरीक्ष्य लोका भणन्ति,भो कुब्ज! त्वं केन कार्येण प्राप्तोऽसि-इहागतोऽसीति?,ततः स कुब्जकोऽपि भणति-वक्ति ॥८१७॥ किं भणतीत्याह- अहो येन कार्येण यूयं सर्वेऽपि अत्र आगतास्तिष्ठथ तेनैव कार्येण- प्रयोजनेन एषोऽहमपि समागतोऽस्मि ॥८१८॥

हडहड हसंति सव्वे, अहो इमो एरिसो सरूवोवि । जइ न वरिस्सइ नरवरधूया तो सा कहं होही ?॥८१९॥
इत्थंतरंमि नरवरधूया नरवरविमाणमारूढा । खीरोदगवरवत्था, मुत्ताहलनिम्मलाहरणा ॥८२०॥
करकलिअविमलमाला, समागया मूलमंडवे जाव । ता सहसच्चिअ कुम्मरं, सहावरूवं पलोएइ ॥८२१॥
तं दट्ठूण पमुइय-चित्ता चिंतेइ सा निवइधूया । रे मण! आणंदेणं, वट्टसु एयस्स लंभेणं ॥८२२॥

एतत् कुब्जवचनं श्रुत्वा सर्वे नृपकुमारादयो हडहड इति हसन्ति, पुनरेवं वदन्ति- अहो इममीदृशं सरूपं-रूपवन्तमपि यदि नरवरस्य-राज्ञः पुत्री न वरिष्यति तत्-तर्हि सा कन्या कथं-केन प्रकारेण भविष्यति ॥८१९॥ अत्रान्तरे-अस्मिन्नवसरे क्षीरोदकवरवस्त्रा-परिहितोज्ज्वलतरप्रधानवस्त्रा पुनर्मुक्ताफलानां निर्मलानि आभरणानि-हाराद्याभूषणानि यस्याः सा ईदृशा नरवरपुत्री वरं-प्रधानं यन्नरविमानं-शिबिकादिलक्षणं तत् आरूढा सती ॥ ८२०॥ पुनः करे-हस्ते कलिता-प्राप्ता विमला-निर्मला माला यस्याः सा एवम्भूता च सती यावन्मूलमण्डपे समागता तावत् सहसा एव-सद्य एव कुमारं स्वभावरूपं-स्वमूलरूपयुक्तं प्रलोकयति-पश्यति ॥८२१॥ अथ सा नृपते-राज्ञः पुत्री तं-स्वभावरूपं श्रीपालकुमारं दृष्ट्वा प्रमुदितं-हर्षितं चित्तं यस्याः सा एवम्भूता सती चिन्तयति-विमृशति, किं चिन्तयतीत्याह- रे मनस्त्वं एतस्य-वरस्य लाभेन आनन्देन वर्त्तस्व ॥८२२॥

For Private and Personal Use Only

धन्ना कयपुन्नाऽहं, महंतभागोदओऽवि मह अत्थि । मह मणजलनिहिचंदो, जं एस समागओ कोऽवि ॥८२३॥
कुमरोवि तीइ दिट्ठिं, दट्ठूणं साणुरागसकडक्खं । दंसेइ खुज्जयंपि हु, अप्पाणं अंतरंतरियं ॥८२४॥
इत्तोवि हु पडिहारी, जं जं वन्नेइ नरवरं तं तं । विक्खोडेइ कुमारी, रूववओदेसदोसेहिं ॥८२५॥
जो जइआ वन्निज्जइ, सो तइआ होइ सरयससिवयणो । जो जइआ हीलिज्जइ, सो तइआ होइ साममुहो ॥८२६

अहं धन्याऽस्मि, पुनः कृतं पुण्यं यया सा कृतपुण्याऽस्मि, मम भाग्योदयोऽपि महानस्ति, कुत इत्याह- यद्-यस्मात्कारणात् मम मन एव जलनिधिः-समुद्रस्तत्समुल्लासने चन्द्र इव चन्द्रतुल्यः एष कोऽपि पुरुषः समागतोऽस्ति ॥८२३॥ कुमारोऽपि तस्या दृष्टिं सानुरागाम् - अनुरागयुक्तां पुनः सकटाक्षां-कटाक्षयुक्तां दृष्ट्वा आत्मानमन्तरान्तरितं कुब्जकमपि दर्शयति,अन्तः अन्तः इतं- प्राप्तम् अन्तरन्तरितं मध्ये मध्ये इत्यर्थः ॥८२४॥ इतोऽपि च प्रतीहारी-वेत्रधरणी यं यं नरवरं-राजानं वर्णयति तं तं राजानं कुमारी रूपवयोदेशदोषैर्विखोडति-दूषयति, अस्य राज्ञो रूपमसम्यक्, अस्य वयो न सम्यक्, अस्य देशो न रम्य इत्यादिवाक्यैरित्यर्थः ॥८२५॥ यदा यो राजा वर्ण्यते तदा स राजा शरच्छशिवदनो भवति,शरच्छशी-शरदृतुचन्द्रः स इव वदनं-मुखं यस्य स तथोक्तः, यदा यो राजा कुमार्या हील्यते तदा स राजा श्याममुखो भवति, श्यामं मुखं यस्य सः ॥८२६॥

जा पडिहारी थक्का, सयलं निवमंडलंपि वन्नित्ता ॥ ताव कुमारी सपिअं, खुज्जं पासेइ सविलक्खा ॥ ८२७॥
इत्थंतरंमि थंभट्ठिआइ वरपुत्तलीइ वयणंमि । होऊण हारहिट्ठायगदेवो एरिसं भणइ ॥८२८॥
यदि धन्याऽसि विज्ञाऽसि, जानासि च गुणान्तरम् । तदैनं कुब्जकाकारं,वृणु वत्से ! नरोत्तमम् ॥८२९॥
तं सोऊण कुमारी, वरेइ तं झत्ति कुज्जरूवंपि । कुमरो पुण सविसेसं, दंसेइ कुरूवमप्पाणं ॥८३०॥
इत्थंतरंमि सव्वे, रायाणो अक्खिवंति तं खुज्जं ॥ रे रे मुंचसु एयं, वरमालं अप्पणो कालं ॥८३१॥

यावत् प्रतीहारी सकलं-समस्तमपि नृपमण्डलं-राजसमूहं वर्णयित्वा 'थक्कं' त्ति मौनमाधाय स्थिता तावत्कुमारी स्वप्रियं कुब्जं पश्यति, कीदृशी सती?- सह वैलक्ष्येण वर्त्तते इति सविलक्ष्या विलक्षवदना सतीत्यर्थः ॥८२७॥ अत्रान्तरे -अस्मिन्नवसरे स्तम्भस्थिताया-वरपुत्रिकाया वदने-मुखे भूत्वा प्रविश्येत्यर्थः हारस्याऽधिष्ठायकदेव ईदृशं भणति ॥८२८॥ किं भणतीत्याह- हे वत्से !- हे पुत्रि ? यदि त्वं धन्यासि,पुनर्विशेषेण जानासि-विज्ञाऽसि, च -पुनर्गुणानामन्तरं-भेदं जानासि, तदा एनं कुब्जकाकारं नरोत्तमं-पुरुषोत्तमं वृणु-अङ्गीकुरु ॥८२९॥ तत् श्रुत्वा कुमारी झटिति-शीघ्रं कुब्जरूपमपि तं कुमारं वृणोति, कुमारः पुनः आत्मानं सविशेषं कुरूपं दर्शयति, लोकेभ्य इति शेषः ॥८३०॥ अत्रान्तरे सर्वे राजानस्तं कुब्जम् आक्षिपन्ति- आक्रोशन्ति, कथमित्याह- रे रे कुब्ज ! एतां वरमालां मुञ्च-त्यज,कीदृशीं वरमालाम् ?-आत्मनः कालं-कालरूपाम् ॥८३१॥

जइ किरि मुद्धा एसा, न मुणेइ गुणागुणंपि पुरिसाणं । तहवि हु एरिसकन्नारयणं खुज्जस्स न सहामो ॥८३२॥
ता झत्ति चयसु मालं, नो वा अम्हं करालकरवालो । एसो तुह गलनालं, लुणिही नूणं सवरमालं ॥८३३
हसिऊण भणइ खुज्जो, जइ किरि तुब्भे इमीइ नो वरीया ॥ दोहग्गदड्ढदेहा, कीस न रूसेह ता विहिणो ? ॥८३४॥
इण्हिं पुण तुम्हाणं, परित्थिअहिलासविहिअपावाणं । सोहणखमं इमं मे, असिधारा तित्थमेवऽत्थि ॥८३५॥
इअ भणिऊणं तेसिं, खुज्जेणं दंसिया तहा हत्था । जह ते भीइविहत्था, सव्वेऽवि दिसोदिसं नट्ठा ॥८३६॥

यदि किल एषा मुग्धा-भद्रकस्वभावा पुरुषाणां गुणाश्च अगुणाश्च एषां समाहारो गुणागुणमपि न मुणति-न जानाति तथापि ईदृशं कन्यारत्नं कुब्जस्य न सहामहे ॥८३२॥ तत्-तस्मात्कारणात् झटिति-शीघ्रं मालां त्यज, यदि पुनर्न त्यक्ष्यसि तर्हि अस्माकमेष करालो-विकरालः करवालः-तरवारिः सवरमालं-वरमालया सहितं तव गलनालं लविष्यति- छेत्स्यति ॥८३३॥ ततः कुब्जो हसित्वा भणति- यदि किल अनया कन्यया यूयं न वृताः, कीदृशा यूयं ? -दौर्भाग्येण दग्धो देहः-शरीरं येषां ते ईदृशाः तत्-तर्हि विधेः-भाग्यस्य कथं न रुष्यथ ? येन यूयं दौर्भाग्यदूषिताः कृता इति भावः॥८३४॥ इदानीं-साम्प्रतं पुनः परस्त्रिया योऽभिलाषो-वाञ्छा तेन विहितं-कृतं पापं यैस्ते तादृशानां युष्माकं शोधनक्षमं-शुद्धिकरणसमर्थमिदं मे-मम असिधारा-खड्गधारा तद्रूपं तीर्थमेवास्ति ॥८३५॥ इति भणित्वा कुब्जेन तेभ्यो-नृपेभ्यस्तथा हस्तौ दर्शितौ यथा ते राजानः सर्वेऽपि भीत्या-भयेन विहस्ता-व्याकुलाः सन्तो दिशोदिशं नष्टाः ॥८३६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खुज्जेण तेण तह कहवि दंसिओ विक्कमो रणे तत्थ । जह रंजिअचित्तेहिं, सुरेहिं मुक्का कुसुमवुट्ठी ॥८३७॥
तं दट्ठूणं सिरिवज्जसेणरायावि रंजिओ भणइ । जह पयडियं बलं तह, रूवं पयडेसु वच्छ ! नियं ॥८३८॥
तक्कालं च कुमारं, सहावरूवं पलोइऊण निवो । परिणाविअ नियधूयं, साणंदो देइ आवासं ॥८३९॥
तत्थ ठिओ सिरिपालो, कुमरो तियलुक्कसुंदरीसहिओ । पावइ परमाणंदं, जीवो जह भावणासहिओ ॥८४०॥
अन्नदिणे कोइ चरो, रायसहाए समागओ भणइ । देवदलपट्टणंमी, अत्थि नरिंदो धरापालो ॥ ८४१॥

तेन कुब्जेन तत्र रणे-सङ्ग्रामे तथा-तेन प्रकारेण कथमपि विक्रमः पराक्रमो दर्शितो, यथा रञ्जितचित्तैः-प्रसन्नीभूतमानसैः सुरैः-देवैः कुसुमानां- पुष्पाणां वृष्टिर्मुक्ता कृतेत्यर्थः ॥८३७॥ तं-कुब्जपराक्रमं दृष्ट्वा श्री वज्रसेनराजापि रञ्जितः सन् भणति, किं भणतीत्याह- हे वत्स ! यथा त्वया स्वकीयं बलं प्रकटितं-प्रकटीकृतं तथा निजं रूपं प्रकटय-प्रकटीकुरु ॥८३८॥ च - पुनः नृपो-राजा तत्कालं स्वभावरूपं-स्वमूलरूपयुक्तं कुमारं प्रलोक्य निजपुत्रीं परिणाय्य सानन्दः- सहर्षः सन् निवासार्थमावासं-प्रासादं ददाति ॥८३९॥ तत्र आवासे स्थितस्त्रैलोक्यसुन्दर्या सहितः श्रीपालः कुमारः परमम्-उत्कृष्टमानन्दं प्राप्नोति, कया सहितः क इव ?-भावनया-सदध्यवसायपरिणत्या सहितो जीवो यथा, यथाशब्द इवार्थे, यथा सद्भावनासहितो जीवः परमानन्दं प्राप्नोति ॥८४०॥ अन्यस्मिन् दिने कोऽपि चरो-हेरिको राजसभायां समागतो भणति- देवदलनाम्नि पत्तने धरापालो नाम नरेन्द्रो-राजाऽस्ति ॥८४१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्सुत्तमरायाणां, पुत्तीओ राणियाउ चुलसीई । ताण मज्झंमि पढमा, गुणमाला अत्थि सविवेया ॥८४२॥
तीए य पंच पुत्ता, हिरण्णगब्भो य नेहलो जोहो । विजियारी अ सुकन्नो, ताणुवरिं पुत्तिया चेगा ॥८४३॥
सा नामेणं सिंगारसुंदरिं सिंगारिणी तिलुक्कस्स ॥ रूवकलागुणपुन्ना, तारुण्णालंकिअसरीरा ॥८४४॥
तीए जिणधम्मरयाइ पंडिआ तह विअक्खणा पउणा । निउणा दक्खत्ति सहीण पंचगं अत्थि जिणभत्तं ॥८४५॥
ताणं पुरो कुमारी, भणेइ अम्हाण जिणमयरयाणं । जइ कोइ होइ जिणमयविऊ वरो तो वरं होइ ॥८४६॥

तस्य राज्ञ उत्तमराजानां पुत्र्यश्चतुरशीती राज्यः सन्ति, तासां मध्ये प्रथमा गुणमाला नाम राज्ञी अस्ति, कीदृशी ? सविवेका-विवेकसहिता ॥८४२॥ तस्याश्च राज्याः पञ्च पुत्राः, सन्ति, तानेव नामत आह- हिरण्यगर्भः१ स्नेहलः २ योधः ३ च - पुनः विजितारिः ४ सुकर्णः ५ एते पञ्च पुत्राः च - पुनस्तेषां पुत्राणामुपरि एका पुत्रिका अस्ति ॥ ८४३॥ सा कन्या नाम्ना शृङ्गारसुन्दरी अस्ति, कीदृशी ? -त्रैलोक्यस्य शृङ्गारिणी - शृङ्गारकारिणी-शोभाकारिकेत्यर्थः, पुनः रूपकलागुणैः पूर्णा-भृता तथा तारुण्येन अलङ्कृतं-विभूषितं शरीरं यस्याः सा ॥८४४॥ जिनधर्म्मे रताया-रक्तायास्तस्याः कन्यायाः सखीनां पञ्चकमस्ति, तदेव नामत आह- प्रथमा पण्डिता तथा द्वितीया विचक्षणा २ तृतीया प्रगुणा ३ चतुर्थी निपुणा ४ पञ्चमी दक्षा५ इति, कीदृशं सखीपञ्चकं ? -जिनस्य-अर्हतो भक्तम् ॥८४५॥ कुमारी तासां सखीनां पुरः-अग्रे भणति, जिनमते - जिनशासने रतानां-रक्तानामस्माकं यदि कोऽपि जिनमतवित्-जिनमतज्ञः पुमान् वरो-भर्त्ता भवेत् तत्-तर्हि वरं-शोभनं भवति ॥८४६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जेणं वरो वरिज्जइ, मणनिव्वुइकारणेण कन्नाहिं । सा पुण धम्मविरोहे, पइपत्तीणं कओ होइ ? ॥८४७॥
तम्हा अम्हेहिं परिक्खिऊण सम्मं जिणिंदधम्मंमि । जो होइ निच्चलमणो, सो चेव वरो वरेअव्वो ॥८४८॥
भणिअं च पंडिआए, सामिणि ! जुत्तं तए इमं वुत्तं । किंतु निरुत्तो भावो, परस्स नज्जइ कवित्तेणं ॥८४९॥
ता काऊण समस्सा-पयाइं सद्दिट्ठिपूरणिज्जाइं । अप्पेह जेहिं नज्जइ, सुहासुहो धम्मपरिणामो ॥८५०॥
तो तीए कुमरीए, अत्थि पइन्ना इमा कया जो उ । चित्तगयसमस्साओ, पुरिस्सइ सो वरेअव्वो ॥८५१॥

येन कारणेन कन्याभिः मनोनिर्वृतिकारणेन-मनःसुखनिमित्तं वरो-भर्त्ता व्रियते सा- मनोनिर्वृतिः पुनः पतिपत्न्योः-भर्तृस्त्रियोर्द्धर्म्मविरोधे सति कुतो भवति ?, प्रायो न भवत्येवेत्यर्थः ॥८४७ ॥ तस्मात् अस्माभिः सम्यक् परीक्ष्य यः पुमान् जिनेन्द्रधर्मे निश्चलं मनो यस्य स निश्चलमना भवति स एव वरो-भर्त्ता वरितव्यो-वरणीयः ॥८४८॥ तदा पण्डितया पण्डितानाम्न्या सख्या च भणितं- हे स्वामिनि ! त्वया इदं युक्तमुक्तं किन्तु-परन्तु परस्य-अन्यपुरुषस्य निरुक्तः - अप्रकाशितो भावः- अभिप्रायः कवित्वेन ज्ञायते, यादृशं मनसि भवेत् तादृशं कवित्वे प्रादुर्भवतीत्यर्थः ॥८४९॥ तस्मात्सद्दृष्टिः-सम्यग्दृष्टिस्तेन पूरणीयानि-पूरयितुं शक्यानि समस्यापदानि कृत्वा अर्पयत-दत्त यैः पूरितैः शुभोऽशुभो वा धर्म्मपरिणामो ज्ञायते ॥८५०॥ ततः-तदनन्तरं तया कुमार्या इयं प्रतिज्ञा कृताऽस्ति, यस्तु चित्तगता-मनोगताः समस्याः पूरयिष्यते स पुमानस्माभिर्वरितव्यः ॥८५१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोऊण तं पसिद्धिं, समागयाऽणेगपंडिया पुरिसा । पूरंति समस्साओ, परं न तीए मणगयाओ ॥८५२॥
एवं सा निवधूया, सुपंडियाईहिं पंचहिं सहीहिं । सहिया चित्तपरिक्खं, कुणमाणा वट्टइ जणाणं ॥८५३॥
तं सोऊणं सव्वो, सहाजणो भणइ केरिसं चुज्जं । पूरिज्जंति समस्सा, किं केणवि परमणगयाओ ? ॥८५४॥
तं सोऊणं कुमारो, धणियं संजायमणचमक्कारो । पत्तो नियआवासं, पुणो पभायंमि चिंतेइ ॥८५५॥
हारस्स पभावेणं, मह गमणं होउ पट्टणे तत्थ । जत्थऽत्थि रायकन्ना, विहियपइन्ना समस्साहिं ॥८५६॥

तां प्रसिद्धिं श्रुत्वाऽनेके पण्डिताः समागताः सन्तः समस्याः पूरयन्ति, परं-केवलं तस्याः कन्यायाः मनोगताः समस्याः न पूरयन्ति ॥८५२॥ एवममुना प्रकारेण सा नृपपुत्री सुष्ठु शोभनाभिः पण्डितादिभिः पञ्चभिः सखीभिः सहिता लोकानां-जनानां चित्तपरीक्षां कुर्वाणा वर्त्तते ॥८५३॥ तद्वचनं श्रुत्वा सर्वोऽपि सभाजनः-सभावर्त्तिलोको भणति, कीदृशं चोद्यम्-आश्चर्यमस्ति?, किं परस्य मनोगताः समस्याः केनापि पूर्यन्ते ॥८५४॥ तच्चरवचनं श्रुत्वा 'धणिय' त्ति अत्यर्थं सञ्जातो मनसि चमत्कारो यस्य स एवम्भूतः कुमारो निजकावासं प्राप्तः सन् पुनः प्रभाते चिन्तयति ॥८५५॥ किं चिन्तयतीत्याह-हारस्य प्रभावेण तत्र-तस्मिन् देवदलाख्ये पत्तने मम गमनं भवतु यत्र नगरे समस्याभिर्विहिता-कृता प्रतिज्ञा यया सा ईदृशी राजकन्याऽस्ति ॥८५६॥

For Private and Personal Use Only

पत्तो अ तक्खणं चिय, सहावरूवेण मंडवे तत्थ । जत्थत्थि रायपुत्ती, संजुत्ता पंचहिं सहीहिं ॥ ८५७ ॥
दट्ठूण तं कुमारं, मारोवमरूवमसमलायण्णं । नरवरधूयावि खणं विम्हिअचित्ता विचिंतेइ ॥ ८५८ ॥
जइ कहविहु एस मणोगयाउ पूरेइ मह समस्साओ । ताऽहं तिन्नपइन्ना, हवेमि धन्ना सुकयपुन्ना ॥८५९॥
पुच्छइ तओ कुमारो, कहह समस्सापयाइं निययाइं । तो कुमरिसंनिया पंडियावि पढमं पयं पढइ ॥८६०॥
'मणुवंछिय फल होइ'

अथ कुमारस्तत्क्षणमेव स्वभावरूपेण तत्र-तस्मिन्मण्डपे प्राप्तः यत्र पञ्चभिः सखीभिः संयुक्ता-सहिता राजपुत्री अस्ति ॥ ८५७ ॥ मारेण-कामेन उपमा यस्य तन्मारोपमं, मारोपमं रूपं यस्य तम्, अत एव असमम्-अतुलं लावण्यं यस्य स तं, तथाभूतं तं कुमारं दृष्ट्वा नरवरस्य-राज्ञः पुत्री अपि क्षणं यावत् विस्मितं-विस्मययुक्तं चित्तं यस्याः सा एवम्भूता सती विचिन्तयति ॥ ८५८ ॥ किं चिन्तयतीत्याह- हु इति निश्चितम् एष पुमान् यदि कथमपि मम मनोगताः समस्याः पूरयति तत्-तर्हि अहं तीर्णा-पारं प्रापिता प्रतिज्ञा यया सा एवम्भूता सती धन्या पुनः सुकृतपुण्या भवामि, सुष्ठु कृतं पुण्यं यया सेति विग्रहः ॥ ८५९ ॥ ततः कुमारः पृच्छति, यूयं निजकानि-स्वकीयानि समस्यापदानि कथयत, ततः-तदनन्तरं कुमार्य्या संज्ञिता सखी अपि प्रथमम्-एकं समस्यापदं पठति-कथयति ॥ ८६० ॥ किं तदित्याह-'मणु' इत्यादि, प्रथमं समस्यापदमिदम् ।

एसा सहीमुहेणं जं, कहइ समस्सापयं मएणावि । पूरेयव्वं केणवि, पुत्तलयमुहेण हेलाए ॥ ८६१ ॥
इय चिंतिऊण पासट्ठियस्स थंभस्स पुत्तलयसीसे । कुमरेण करो दिन्नो, ता पुत्तलओ भणइ एवं ॥८६२॥
अरिहंताईनवपय, निअमणु धरइ जु कोइ । निच्छइ तसु नरसेहरह, मणुवंछिअ फल होइ ८६३ ॥
तओ विअक्खणा पढेइ- "अवर म झंखहु आल" ॥ तओ कुमरकरपवित्तो पुत्तलओ पूरेइ-
अरिहंत देव सुसाधु गुरु, धम्म तु दयाविसाल । मंतुत्तम नवकार पर, अवर म झंखहु आल ॥ ८६४ ॥

एतत् समस्यापदं सखीमुखात् श्रुत्वा कुमारश्चिन्तयति- एषा राजकन्या यत्सखीमुखेन पदं कथयति तन्मयापि केनापि पुत्रकमुखेन हेलया-लीलया समस्यापदं पूरयितव्यम् ॥ ८६१ ॥ इति चिन्तयित्वा कुमारेण पार्श्वस्थितस्य स्तम्भस्य पुत्रकशीर्षे-पुत्रकमस्तके करो-हस्तो दत्तः, ततः पुत्रक एवं भणति ॥ ८६२ ॥ अर्हदादीनि नव पदानि निजमनसि यः कोऽपि धरति तस्य नरशेखरस्य निश्चयेन मनोवाञ्छितं फलं भवति ॥ ८६३ ॥ ततो विचक्षणानाम्नी द्वितीया सखी पठति, इदं द्वितीयं समस्यापदम्, ततः कुमारस्य करेण पवित्रः-पवित्रीभूतः पुत्रकः पूरयति, तथाहि- अर्हन् देवः सुसाधुः गुरुः धर्म्मस्तु दयया-अनुकम्पया विशालो-विस्तीर्णः मन्त्रेषु उत्तमो-मुख्यो नमस्काराख्यो मन्त्रः एते एव देवगुरुधर्म्ममन्त्रेषु पराः-श्रेष्ठाः सन्ति, अत एतानेव भजतेति शेषः, अपरं सर्वमपि आलम्-अनर्थकं वस्तु मा 'झंखहु' त्ति अङ्गीकुरुत ॥ ८६४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तओ पउणा पढेइ-'करि सफलउं अप्पाणु' पुत्तलओ पूरेइ-

आराहिय धुरि देवगुरु, देहि सुपत्तिहिं दाणु । तवसंजमउवयार करि, करि सफलउं अप्पाणु ॥ ८६५ ॥

तओ निउणा पढेइ-'जित्तउं लिहिउं निलाडि' पुत्तलओ भणेइ-

अरि मन अप्पउं खंचि धरि, चिंता जालि म पाडि । फलु तित्तउं परिपामीयइ, जित्तउं लिहिउं निलाडि ॥८६६॥

तओ दक्खा पढेइ-'तसु तिहुयण जण दासु', तओ पुत्तलओ भणेइ-

अत्थि भवंतरसंचिउं पुण्ण, समग्गल जासु । तसु बल तसु मइ तसु सिरिय, तसु तिहुयणजण दासु ॥८६७॥

ततः प्रगुणाख्या तृतीया सखी पठति, इदं तृतीयं समस्यापदम्, पुत्रकः पूरयति, धुरि-आदौ देवं-वीतरागं गुरुं-सुसाधुम् आराध्य-संसेव्य सुपात्रेभ्यो दानं देहि, पुनस्तपःसंयमोपकारान् कृत्वा आत्मानं सफलं कुरु ॥ ८६५ ॥ ततो निपुणाख्या चतुर्थी सखी पठति, इदं चतुर्थं समस्यापदम्, पुत्रको भणति- अरे ! मनस्त्वमात्मानं खञ्चित्ति-आकृष्य धारय, चिन्ताजाले मा पातय, फलं तावदेव परि-सामस्त्येन प्राप्यते यावल्ललाटे लिखितं-कर्मरूपेण आत्मनि निबद्धमित्यर्थः ॥ ८६६ ॥ ततो दत्तानाम्नी पञ्चमी सखी पठति, इदं पञ्चमं समस्यापदं, ततः पुत्रको भणति, यस्य पुरुषस्य भवान्तरे सञ्चितं समर्गलम्-अत्यधिकं पुण्यमस्ति तस्य पुरुषस्य बलं-पराक्रमो भवति, तस्यैव मतिः-बुद्धिः स्यात्, पुनस्तस्य श्रीः-लक्ष्मीः शोभा वा भवति, तथा तस्य त्रिभुवनजनो-जगत्त्रयलोको दासः-अनुचरो भवति ॥ ८६७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दट्ठूण तं समस्सापूरणमइविम्हिया कुमारीवि । आणंदपुलइअंगी, वरइ कुमारं तिजयसारं ॥ ८६८ ॥
रायपमुहोऽवि लोओ, भणइ अहो चुज्जमेगमेयंति । जं पूरिज्जंति मणोगयाउ एवं समस्साओ ॥८६९॥
जं च इमं सकरेणं, पुत्तलयमुहेण पूरणं ताणं । तं लोउत्तरचरिअं, कुमरस्स करेइ अच्छरिअं ॥ ८७० ॥
राया नियधूयाए, तीए पंचहिं सहीहिं सहियाए । कारेइ वित्थरेणं, पाणिग्गहणं कुमारेणं ॥ ८७१ ॥
इत्थंतरंमि एगो, भट्टो दट्ठूण कुमरमाहप्पं । पभणेइ उच्चसद्दं भो भो निसुणेह मह वयणं ॥ ८७२ ॥

तत्समस्यापूरणं दृष्ट्वा-निरीक्ष्य कुमारी अपि अतिविस्मिता-अतिशयेन आश्चर्यं प्राप्ताऽत एवानन्देन-हर्षेण पुलकितं-रोमोद्गमयुक्तमङ्गं यस्याः सा एवम्भूता सती कुमारं वृणोति, कीदृशं कुमारम् ?-त्रिजगति सारं-सारभूतम् ॥ ८६८ ॥ राजप्रमुखोऽपि लोक इत्येवं भणति, अहो एकमेतत् चोद्यम्-आश्चर्यं, किमेतदित्याह- यत् परेषां मनोगताः समस्या एवम्-उक्तप्रकारेण पूर्यन्ते ॥ ८६९ ॥ यच्च स्वकरेण-निजहस्तेन पुत्रकमुखेन इदं तासां समस्यानां पूरणं तत् कुमारस्य लोकोत्तरचरितं-सर्वलोकेभ्यः प्रधानं चरित्रमाश्चर्यं करोति-उत्पादयति ॥ ८७० ॥ राजा पञ्चभिः सखीभिः सहिताया निजपुत्र्या विस्तारेण कुमारेण पाणिग्रहणं कारयति ॥ ८७१ ॥ अत्रान्तरे- अस्मिन्नवसरे एको भट्टः कुमारस्य माहात्म्यं दृष्ट्वा उच्चैः शब्दो यत्र कर्म्मणि तत् उच्चशब्दं यथा स्यात्तथा प्रभणति-प्रकर्षेण कथयति, किं भणतीत्याह- भो भो लोका ! मम वचनं श्रुणुत-आकर्णयत ॥ ८७२ ॥

For Private and Personal Use Only

कुल्लागपुरे नयरे, अत्थि नरिंदो पुरंदरो नाम । तस्सत्थि पट्टदेवी, विजयानामेण सुपसिद्धा ॥ ८७३ ॥
हरिविक्कम-नरविक्कम-हरिसिरि-सेणाइसत्तपुत्ताणं । उवरिंमि अत्थि एगा, पुत्ती जयसुंदरीनाम ॥ ८७४ ॥
तीए कलाकलावं, रूवं सोहग्गलडहलायन्नं । दट्ठूण भणइ राया, को णु इमीए वरो जुग्गो ? ॥ ८७५ ॥
तो तीए उवझाओ, भणइ महाराय ! तुज्झ पुत्तीए । सयलकलासत्थाइं, अवगाहंतीइ एयाए ॥ ८७६ ॥
सत्थपत्थावपत्तं, राहावेहस्स साहणसरूवं । विणएण अहं पुट्ठो, कहियं च तयं मए एवं ॥ ८७७ ॥
मंडिज्जंते थंभट्ठिअट्ठ चक्काइं जंतजोगेणं । सिट्ठिविसिट्ठिकमेणं, एगंतरियं भमंताइं ॥ ८७८ ॥

कुल्लागपुरे नगरे पुरेन्द्रो नाम नरेन्द्रो-राजाऽस्ति, तस्य राज्ञो विजयानाम्नी सुतराम्-अतिशयेन प्रसिद्धा पट्टदेवी-पट्टराज्ञी अस्ति ॥ ८७३ ॥ हरिविक्रम-नरविक्रम-हरिसेण-श्रीषेणादिसप्तपुत्राणामुपरि एका जयसुन्दरीनाम पुत्री अस्ति ॥ ८७४ ॥ तस्याः कन्यायाः कलाकलापं-कलासमूहं पुनः रूपम्-आकृतिं तथा सौभाग्येन 'लडहत्ति' सुन्दरं लावण्यं दृष्ट्वा राजा भणति, नु इति वितर्केऽस्याः कन्याया योग्यो वरो-भर्त्ता कोऽस्ति ? ॥ ८७५ ॥ ततस्तस्याः कन्याया उपाध्यायः-पाठको भणति, हे महाराज ! सकलकलाशास्त्राणि अवगाहमानया-अभ्यस्यन्त्या एतया तव पुत्र्या ॥ ८७६ ॥ शस्त्रप्रस्तावात्-शस्त्रप्रक्रमात् प्राप्तं राधावेधस्य साधनस्वरूपं विनयेन-बहुमानेन अहं पृष्टः, मया च तद्राधावेधसाधनस्वरूपं एवं-वक्ष्यमाणप्रकारेण कथितम् ॥ ८७७ ॥ कथमित्याह- स्तम्भे स्थितानि अष्ट चक्राणि मण्ड्यन्ते-रच्यन्ते, कीदृशानि ?-यन्त्रयोगेन सृष्टिविसृष्टिक्रमेण एकान्तरितं भ्रमन्ति-भ्रमणं कुर्वाणानि एकं चक्रं सृष्ट्या भ्रमति, द्वितीयं विसृष्ट्या पुनरेकं सृष्ट्या द्वितीयं विसृष्ट्या भ्रमतीत्यर्थः ॥ ८७८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चक्कारयविवरोवरि, राहानामेण कट्ठपुत्तलिया। ठविया हवेइ तीए, वामच्छी किज्जए लक्खं ॥ ८७९ ॥
हिट्ठट्ठियतिल्लकडाहराहपडिबिंबलद्धलक्खेणं। उड्ढसरेण नरेणं, तीए वेहो विहेयव्वो ॥ ८८० ॥
सो पुण केणवि विरलेण चेव विन्नायधणुहवेएण। उत्तमनरेण किज्जइ, जं गिज्जइ एरिसं लोए ॥८८१॥
विणयंता चेव गुणा, संतंतरसा किआ उ भावंता। कव्वं च नाडयंतं, राहावेहंतमी सत्थं ॥ ८८२ ॥

चक्राणामरकेषु यानि विवरणानि-छिद्राणि तेषामुपरि राधा इतिनाम्ना काष्ठपुत्रिका-काष्ठमयी पञ्चालिका स्थापिता भवति, तस्या वाममक्षि लक्ष्यं-वेध्यं क्रियते ॥ ८७९ ॥ अधःस्थितो यस्तैलकटाहकस्तस्मिन् यत् राधायाः प्रतिबिम्बं तेन लब्धं लक्ष्यं-वेध्यं येन स तेन नरेण ऊर्ध्वमुखबाणेन तस्या राधाया वामाक्षिप्रदेशे वेधो विधातव्यः-कर्त्तव्यः ॥ ८८० ॥ स राधावेधः पुनः केनापि विरलेनैव-उत्तमनरेण क्रियते, कीदृशेन ?-विज्ञातो-विशेषेण ज्ञातो धनुर्वेदो येन स तेन, ईदृशेन राधावेधः साध्यते इत्यर्थः, यस्मात्कारणात् लोके ईदृशं गीयते-कथ्यते ॥ ८८१ ॥ तथाहि- विनयोऽन्ते येषां ते विनयान्ता एव गुणाः सन्ति, सर्वगुणेषु विनयस्यैव प्राधान्यमित्यर्थः, तथा शान्तो रसोऽन्ते येषां ते शान्तान्ता रसाः सन्ति, रसेषु शान्तरसस्यैव प्राधान्यमित्यर्थः, पुनर्भावः-शुद्धाध्यवसाय एव अन्ते यासां ता भावान्ताः क्रिया-देवदर्शनाद्याः सन्ति, एतावता क्रियासु भावस्यैव प्राधान्यमित्यर्थः, च पुनर्नाटकमन्ते यस्य तन्नाटकान्तमेव काव्यमस्ति, काव्येषु नाटकस्यैव प्राधान्यात्, तथा राधावेधोऽन्ते यस्य तद्राधावेधान्तं शस्त्रविज्ञानं, शस्त्रविज्ञानेषु तस्यैव प्राधान्यमित्यर्थः, ईकारः पादपूरणे ॥ ८८२ ॥

For Private and Personal Use Only

तं सोऊणमिमीए, नरवर ! तुह नंदणाइ सहसत्ति । बहुलोयाण समक्खं, इमा पइन्ना कया अत्थि ॥८८३॥
जो किर मह दिट्ठीए, राहावेहं करिस्सए कोऽवि । तं चेव निच्छएणं, अहं वरिस्सामि नररयणं ॥८८४॥
एआइ पइन्नाए, नज्जइ पुरिसुत्तमस्स कस्सावि । नूणं इमा भविस्सइ, पत्ती धन्ना सुकयपुन्ना ॥८८५॥
ता तुज्झेऽवि नरेसर !, एवं चिंतं चएवि वेगेण । कारेह वित्थरेणं, राहावेहस्स सामग्गिं ॥ ८८६ ॥
तं च तहा मंडाविअ, रन्नावि निमंतिया नरिंदा य । परमिक्केणवि केणवि, राहावेहो न सो विहिओ ॥८८७॥

ततः राधावेधस्वरूपं श्रुत्वा हे नरवर-हे महाराज ! अनया त्वत्पुत्र्या सहसा-अकस्मात् बहुलोकानां समक्षं-प्रत्यक्षमियं प्रतिज्ञा कृताऽस्ति, पूर्वार्द्धान्त इतिशब्दः पादपूरणे ॥ ८८३ ॥ केयं प्रतिज्ञेत्याह- यः किल कोऽपि पुमान् मम दृष्टौ-मम नेत्रागतो राधावेधं करिष्यते तमेव नररत्नं निश्चयेन अहं वरिष्यामि-भर्तृत्वेनाङ्गीकरिष्यामि ॥ ८८४ ॥ एतया प्रतिज्ञया 'नज्जइ' त्ति ज्ञायते नूनं-निश्चयेन इयं भवत्पुत्री कस्यापि पुरुषोत्तमस्य-उत्तमनरस्य पत्नी-भार्या भविष्यति, कीदृशी इयं ?-धन्या, पुनः सुष्ठु कृतं पुण्यं यया सा सुकृतपुण्या ॥ ८८५ ॥ तत्-तस्मात्कारणात् हे नरेश्वर ! यूयमपि एवं पूर्वोक्तप्रकारां चिन्तां त्यक्त्वा वेगेन राधावेधस्य सामग्रीं विस्तारेण कारयत ॥ ८८६ ॥ तां च राधावेधसामग्रीं तथा-तेन प्रकारेण मण्डयित्वा राज्ञापि नरेन्द्राश्च निमन्त्रिता-आहूताः परमेकेनापि-राज्ञा स राधावेधो न विहितो-न कृतः ॥ ८८७ ॥

सोवि हु जइ होइ अणेण चेव कुमरेण गुरुपभावेणं । नो अन्नेणं केणवि, होही सो निच्छओ एसो ॥८८८॥
एवं कहिऊण निअट्टियस्स भट्टस्स कुंडलं दाउं । कुमरोऽवि सपरिवारो, निवदत्तावासमणुपत्तो ॥८८९॥
तत्थ ठिओ तं रयणिं, रमणीगणरमणरंगरसवसओ । पच्चूसे पुण पत्तो, कुल्लागपुरे तहच्चेव ॥ ८९० ॥
उवविट्ठे य नरिंदे, मिलिए लोए अ कुमरिदिट्ठीए । कुमरेण कओ राहावेहो हारप्पभावेणं ॥ ८९१ ॥
वरिओ तीए जयसुंदरीए कुमरो पमोयपुन्नाए । नरनाहोऽवि हु महया, महेण कारेइ वीवाहं ॥ ८९२ ॥

हु इति निश्चये, स राधावेधोऽपि यदि भवति तर्हि अनेनैव कुमारेण भविष्यति, कीदृशेन ?-गुरुप्रभावेण-गुरुः महान् प्रभावो यस्य स तेनेति, स राधावेधोऽन्येन केनापि पुरुषेण नो भविष्यति, एष निश्चयोऽस्ति ॥ ८८८ ॥ एवं कथयित्वा निवृत्ताय भट्टाय कुण्डलं दत्त्वा कुमारोऽपि सपरिवारः-स्त्र्यादिपरिवारसहितो नृपेण-राज्ञा दत्तमावासं-मन्दिरमनुप्राप्तः ॥ ८८९ ॥ रमणीनां -स्त्रीणां यो गणः-समूहस्तेन सह यत् रमणं तत्र यो रङ्गो-रागः अनुरक्तत्वमिति यावत् स एव रसः स्वादस्तस्य वशात् तां रजनीं-रात्रिं तत्रावासे स्थितः, प्रत्यूषे-प्रभाते पुनस्तथैव-तेनैव प्रकारेण हारप्रभावेणेत्यर्थः कुल्लागपुरे प्राप्तः ॥ ८९० ॥ नरेन्द्रे-राज्ञि च उपविष्टे सति लोके च सर्वस्मिन् मिलिते सति, द्वौ चकारौ तुल्यकालं सूचयतः, कुमारेण श्रीपालेन कुमार्य्याः-कन्याया दृष्टौ-लोचनाग्रे हारप्रभावेण राधावेधः कृतः ॥ ८९१ ॥ तया जयसुन्दर्य्या प्रमोदेन-हर्षेण पूर्णया-भृतया सत्या कुमारो वृतः, नरनाथो-राजापि च महता महेन-उत्सवेन वीवाहं कारयति ॥ ८९२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नरवइदिन्नावासे, सुक्खनिवासे रहेइ जा कुमरो । ता माउलनिवपुरिसा, तस्साणयणत्थमणुपत्ता ॥८९३॥
कुमरो निअरमणीणं, आणयणत्थं च पेसए पुरिसे । ताओवि सुंदरीओ, सबंधुसहियाउ पत्ताओ ॥८९४॥
मिलिअं च तत्थ सिन्नं, हयगयरहसुहडसंकुलं गरुयं । तेण समेओ कुमरो, पत्तो ठाणाभिहाणपुरं ॥८९५॥
आणंदिओ अ माउलराया तस्सुत्तमं सिरिं दट्ठुं । सुंदरिचउक्कसहिअं, दट्ठूण पइं च मयणाओ ॥८९६॥

सुखः-सुखकारी निवासो यस्मिन् स सुखनिवासस्तस्मिन् नरपतिना-राज्ञा दत्ते आवासे यावत् कुमारो रहेइत्ति-तिष्ठति तावन्मातुलनृपस्य-वसुपालराजस्य पुरुषाः-सेवकास्तस्य-कुमारस्यानयनार्थम्-आकारणार्थमनुप्राप्ताः ॥ ८९३ ॥ कुमारश्च निजरमणीनां-स्वस्त्रीणामानयनार्थं पुरुषान् प्रेषयति, ता अपि सुन्दर्यो-नार्यः स्वैः-स्वकीयैर्बन्धुभिः-भ्रातृभिः सहिताः प्राप्ताः, तत्रागता इत्यर्थः ॥ ८९४ ॥ च - पुनः तत्र गुरुकं-महत्सैन्यं मिलितम् - एकत्रीभूतं, कीदृशं सैन्यं ?-हयगजरथसुभटैः सङ्कुलं-व्याप्तं, तेन सैन्येन समेतः सहितः कुमारः स्थानाभिधानं-स्थानाख्यं पुरं प्राप्तः ॥ ८९५ ॥ च - पुनः मातुर्भ्राता मातुलो राजा वसुपालस्तस्य कुमारस्य उत्तमां श्रियं दृष्ट्वा आनन्दित-आनन्दं प्राप्तः, च - पुनः मदना-मदनसेनाद्याः कुमारस्त्रियः सुन्दरीचतुष्कसहितं-चतसृभिः सुन्दरीभिर्युक्तं पतिं-भर्त्तारं दृष्ट्वा आनन्दिताः ॥ ८९६ ॥

For Private and Personal Use Only

तत्तो माउलयनिवो, अणेगनरनाहसंजुओ कुमरं । सिरिसिरिपालं थप्पइ, रज्जे अभिसेअविहिपुव्वं ॥८९७॥
सिंहासणे निविट्ठो, वरहारकिरीडकुंडलाहरणो । वरचमरछत्तपमुहेहिं रायचिन्हेहिं कयसोहो ॥८९८॥
सिरिसिरिपालो राया, नरवरसामंतमंतिपमुहेहिं । पणमिज्जइ बहुहयगयमणिमुत्तियपाहुडकरेहिं ॥८९९॥
पवहणसिरीसमेओ, असंखचउरंगसिन्नपरिकरिओ । चल्लइ सिरिपालनिवो, निअजणणीपायनमणत्थं ॥९००॥

ततः-तदनन्तरं मातुलकनृपोऽनेकैः-बहुभिर्नरनाथै-राजभिः सहितः श्रीश्रीपालं कुमारमभिषेकविधिपूर्वं राज्ये स्थापयति, अभिषेको-राज्याभिषेकस्तस्य यो विधिः तत्पूर्वकमित्यर्थः ॥ ८९७ ॥ अथ राज्याभिषेकानन्तरं यादृशो राजा जातस्तादृशमाह-सिंहासने निविष्ट-उपविष्टः, पुनर्वराणि-प्रधानानि हारकिरीटकुण्डलाभरणानि यस्य सः, किरीटं-मुकुटं, पुनः वरैश्चामरच्छत्रप्रमुखै राजचिह्नैः कृता शोभा यस्य स तथोक्तः ॥ ८९८ ॥ एवम्भूतः श्रीश्रीपालो राजा नरवरसामन्तमन्त्रिप्रमुखैः प्रणम्यते-नमस्क्रियते, कीदृशैः नरवराद्यैः ?- बहवो हया-अश्वा गजा-हस्तिनो मणयो-वैडूर्याद्या मौक्तिकानि-मुक्ताफलानि तान्येव प्राभृतानि-ढौकितानि करेषु-हस्तेषु येषां ते तैस्तथोक्तैः ॥ ८९९ ॥ प्रवहणानां-यानपात्राणां या श्रीः-लक्ष्मीस्तया समेतः-सहितः पुनर्न विद्यते सङ्ख्या यस्य तत् असङ्ख्यं यच्चतुरङ्गं-हस्त्यश्वरथपत्तिरूपं सैन्यं तेन परिकरितः-परिवृतः, परिकलित इति पाठान्तरं, तेन युक्त इत्यर्थः, ईदृशः श्रीपालनृपो निजजनन्याः-स्वमातुः पादयोः-चरणयोर्नमनार्थं चलति-गच्छति ॥ ९०० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोवि हु आगच्छंतो, ठाणे ठाणे नरिंदविंदेहिं । बहुविहभिट्टणएहिं, भिट्टिज्जइ लद्धमाणेहिं ॥ ९०१ ॥
सोपारयंमि नयरे, संपत्तो तत्थ परिसरमहीए । आवासिओ ससिन्नो, सो सिरिपालो महीपालो ॥९०२॥
पुच्छइ पहाणपुरिसे, जं सोपारयनिवो न दंसेइ । भत्तिं वा सत्तिं वा, तं नाऊणं कहह तुरियं ॥ ९०३ ॥
नाऊण तेहिं कहियं, नरनाहो नाम इत्थ अत्थि महसेणो । तारा य तस्स देवी, तक्कुच्छिसमुब्भवा एगा ॥९०४॥

हु इति पादपूरणे, स-श्रीपालोऽपि आगच्छन् स्थाने स्थाने नरेन्द्रवृन्दैः-नृपसमूहैर्बहुविधैः-अनेकप्रकारैः 'भिट्टणएहिं' ति ढौकनैः 'भिट्टिज्जइ' त्ति ढौक्यते, कीदृशैर्नरेन्द्रवृन्दैः? लब्धमानैः लब्धो मानः-सन्मानो येस्ते तैः ॥ ९०१ ॥ धावं चलन् क्रमेण सोपारके नगरे सम्प्राप्तस्तत्र 'परिसरमहीए' त्ति पुरपार्श्ववर्त्तिभूमौ स श्रीपालो महीपालो राजा ससैन्यः-सैन्यसहितः आवासितो-निवासं कृतवान्, उत्तीर्ण इत्यर्थः ॥ ९०२ ॥ अथ श्रीपालो राजा प्रधानपुरुषान् पृच्छति- सोपारकपुरस्य नृपो-राजा यत् भक्तिं वा-प्रसादनां शक्तिं वा-सामर्थ्यं न दर्शयति, तत् ज्ञात्वा त्वरितं-शीघ्रं यूयं कथयत ॥ ९०३ ॥ तैः प्रधानपुरुषैस्तत्स्वरूपं ज्ञात्वा राज्ञोऽग्रे कथितं- हे महाराज ! अत्र-नगरे महासेनो नाम नरनाथो-राजाऽस्ति, च - पुनः तस्य राज्ञस्तारा नाम देवी-राज्ञी अस्ति, तत्कुक्षिसम्भवा-तस्याः कुक्षेरुत्पन्ना एका ॥ ९०४ ॥

For Private and Personal Use Only

तिजयसिरितिलयभूया, धूया सिरितिलयसुंदरीनामा । अज्जेव कहवि दुट्ठेण दीहपिट्ठेण सा दट्ठा ॥९०५॥
विहिया बहुप्पयारा, उवयारा मंतओसहिमणीहिं । तहवि न तीए सामिअ !, कोऽवि हु जाओ गुणविसेसो ॥९०६॥
तेण महादुक्खेणं, पीडियहियओ नरेसरो सो उ । नो आगओऽत्थि इत्थं, अपसाओ नेव कायव्वो ॥९०७॥
राया भणेइ सा कत्थ ? अत्थि दंसेह मज्झ झत्ति तयं । जेणं किज्जइ कोऽवि हु, उवयारो तीइ कन्नाए ॥९०८॥
एवं चेव भणंतो, नरनाहो तुरयरयणमारुहिउं । जा जाइ पुराभिमुहं, ता दिट्ठो बहुजणसमूहो ॥९०९॥

श्रीतिलकसुन्दरीनामा पुत्री अस्ति, कीदृशी सा ?-त्रिजगच्छ्रियः-त्रैलोक्यलक्ष्म्याः शिरसि तिलकभूता-तिलकसदृशी सा तिलकसुन्दरी कन्याऽद्यैव कथमपि-केनापि प्रकारेण दुष्टेन दीर्घपृष्ठेन-सर्पेण दष्टा ॥ ९०५ ॥ मन्त्रौषधिमणिभिर्मन्त्रैः औषधिभिर्मणिभिश्चेत्यर्थः, बहुप्रकारा उपचारा विहिता-कृताः, तथापि हे स्वामिन् ! तस्याः कन्यायाः हु इति निश्चयेन कोऽपि गुणविशेषो न जातः ॥ ९०६ ॥ तेन महादुःखेन पीडितं हृदयं यस्य स एवम्भूतः स तु नरेश्वरो-राजा नो आगतोऽस्ति, अत्र अप्रसादो नैव कर्त्तव्यः-अप्रसन्नता न कार्येत्यर्थः ॥ ९०७ ॥ तदा राजा श्रीपालो भणति, सा कन्या कुत्राऽस्ति ? झटिति-शीघ्रं मह्यं तां-कन्यां दर्शयत येन तस्याः कन्यायाः कोऽपि उपचारो-विषनिराकरणोपायः क्रियते ॥ ९०८ ॥ एवम्-अमुना प्रकारेण भणन्-कथयन् एव नरनाथो-राजा श्रीपालस्तुरगरत्नम्- अश्वरत्नमारुह्य यावत् पुराभिमुखं-नगरसम्मुखं याति तावद् बहूनां जनानां-लोकानां समूहो दृष्टः ॥ ९०९ ॥

नायं च नरवरेणं, नूणं सा आणिया मसाणंमि । तहवि हु पिच्छामि तयं, सा हु जियंती कहवि हुज्जा ॥९१०॥
एवं च चिंतयंतो, पत्तो सहसत्ति तत्थ नरनाहो । पभणेइ इक्कवारं, मह दंसह झत्ति तं दट्ठुं ॥ ९११ ॥
भणियं च तेहिं नरवर !, किं दंसिज्जइ मयाइ बालाए ? । अम्हाणं सव्वस्सं, अवहरियं अज्ज हय विहिणा ॥९१२॥
राया भणेइ भो ! भो !, अहिदट्ठा मुच्छिया मयसरिच्छा । दीसंति तहवि तेसिं, जहा तहा दिज्जइ न दाहो ॥९१३॥
तो तेहि दंसिया सा, चियासमीवंमि महियले मुक्का । कंठट्ठिअहारेणं, रन्ना करवारिणा सित्ता ॥ ९१४ ॥

च - पुनः नरवरेण-राज्ञा ज्ञातं नूनं-निश्चयेन सा कन्या स्मशाने आनीता दृश्यते इति शेषः, तथापि तां प्रेक्षे-पश्यामि सा कथमपि जीवन्ती भवेत्, द्वौ हुशब्दौ वाक्यालङ्कारे पादपूरणे वा ॥ ९१० ॥ एवं च चिन्तयन् नरनाथो-राजा सहसेति-सद्यस्तत्र प्राप्तः सन् प्रभणति-प्रकर्षेण कथयति, भो लोकाः ! तां सर्पदष्टां कन्यामेकवारं झटिति-शीघ्रं मह्यं दर्शयत ॥ ९११ ॥ तैश्च भणितं-कथितं हे नरवर ! मृतायाः बालायाः किं दर्श्यते ? हतेति खेदे, अद्य विधिना-दैवेन अस्माकं सर्वस्वमपहृतम् ॥ ९१२ ॥ राजा भणति, भो भो लोका ! अहिना-सर्पेण दष्टाः पुरुषाः मूर्च्छिताः सन्तो मृतसदृक्षा-मृतसदृशा दृश्यन्ते, तथापि तेषां-सर्पदष्टानां यथा तथा-येन तेन प्रकारेण दाहो न दीयते ॥ ९१३ ॥ ततस्तैः पुरुषैः सा कन्या दर्शिता, कीदृशी सा ?- चितायाः समीपे महीतले-पृथ्वीतले मुक्ता, तदा कण्ठे स्थितो हारो यस्य स तेन राज्ञा करवारिणा-स्वहस्तजलेन सिक्ता ॥ ९१४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तक्कालं सा बाला, सुत्तविबुद्धुव्व उट्ठिया झत्ति । विम्हियमणा य जंपइ ताय ! किमेसो जणसमूहो ? ॥९१५॥
महसेणो साणंदो, पभणइ वच्छे ! तुमं कओ आसि ? । जइ एस महाराओ, नागच्छिज्जा कयपसाओ ॥९१६॥
एएणं चिय दिन्ना, तुह पाणा अज्ज परमपुरिसेणं । जेण चियाओ उत्तारिऊण उट्ठावियासि तुमं ॥९१७॥
तो तीए साणंदं, दिट्ठो सो समणसायरससंको । सिरिपालो भूवालो, सिणिद्धमुद्धेहिं नयणेहिं ॥ ९१८ ॥
महसेणो भणइ निवं, अम्हं तुम्हेहिं जीविअं दिन्नं । तो जीविआओ अहियं, एयं गिण्हेह तुज्झेवि ॥९१९॥

ततः सा बाला सुप्ता सती विबुद्धा-जागृता इव तत्कालमुत्थिता, च- पुनः विस्मितम्-आश्चर्ययुक्तं मनो यस्याः सा विस्मितमनाः सती झटिति-शीघ्रं जल्पति, हे तात ! एष जनसमूहः किं ?, किमर्थमित्यर्थः ॥ ९१५ ॥ महासेनो राजा सानन्दः-सहर्षः सन् प्रभणति-वक्ति, हे वत्से-हे पुत्रि ! यदि एष महाराजो नागच्छेत् तर्हि त्वं कुत्र आसीत् ?, कीदृश एषः ? कृतः प्रसादः-अनुग्रहो येन सः कृतप्रसादः ॥ ९१६ ॥ एतेनैव परमपुरुषेण-उत्तमपुरुषेण अद्य तुभ्यं प्राणा दत्ताः येन चितातः-चित्याया उत्तार्य त्वमुत्थापिताऽसि-ऊर्ध्वीकृताऽसि ॥ ९१७ ॥ ततः-तदनन्तरं तया-राजकन्यया सानन्दं-सहर्षं यथा स्यात्तथा स श्रीपालो भूपालः स्निग्धमुग्धाभ्यां-सस्नेहरम्याभ्यां नयनाभ्यां दृष्टः, कीदृशः सः ?-स्वमन एव सागरः-समुद्रस्तत्र शशाङ्कः-चन्द्र इव स्वमनःसागर शशाङ्कस्तदुल्लासकत्वादिति भावः ॥ ९१८ ॥ अथ महासेनो राजा नृपं-श्रीपालं भणति, युष्माभिरस्मभ्यं जीवितं दत्तं, ततः-तस्मात्कारणात् जीवितादप्यधिकामेतां मत्पुत्रीं यूयमपि गृह्णीत ॥ ९१९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इअ भणिऊणं रन्ना, नियकन्ना तस्स रायरायस्स । दिन्ना सा तेणावि हु, परिणीआ झत्ति तत्थेव ॥९२०॥
तीए अ तिलयसुन्दरि -सहियाओ ताउ अट्ठ मिलियाओ । सिरिपालस्स पिआओ, मणोहराओ परं तहवि ॥ ९२१
जह अट्ठदिसाहिं अलंकिओऽवि मेरू सरेइ उदयसिरिं । जह वंछइ जिणभत्तिं, अडग्गमहिसीजुओऽवि हरी ॥९२२॥
अवि अट्ठदिट्ठिसहिओ, जहा सुदिट्ठी समीहए विरइं । साहू जहऽट्ठपवयणमाइजुओवि हु सरइ समयं ॥९२३॥

इति भणित्वा-उक्त्वा महासेनेन राज्ञा तस्मै राजराजाय-महाराजाय निजकन्या दत्ता, राज्ञां राजा राजराजस्तस्मै इति विग्रहः, तेन श्रीपालमहाराजेनापि झटिति-शीघ्रं तत्रैव स्थाने सा परिणीता ॥ ९२० ॥ तया च तिलकसुन्दर्या सहिता मनोहराः-सर्वजनमनोहारिण्यस्ताः श्रीपालस्य प्रिया अष्ट मिलिताः, परं तथापि स राजा नवमीं प्रियां स्मरतीत्युत्तरेण सम्बन्धः ॥ ९२१ ॥ कः कामिवेत्याह- यथाऽष्टदिशाभिः-पूर्वादिभिरलङ्कृतोऽपि-शोभितोऽपि मेरुः-सुरगिरिः उदयश्रियं-सूर्योदयलक्ष्मीं स्मरति, पुनर्यथा अष्टाभिरग्रमहिषीभिः-इन्द्राणीभिर्युतोऽपि-सहितोऽपि हरिः-इन्द्रो जिनभक्तिं वाञ्छति ॥ ९२२ ॥ पुनर्यथाऽष्टदृष्टिभिर्मित्रा १ तारा २ बला ३ दीप्रा ४ स्थिरा ५ कान्ता ६ प्रभा ७ परा ८ नामभिः सहितोऽपि सुदृष्टिः-सम्यग्दृष्टिरात्मा विरतिं सावद्ययोगविरमणरूपां समीहते-वाञ्छति, अष्टदृष्टिस्वरूपं तु योगदृष्टिसमुच्चयाज्ज्ञेयम्, पुनर्यथा अष्टप्रवचनमातृभिः-समितिपञ्चकगुप्तित्रयरूपाभिर्युतोऽपि साधुः हु इति निश्चितं समतां-समभावरूपां स्मरति ॥ ९२३ ॥

For Private and Personal Use Only

जह जोई अट्ठमहासिद्धिसमिद्धोऽवि ईहए मुत्तिं । तह झायइ पढमपिअं, अट्ठपियाहिं स सहिओऽवि ॥९२४॥
तो तीए उक्कंठियचित्तो जणणीइ नमणपवणो य । सो सिरिपालो राया, पयाणढक्काओ दावेइ ॥९२५॥
मग्गे हयगयरहभड-कन्नामणिरयणसत्थवत्थेहिं । भिट्टिज्जइ सो राया, पए पए नरवरिंदेहिं ॥ ९२६ ॥
एवं ठाणे ठाणे, सो बहुसेणाविवड्ढियबलोहो । महिवीढे नइवड्ढियनीरो उयहिव्व वित्थरइ ॥ ९२७ ॥

पुनः यथा योगी-ज्ञानदर्शनचारित्रात्मकयोगयुक्तः पुमान् अष्टमहासिद्धिभिरणिमादिभिः समृद्धोऽपि मुक्तिं-निर्वाणात्मिकां ईहते-वाञ्छति, तथा-तेन प्रकारेण स श्रीपालोऽष्टप्रियाभिः सहितोऽपि प्रथमप्रियां मदनसुन्दरीं ध्यायति-निरन्तरं हृदि स्मरति ॥ ९२४ ॥ ततः-तदनन्तरं तस्यां मदनसुन्दर्यां तन्मिलने इत्यर्थः उत्कण्ठितम्-औत्सुक्ययुक्तं चित्तं -मनो यस्य स तथोक्तः च - पुनर्जनन्या-मातुर्नमने-नमस्करणे प्रवणः-तत्परः स श्रीपालो राजा प्रयाणढक्काः-प्रस्थानयशःपटहान् दापयति ॥ ९२५ ॥ स श्रीपालो राजा मार्गे पदे पदे नरवरेन्द्रैः हयादिभिः 'भिट्टिज्जइ' त्ति ढौक्यते, हया गजा रथा भटाः कन्याश्च प्रतीताः, मणयः-चन्द्रकान्ताद्या रत्नानि-माणिक्यादीनि शस्त्राणि वस्त्राणि च बहुविधानि तैरित्यर्थः, क्वचित्कन्नास्थाने 'कंचणत्ति' पाठस्तत्र काञ्चनं-सुवर्णमित्यर्थः ॥ ९२६ ॥ एवम्-अमुना प्रकारेण स श्रीपालो राजा स्थाने स्थाने बहुसेनया विवर्द्धितो बलौघः-सैन्यसमूहो यस्य स एवम्भूतः सन् महीपीठे विस्तरति-विस्तारं प्राप्नोति, क इव ?-नदीभिर्वर्द्धितं नीरं पानीयं यस्य स एवम्भूत उदधिः-समुद्र इव, यथा भूपीठे विस्तरति तथेत्यर्थः ॥ ९२७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मरहट्ठय- सोरट्ठय -सलाडमेवाडपमुहभूवाले । साहंतो सिरिपालो, मालवदेसं समणुपत्तो ॥ ९२८ ॥
तं परचक्कागमणं, सोऊणं चरमुहाओ अइगरुयं । सहसत्ति मालविंदो, भयभीओ होइ गढसज्जो ॥९२९॥
कप्पडचुप्पडकणतिणजलइंधणसंगहा य किज्जंति । सज्जिज्जंति अ जंता, तह सज्जिज्जंति वरसुहडा ॥९३०॥
एवं सा उज्जेणी, नयरी बहुजणगणेहिं संकिन्ना । परिवेढिया समंता, तेणं सिरिपालसिन्नेणं ॥ ९३१ ॥

महाराष्ट्रसौराष्ट्रलाटसहितमेदपाटप्रमुखा देशविशेषास्तेषां ये भूपाला राजानस्तान् साधयन् श्रीपालो मालवदेशं सं-सम्यक् प्रकारेण अनुप्राप्तः ॥ ९२८ ॥ मालवस्येन्द्रो-मालवेन्द्रः प्रजापालो राजा चरमुखात्-हेरिकमुखात् अतिगुरुकम्-अतिमहत् तत्परचक्रागमनं-परसैन्यागमनं श्रुत्वा सहसा इति-अकस्मात् भयभीतः सन् दुर्गसज्जो भवति, दुर्गं सज्जीकृत्य स्थितवानित्यर्थः ॥ ९२९ ॥ तथाहि-'कप्पड' त्ति वस्त्राणि 'चुप्पड' त्ति घृतादि कणा-धान्यानि तृणानि-घासादीनि जलं-पानीयम् इन्धनानि-ज्वालनकाष्ठादीनि तेषां सङ्ग्रहाः क्रियन्ते, च - पुनः यन्त्राणि-शतघ्न्यादीनि सज्ज्यन्ते-सज्जीक्रियन्ते, तथा वरसुभटाः-प्रधानशूरपुरुषाः प्रशस्यन्ते ॥ ९३० ॥ एवम्-अमुना प्रकारेण सा उज्जयिनीनगरी बहूनां जनानां-लोकानां गणैः-समूहैः सङ्कीर्णा सती तेन श्रीपालसैन्येन समन्तात्-सर्वासु दिक्षु परिवेष्टिता ॥ ९३१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आवासिए अ सिन्ने, रयणीए पढमजामसमयंमि । हारपभावेण सयं, राया जणणीगिहं पत्तो ॥९३२॥
आवासदुवारि ठिओ, सिरिपालनरेसरो सुणइ ताव । कमलप्पभा पयंपइ, वहुअं पइ एरिसं वयणं ॥९३३॥
वच्छे ! परचक्केणं, नयरी परिवेढिया समंतेणं । हल्लोहलिओ लोओ, किं किं होही न याणामि ? ॥ ९३४ ॥
वच्छस्स तस्स देसंतरंमि पत्तस्स वच्छरं जायं । वच्छे ! कावि न लब्भइ, अज्जवि सुद्धी तुह पियस्स ॥९३५॥
पभणेइ तओ मयणा, मा मा मा माइ ! किंपि कुणसु भयं । नवपयझाणंमि मणे, ठियंमि जं हुंति न भयाइं ॥९३६॥

सैन्ये च आवासिते-यथास्थानमुत्तीर्णे सति रजन्यां-रात्रौ प्रथमयामसमये-आद्यप्रहरकाले राजा श्रीपालो हारप्रभावेण स्वयम्-आत्मना जनन्या-मातुर्गृहं प्राप्तः ॥ ९३२ ॥ श्रीपालनरेश्वर आवासस्य-मातुर्गृहस्य द्वारे स्थितः-ऊर्ध्वः सन् यावत् श्रुणोति तावत् कमलप्रभा-स्वमाता वधूं-मदनसुन्दरीं प्रति ईदृशं-वक्ष्यमाणं वचनं प्रजल्पति-कथयति, कीदृशमित्याह ॥ ९३३ ॥ हे वत्से ! परचक्रेण-परसैन्येन नगरी समन्तेन-सर्वासु दिक्षु परिवेष्टिताऽस्ति, लोकः सर्वोऽपि हल्लोहलितो-व्याकुलीभूतोऽस्ति, अनुकरणशब्दोऽयं, अथ किं ? किं ? भविष्यतीति न जानामि ॥ ९३४ ॥ तस्य वत्सस्य-मत्पुत्रस्य देशान्तरे प्राप्तस्य वत्सरम्-एकं वर्षं जातं, हे वत्से ! अद्यापि तव प्रियस्य-त्वद्भर्त्तुः कापि शुद्धिर्न लभ्यते, उदन्तलेशोऽपि न लब्धः इत्यर्थः ॥ ९३५ ॥ ततः-तदनन्तरं मदनसुन्दरी प्रकर्षेण भणति, हे मातर्मा मा मा किमपि भयं कुरुष्व, यद्-यस्मात्कारणात् नवपदध्याने मनसि स्थिते सति भयानि न भवन्ति ॥ ९३६ ॥

For Private and Personal Use Only

जं अज्जं चिय संझासमए मह जिणवरिंदपडिमाओ । पूयंतीए जाओ, कोइ अउव्वो सुहो भावो ॥९३७॥
तेणं चिअ अज्जवि मह, मणंमि नो माइ माइ ! आणंदो । निक्कारणं सरीरे, खणे खणे होइ रोमंचो ॥९३८॥
अन्नं च मज्झ वामं, नयणं वामो पओहरो चेव । तह फंदइ जह मन्ने, अज्जेव मिलेइ तुह पुत्तो ॥ ९३९ ॥
तं सोऊणं कमलप्पभावि आणंदिआ भणइ जाव । वच्छे ! सुलक्खणा तुह, जीहा एअं हवउ एवं ॥९४०॥
ताव सिरिपालराया, पियाइ धम्मंमि निच्चलमणाए । नाऊण सच्चवयणं, बारं बारंति जंपेइ ॥ ९४१ ॥

पुनरद्यैव सन्ध्यासमये जिनवरेन्द्रप्रतिमाः पूजयन्त्या मम यतः कोऽपि अपूर्वः शुभभावो-अध्यवसायो जातः-समुत्पन्नः ॥ ९३७ ॥ तेनैव हे मातः ! अद्यापि मम मनसि आनन्दो-हर्षो न माति, तथा क्षणे क्षणे शरीरे निष्कारणं-कारणं विनैव रोमाञ्चो-रोमोद्गमो भवति ॥ ९३८ ॥ अन्यच्च मम वामं-दक्षिणेतरं नयनं-नेत्रं वाम एव च पयोधरः-स्तनस्तथा स्पन्दते-स्फुरति यथा अद्यैव तव पुत्रो मिलति, अहमिति मन्ये-जानामि ॥ ९३९ ॥ तद्वधूवचनं श्रुत्वा कमलप्रभापि आनन्दिता-हर्षिता सती यावद् भणति-वक्ति, किं भणतीत्याह- हे वत्से ! तव जिह्वा सुलक्षणाऽस्ति, एतत् एवं भवतु इति ॥ ९४० ॥ तावत् श्रीपालो राजा धर्म्मे निश्चलं मनो यस्याः सा तस्याः प्रियायाः-स्वपत्न्याः सत्यवचनं ज्ञात्वा द्वारं द्वारमिति जल्पति ॥ ९४१ ॥

कमलप्पभा पयंपइ, नूणमिणं मज्झ पुत्तवयणंति । मयणावि भणइ जिणमयवयणाइं किमन्नहा हुंति ? ॥९४२॥
उग्घाडियं दुवारं, सिरिपालो नमइ जणणिपयजुयलं । दइअं च विणयपउणं, संभासइ परमपिम्मेणं ॥९४३॥
आरोविऊण खंधे, जणणिं दइअं च लेवि हत्थेण । हारप्पभावउच्चिय, पत्तो नियगुड्डरावासं ॥ ९४४ ॥
तत्थ य जणणिं पणमित्तु, नरवरो भद्दासणे सुहनिसन्नं । पभणेइ माय ! तुह पयपसायजणियं फलं एयं ॥९४५॥

तदा कमलप्रभा-नृपमाता प्रकर्षेण कथयति नूनं-निश्चितमिदं मम पुत्रस्य वचनमिति, ततो मदनसुन्दर्यपि भणति, जिनमतानां-जिनमतसेवकानां वचनानि किमन्यथा भवन्ति-असत्यानि भवन्ति ?, न भवन्त्येवेत्यर्थः, अभेदोपचारात् जिनमतशब्देन तत्सेवका गृह्यन्ते ॥ ९४२ ॥ ततो द्वारमुद्घाटितं तदा श्रीपालो राजा जनन्या-मातुः पदयुगलं-चरणद्वयं नमति, च - पुनर्विनये-विनयकरणे प्रवणां-तत्परां दयितां-प्रियां मदनसुन्दरीं परमप्रेम्णा-उत्कृष्टस्नेहेन सम्भाषयति ॥ ९४३ ॥ ततः श्रीपालो जननीं-स्वमातरं स्कन्धे आरोप्य च - पुनः दयितां-स्त्रियं हस्तेन लात्वा-गृहीत्वा हारप्रभावत एव निजगुड्डरावासं-स्वकीयपटावासं प्राप्तः ॥ ९४४ ॥ तत्र च पटावासे नरवरो राजा श्रीपालो भद्रासने-सिंहासनविशेषे सुखेन निषण्णाम्-उपविष्टां जननीं प्रणम्य-नमस्कृत्य प्रभणति-वक्ति, किं भणतीत्याह- हे मातस्तव पदप्रसादजनितं-त्वच्चरणप्रसादादुत्पन्नमेतत्फलमस्ति ॥ ९४५ ॥

पणमंति तओ ताओ, अट्ठ ण्हुहाओ ससासुयाइ पए । अवि मयणसुंदरीए, जिट्ठिए निययभइणीए ॥९४६॥
अभिणंदियाउ ताओ, ताहिं आणंदपूरियमणाहिं । सव्वोवि हु वुत्तंतो, मयणमंजूसाइ कहिओ अ ॥९४७॥
तासिं च नवण्हंपि हु, वत्थालंकारसारपरिवारं । देइ निवो साणंदो, इक्किक्कं नाडयं चेव ॥ ९४८ ॥
पुट्ठा जिट्ठा मयणा, तुह जयणंपि हु कहं अणावेमि ? । तीए वुत्तं सो एउ कंठपीठट्ठियकुहाडो ॥९४९॥
तं च तहा दूयमुहेण तस्स रन्नो कहावियं जाव । ताव कुविओ अ मालवराया मंतीहिं भणिओ य ॥९५०॥

ततः-तदनन्तरं ता अष्ट स्नुषाः-पुत्रस्य वध्वः स्वश्वश्रूवाः-निजभर्तृमातुः पदौ-चरणौ प्रणमति, तथा ज्येष्ठाया-बृहत्या निजकभगिन्या-मदनसुन्दर्या अपि पदौ प्रणमन्ति ॥ ९४६ ॥ ताभ्यां-श्वश्रूमदनासुन्दरीभ्यां ता अष्टापि अभिनन्दिताः-आशिषा सानन्दाः कृताः, कीदृशीभ्यां ताभ्याम् ?-आनन्देन पूरितं मनो ययोस्ते आनन्दपूरितमनस्यौ ताभ्यां, च - पुनर्मदनमञ्जूषया-विद्याधरराजपुत्र्या सर्वोऽपि प्राक्तनो वृत्तान्तः कथितः ॥ ९४७ ॥ ततो नृपः सानन्दः सन् ताभ्यो नवभ्योऽपि वधूभ्यो वस्त्रालङ्कारसारपरिवारं ददाति, च - पुनरेकैकं नाटकं ददाति ॥ ९४८ ॥ ततो राज्ञा ज्येष्ठा मदना-मदनसुन्दरी पृष्टा-तव जनकमपि कथं-केन प्रकारेण आनाययामि ?, तदा तया उक्तं- हे स्वामिन् ! स मत्पिता कण्ठपीठे स्थितः कुठारो यस्य स एवम्भूत एतु-आगच्छतु ॥ ९४९ ॥ तच्च वाक्यं तथा-तेन प्रकारेण तस्मै राज्ञे दूतमुखेन यावत्कथापितं तावत् मालवस्य राजा-प्रजापालः कुपितश्च मन्त्रिभिर्भणितश्च, द्वौ चकारौ तुल्यकालं सूचयतः ॥ ९५० ॥

सामिअ ! असमाणेणं, समं विरोहो न किज्जए कहवि । ता तुरिअं चिय किज्जउ वयणं दूयस्स भणियमिणं ॥९५१॥
काऊणं च कुहाडं, कंठे राया पभायसमयंमि । मंतिसामंतसहिओ, जा पत्तो गुड्डरदुवारे ॥ ९५२ ॥
ताव सिरिपालरन्ना, मोआवेऊण तं गलकुहाडं । पहिराविऊण वत्थालंकारे सारपरिवारो ॥ ९५३ ॥
आणाविओ अ मज्झे, दिन्ने य वरासणंमि उवविट्ठो । सो पयपालो राया, मयणाए एरिसं भणिओ ॥९५४॥
ताय ! तए जो तइया, मह कम्मसमप्पिओ वरो कहिओ । तेणऽज्ज तुह गलाओ, कुहाडओ फेडिओ एसो ॥९५५॥

किमुक्तमित्याह- हे स्वामिन् ! असमानेन-स्वतोऽधिकेन समं-सह विरोधः कथमपि-केनापि प्रकारेण न क्रियते, तत्-तस्मात्कारणात् त्वरितं-शीघ्रमेव इदं-दूतेन भणितं वचनं क्रियताम् ॥ ९५१ ॥ ततश्च प्रभातसमये कण्ठे कुठारं कृत्वा मन्त्रिभिरमात्यैः सामन्तैश्च सहितो राजा यावत् गुड्डरद्वारे-पटावासद्वारे प्राप्तः ॥ ९५२ ॥ तावत् श्रीपालेन राज्ञा तं-कण्ठकुठारं मोचयित्वा-त्याजयित्वा वस्त्रालङ्कारान्-प्रधानवस्त्रभूषणानि परिधाप्य सारः परिवारो यस्य स सा० सारपरिवारसहित इत्यर्थः ॥ ९५३ ॥ मध्ये-पटावासमध्ये च आनायितः, दत्ते च वरासने-प्रधानासने उपविष्टः, एवम्भूतः स प्रजापालो राजा मदनसुन्दर्य्या ईदृशं भणित-उक्तः ॥ ९५४ ॥ किमित्याह- हे तात ! त्वया तदा-मत्पाणिग्रहणावसरे यो मत्कर्मसमर्पितो - मम कर्मणा आनीतो वरः कथितस्तेन मद्भर्त्राऽद्य तव गलात्-त्वत्कण्ठात् एष कुठारकः स्फेटितः-त्याजितः ॥ ९५५ ॥

तो विम्हिओ अ मालवराया जामाउअंपि पणमेइ । पभणेइ अ सामि ! तुमं, महप्पभावोऽवि नो नाओ ॥९५६॥
सिरिपालोऽवि नरिंदो, पभणइ न हु एस मह पभावोत्ति । किंतु गुरुवइट्ठाणं, एस पसाओ नवपयाणं ॥९५७॥
सोऊण तमच्छरियं, तत्थेव समागओ समग्गोऽवि । सोहग्गसुंदरीरुप्पसुंदरीपमुहपरिवारो ॥ ९५८ ॥
मिलिए य सयणवग्गे, आणंदभरे य वट्टमाणे अ । सिरिपालेणं रन्ना, नाडयकरणं समाइट्ठं ॥ ९५९ ॥
तो झत्ति पढमनाडयपेडयमाणंदिअं समुट्ठेइ । परमिक्का मूलनडी, बहुंपि भणिआ न उट्ठेइ ॥ ९६० ॥

ततश्च विस्मितो-विस्मयं प्राप्तो मालवस्य राजा-प्रजापालो जामातरमपि श्रीपालं प्रणमति-नमस्करोति, च - पुनः प्रभणति-वक्ति, हे स्वामिन् ! महान्प्रभावो यस्य स महाप्रभावोऽपि त्वं मया न ज्ञातः, श्रीपालोऽपि नरेन्द्रः प्रभणति, एष मम प्रभावो न हि अस्तीति, किन्तु गुरूपदिष्टानां नवपदानामेष प्रसादोऽस्ति ॥ ९५७ ॥ तत् आश्चर्यं श्रुत्वा सोभाग्यसुन्दरीप्रमुखः समग्रोऽपि-समस्तोऽपि परिवारस्तत्रैव-राजपटमण्डपे समागतः ॥ ९५८ ॥ अथ स्वजनानां-सम्बन्धिनां वर्गे-समूहे च मिलिते सति आनन्दभरे-हर्षोत्कर्षे च वर्त्तमाने सति श्रीपालेन राज्ञा नाटककरणं समादिष्टं, नाटककरणाज्ञा दत्तेत्यर्थः ॥ ९५९ ॥ ततः-तदनन्तरं झटिति-शीघ्रं प्रथमनाटकस्य पेटकं-वृन्दमानन्दितं-हर्षितं सन् समुत्तिष्ठति, परमेका मूलनटी-मुख्यनर्त्तकी बहुभणितापि-बहूक्तापि न उत्तिष्ठति ॥ ९६० ॥

कह कहवि पेरिऊणं, जाव समुट्ठाविया निरुच्छाहा । तो तीए सविसायं, दूहयमेगं इमं पढियं ॥ ९६१ ॥
कहिं मालव कहिं संखउरि, कहिं बब्बर कहिं नट्ट । सुरसुंदरि नच्चावियइ, दइविहिं दलवि मरट्ट ॥ ९६२ ॥
तं वयणं सोऊणं जणणीजणयाइसयलपरिवारो । चिंतेइ विम्हियमणो, एसा सुरसुंदरी कत्तो ? ॥ ९६३ ॥
उवलक्खिया य जणणीकंठंमि विलग्गिऊण रोयंती । जणएणं सा भणिआ, को वुत्तंतो इमो वच्छे ? ॥९६४॥
भणिअं च तओ तीए, ताय ! तया तारिसीइ रिद्धीए । सहिया निएण पइणा, संखपुरिपरीसरं पत्ता ॥९६५॥

निर्गत उत्साहो यस्याः सा निरुत्साहा मूलनटी कथं कथमपि प्रेरयित्वा यावत् समुत्थापिता तावत्तया-मूलनट्या सविषादं-विषादसहितमिदमेकं दोहानामकं छन्दः पठितम् ॥ ९६१ ॥ किमिदमित्याह- क्व ? मालवाख्यो देशः यत्र जन्माभूत्, क्व शङ्खपुरीनगरी ? यत्र परिणायिता, क्व बर्ब्बरदेशो ? यत्र विक्रीता, क्व नृत्यं ? -लोकानां पुरो नृत्यकरणं ? दैवेन मरट्टत्ति गर्वं दलयित्वा सुरसुन्दरी नर्त्यते-नृत्यं कार्यते ॥ ९६२ ॥ तद्वचनं श्रुत्वा जननीजनकादिसकलपरिवारो विस्मितम्-आश्चर्यं प्राप्तं मनो यस्य स विस्मितमनाः सन् चिन्तयति- एषा सुरसुन्दरी कुतः समागता ? ॥ ९६३ ॥ उपलक्षिता-सर्वैर्ज्ञाता च सती जनन्याः कण्ठे विलग्य रुदन्ती-रोदनं कुर्वती सा-सुरसुन्दरी जनकेन-पित्रा भणिता-उक्ता हे वत्सेऽयं को वृत्तान्तोऽस्तीति ? ॥ ९६४ ॥ ततश्च-तदनन्तरं च तया-सुरसुन्दर्या भणितं, हे तात ! तदा-तस्मिन्नवसरेऽहं निजेन-स्वकीयेन पत्या-भर्त्रा सहिता तादृश्या ऋद्ध्या शङ्खपुर्याः 'परिसर' न्ति पार्श्वदेशं प्राप्ता ॥ ९६५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुमुहुत्तकए बाहिं, ठिओ अ जामाउओ स तुम्हाणं । सुहडाणं परिवारो, बहुओ अ गओ सगेहेसुं ॥ ९६६॥
रयणीए पुरबाहिं, ठिआण अम्हाण निब्भयमणाणं, । हणि मारित्ति करिंती, पडिआ एगा महाधाडी ॥९६७॥
तो सहसा सो नट्ठो, तुम्हं जामाउओ ममं मुत्तुं । धाडीभडेहिं ताए, सिरीइ सहिया अहं गहिया ॥९६८॥
नीआ य तेहिं नेपालमंडले विक्किआ य मुल्लेणं । गहिआ य सत्थवइणा, एगेणं रिद्धिमंतेणं ॥९६९॥
तेणावि ससत्थेणं, नेऊणं सह बब्बरकुलंमि । महकालरायनयरे, हट्टे धरिऊण विक्किणिया ॥९७०॥

स युष्माकं जामाता सुमुहूर्त्तकृते-शुभमुहूर्त्तार्थं नगर्या बहिः स्थितश्च सुभटानां परिवारश्च बहुकः स्वगेहेषु नगरीमध्ये स्वस्वगृहेषु गतः ॥९६६॥ रजन्यां-रात्रौ पुराद् बहिःस्थितयोर्निर्भयं मनो ययोस्तौ निर्भयमनसौ तयोः आवयोरुपरि 'हणि मारि' इति ध्वनिं कुर्वन्ती एका महाधाटी पतिता ॥९६७॥ ततः-तदनन्तरं स युष्माकं जामाता मां मुक्त्वा-परित्यज्य सहसा-शीघ्रं नष्टः-पलायितः, अहं तया युष्मद्दत्तया श्रिया-लक्ष्म्या सहिता धाटीभटैर्गृहीता ॥९६८ ॥ च - पुनस्तैर्धाटीभटैरहं नेपालमण्डले-नेपालदेशे नीता-प्रापिता मूल्येन विक्रीता च, एकेन ऋद्धिमता सार्थपतिना गृहीता च ॥९६९॥ तेनापि सार्थपतिना स्वसार्थेन सह बर्ब्बरकूले महाकालराजस्य नगरे नीत्वा हट्टे धृत्वा विक्रीता ॥९७०॥

For Private and Personal Use Only

एगाए गणियाए गहिऊणं नट्टगीयनिऊणाए । तह सिक्खविआ य अहं, जह जाया नट्टिया निउणा ॥९७१॥
महकालनामएणं, बब्बरकूलस्स सामिणा तत्तो । नडपेडएण सहिया, गहियाऽहं नाडयपिएणं ॥९७२॥
नाणाविहनट्टेहिं, तेण नच्चाविऊण धूयाए । मयणसेणाइ पइणो, दिन्ना नवनाडयसमेआ ॥९७३॥
तस्स य पुरओ नच्चंतिआइ जायाइं इत्तिअदिणाइं । परमहुणा सकुडुंबं, दट्ठूणं दुक्खमुल्लसियं ॥९७४॥
तइया नियगुरुयत्तं, मयणाइ विडंबणं च दट्ठूणं । जो अ मए मुद्धाए, अखव्वगव्वो कओ आसि ॥९७५॥

नृत्ये गीते च निपुणया एकया गणिकया-वेश्यया गृहीत्वा अहं तथा-तेन प्रकारेण शिक्षिता च यथा-येन प्रकारेण निपुणा-दक्षा नर्तकी जाता ॥९७१॥ ततः-तदनन्तरं महाकालनामकेन बर्ब्बरकुलस्य स्वामिना नटपेटकेन-नटसमूहेन सहिता अहं गृहीता, कीदृशेन महाकालेन?नाटकप्रियेण-नाटकं प्रियं यस्य स तेन ॥९७२॥ तेन राज्ञा नानाविधैः-बहुप्रकारैर्नृत्यैर्नर्त्तयित्वा मदनसेनाया निजपुत्र्याः पत्ये-भर्त्रे नवभिर्नाटकैः समेता-सहिताऽहं दत्ता ॥९७३॥ तस्य च मदनसेनाभर्त्तुः पुरतः-अग्रतो नृत्यन्त्या-नृत्यं कुर्वत्या मम इयन्ति-एतावन्ति दिनानि जातानि, परमधुना-साम्प्रतं स्वकुटुम्बं दृष्ट्वा स्थिताया मम दुःख-मुल्लसितम् ॥९७४॥ तदा-पाणिग्रहणावसरे निजगुरुकत्वं-स्वमहत्त्वं च पुनर्मदनाया-मदनसुन्दर्या विडम्बनां दृष्ट्वा मया मुग्धया-मूढया यश्च अखर्वगर्वो-महानहङ्कारः कृतः आसीत् ॥९७५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं भञ्जिऊण मयणा - पइणो नरनाहनमियचलणस्स । जेणाहं दासत्तं, कराविया तं जयइ कम्मं ॥९७६॥
इक्कच्चिय मह भइणी, मयणा धन्नाण धूरि लहइ लिहं । जीए निम्मलसीलं, फलियं एयारिसफलेहिं ॥९७७॥
कयपावाण जियाणं, मज्झे पढमा अहं न संदेहो । कुलसीलवज्जियाए, चरियं एयारिसं जीए ॥९७८॥
मयणाए जिणधम्मो, फलिओ कप्पदुमुव्व सुफलेहिं । मह पुण मिच्छाधम्मो, जाओ विसपायवसरिच्छो ॥९७९॥

तं गर्व्वं भङ्क्त्वा-चूरयित्वा नरनाथैः-नरेन्द्रैः नतौ चलनौ-पादौ यस्य स तस्य मदनापतेः-मदनसुन्दर्या भर्तुर्दासत्वं येन कर्मणाऽहं कारिता तत्कर्म जयति-सर्वोत्कर्षेण वर्त्तते ॥९७६॥ धन्यानां-धन्यस्त्रीणां धुरि-आदौ एका मम भगिनी-स्वसा मदना-मदनसुन्दरी एव रेखां लभते-प्राप्नोति, यस्या निर्म्मलशीलमेतादृशैः फलैः फलितम् ॥९७७॥ कृतं पापं यैस्ते कृतपापास्तेषां जीवानां मध्ये प्रथमा- आद्याऽहमस्मि, अत्र न सन्देहः, कथमित्याह- कुलशीलवर्जिताया-उत्तमकुलाचाररहिताया यस्या एतादृशं चरितं-चरित्रं वर्त्तते ॥९७८॥ मदनाया जिनधर्मः कल्पद्रुमः- कल्पवृक्ष इव सुष्ठु-शोभनैः फलैः फलितः, मम पुनर्मिथ्याधर्म्मो-मिथ्यात्वमयो धर्मो विषपादपो-विषवृक्षस्तेन सदृक्षः-सदृशो जातोऽस्ति, दुष्टफलदायकत्वात् ॥९७९॥

For Private and Personal Use Only

मयणा नियकुलउज्जालणिक्कमाणिक्कदीवियातुल्ला । अहयं तु चीडउम्माडियव्व घणजणिअमालिन्ना ॥९८०॥
मयणं दट्ठूण जणा, जएह सम्मत्तसत्तसीलेसु । मं दट्ठूणं मिच्छत्तदप्पकंदप्पभावेसुं ॥९८१॥
इच्चाइ भणंतीए, तीए सुरसुंदरीइ लोआणं । उप्पाइओ पमोओ, जो सो नहु नाडएहिं पुरा ॥९८२॥
सिरिपालेणं रन्ना, वेगेणाणाविओ अ अरिदमणो । सुरसुंदरी य दिन्ना, बहुरिद्धिसमन्निया तस्स ॥९८३॥
सुरसुंदरिसहिएणं, अरिदमणेणावि सुद्धसम्मत्तं । सिरिपालरायमयणापसायओ चेव संपत्तं ॥९८४॥

मदना निजकुलस्य उज्ज्वालने-उज्ज्वलीकरणे प्रकाशने इति यावत् एका-अद्वितीया माणिक्यदिपीकया तुल्या-तत्सदृशी अस्ति, अहकं तु-अहं तु चीडोल्मुके इव निजकुले घनं जनितम् -उत्पादितं मालिन्यं यया सा घनजनितमालिन्याऽस्मि, चीडं-श्यामकाचमयमणिकम् उल्मुकम्-अलातम् उम्बाडेति प्रसिद्धम् ॥९८०॥ अहो जना - लोका ! मदनां दृष्ट्वा सम्यक्त्व१ सत्त्व२ शीलेषु३ यतध्वं-यत्नं कुरुत, सत्त्वं धैर्यमित्यर्थः, मां दृष्ट्वा मिथ्यात्व१ दर्प२ कन्दर्प३ भावेषु-मिथ्यादर्शनमानकामविकारेषु यतध्वम् ॥९८१॥ इत्यादि पूर्वोक्तं भणन्त्या-कथयन्त्या तया-सुरसुन्दर्या लोकानां यः प्रमोदो-हर्ष उत्पादितः स हु इति निश्चितं पुरा-पूर्वं नाटकैर्नोत्पादितः ॥९८२॥ ततः श्रीपालेन राज्ञा वेगेन अरिदमनः कुमार आनायितश्च, सुरसुन्दरी बह्व्या ऋद्ध्या समन्विता-संयुक्ता तस्मै-अरिदमनकुमाराय दत्ता च, द्वौ चकारौ तुल्यकालं सूचयतः ॥९८३ ॥ सुरसुन्दर्या सहितेन अरिदमनेनापि श्रीपालराजमदनसुन्दर्याः प्रसादत एव शुद्धसम्यक्त्वं सम्प्राप्तम् ॥९८४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जे ते कुट्ठियपुरिसा, सत्त सया आसि तेऽवि मयणाए । वयणेण विहियधम्मा, संजाया संति नीरोगा ॥९८५॥
तेवि हु सिरिसिरिपालं, भूवालं पणमयंति भत्तीए । रायावि कयपसाओ, ते सव्वे राणए कुणइ ॥९८६॥
मइसायरोऽवि मंती आगंतूणं नमेइ निवपाए । सोऽवि पुव्वंव रन्ना, कओ अमच्चो सुकयकिच्चो ॥९८७॥
सुसुराण सालयाणं, माउलपमुहाण नरवराणं च । अन्नेसिंपि भडाणं, बहुमाणं देइ सो राया ॥९८८॥
ते सव्वेऽवि बहुभत्तिसंजुया भालमिलियकरकमला । सेवंति सया कालं, तं चिय सिरिपालभूवालं ॥९८९॥

'जे तें' इति देशीभाषायाः ये सप्त शतानि कुष्ठिकपुरुषा आसन् तेऽपि मदनसुन्दर्या वचनेन विहितः-कृतो धर्मो यैस्ते विहितधर्माः सन्तो निरोगाः सञ्जाताः सन्ति ॥९८५॥ तेऽपि सप्तशतपुरुषाः श्रिया युक्तं श्रीपालं भूपालं-राजानं भक्त्या प्रणमन्ति-नमस्कुर्वन्ति, राजा श्रीपालोऽपि कृतः प्रसादो येन स कृतप्रसादः सन् तान् सर्वान् 'राणए' त्ति-राणा इत्याख्यान् करोति, लघुराजान् करोतीत्यर्थः ॥९८६॥ मतिसागरोऽपि मन्त्री आगत्य नृपस्य-श्रीपालस्य पादौ नमति, स मतिसागरोऽपि राज्ञा श्रीपालेन पूर्वमिव-पूर्ववत् अमात्यो-मन्त्री कृतः, कीदृशः सः ? -सुष्ठु-शोभनानि कृतानि कृत्यानि- कार्याणि येन स तथा ॥९८७॥ स श्रीपालो राजा श्वशुरेभ्यः श्यालकेभ्यो-वधूभ्रातृभ्यो मातुलप्रमुखेभ्यो नरवरेभ्यो राजभ्यश्च पुनरन्येभ्योऽपि भटेभ्यो बहुमानं-सत्कारं ददाति ॥९८८॥ ते सर्वेऽपि राजानो बहुभक्त्या संयुताः-सहिताः अत एव भालेषु-ललाटेषु मिलितानि-लग्नानि करकमलानि येषां ते तथाभूताः सन्तः सदा कालं-सर्वस्मिन्काले तमेव श्रीपालभूपालं सेवन्ते ॥९८९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अह अन्नदिणे मइसायरेण सामंतमंतिकलिएणं । विन्नत्तो नरनाहो भूमंडलमिलियभालेणं ॥९९०॥
देव ! तुमं बालोवि हु, पियपट्टे ठाविओऽवि दुट्ठेणं । उट्ठाविओऽसि जेणं, सो तुह सत्तू न संदेहो ॥९९१॥
संतेऽवि हु सामत्थे, जो पिअरज्जंपि सत्तुणा गहिअं । नो मोआवइ सिग्घं, सो लोए होइ हसणिज्जो ॥९९२॥
एसो सामिय ! सयलो, तुम्हाणं ऋद्धिसिन्नवित्थारो । पावेइ किं फलं जइ, न हु लिज्जइ तं निअं रज्जं? ॥९९३॥
ता काऊण पसायं, सामिअ ! गिण्हेह तं निअं रज्जं । जं पिअपट्टनिविट्ठं, पइं दिट्ठे मे सुहं होही ॥९९४॥

अथ-अनन्तरं अन्यस्मिन्दिने सामन्तैर्मन्त्रिभश्च कलितेन-युक्तेन मतिसागरेण मन्त्रिणा नरनाथो-राजा श्रीपालो विज्ञप्तः, कीदृशेन मतिसागरेण ?-भूमण्डले मिलितो-लग्नो भालो-ललाटं यस्य स तेन तथा ॥९९०॥ कथं विज्ञप्त इत्याह-हे देव-हे महाराज! त्वं बालोऽपि पितृपटे स्थापितोऽपि येन दुष्टेन उत्थापितोऽसि स तव शत्रुः-वैरी अस्ति,अत्रार्थे न सन्देहः, ॥९९१॥ सामर्थ्ये सत्यपि हु इति निश्चितं यः पुमान् शत्रुणा-वैरिणा गृहीतं पितृराज्यं-निजजनकराज्यं शीघ्रं-तत्क्षणं नो मोचयति-न त्याजयति स लोके हसनीयो-हसितुं योग्यो भवति ॥९९२॥ हे स्वामिन् ! युष्माकं सकलः-सर्वः एषः-अयं ऋद्धेः सैन्यस्य च विस्तारः किं फलं प्राप्नोति ? निष्फल इत्यर्थः, यदि तत् निजं राज्यं न हि लीयते-न गृह्यते, निजराज्ये गृहीते एव एष सफलतां यातीत्यर्थः ॥९९३॥ तत्-तस्मात्कारणात् हे स्वामिन् ! प्रसादं कृत्वा यूयं निजं-स्वकीयं तत् राज्यं गृह्णीत यत् -यतः कारणात् पइंति-त्वां प्रति पितुः पट्टे निविष्टे-उपविष्टे दृष्टे सति मे-मम सुखं भविष्यति ॥९९४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो पभणइ नरनाहो, अमच्च ! सच्चं तए इमं भणिअं । किंतु उवायचउक्कक्कमेण किज्जंति कज्जाइं ॥९९५॥
जइ सामेणं सिज्झइ, कज्जं ता किं विहिज्जए दंडो ? । जइ समइ सक्कराए, पित्तं ता किं पटोलाए ? ॥९९६॥
तत्तो मंती पभणइ, अहो पहो ! ते वओऽहिआ बुद्धी । गंभीरया समुद्दाहिआ महीओऽहिआ खंती ॥९९७॥
ता पेसिज्जउ एसो, चउरमुहो नाम दिअवरो दूओ । जो दूअगुणसमेओ, अत्थि जए इत्थ विक्खाओ ॥९९८॥

ततः-तदनन्तरं नरनाथो-राजा श्रीपालः प्रभणति, हे अमात्य !-हे मन्त्रिन् ! त्वया इदं सत्यं भणितं,किन्तु उपायानां-सामदामदण्डभेदाख्यानां यच्चतुष्कं तस्य क्रमेण कार्याणि क्रियन्ते ॥९९५॥ यदि साम्ना मधुरवचनेन कार्यं सिध्यति तत्-तर्हि किं-किमर्थं दण्डो विधीयते-क्रियते, अमुमेवार्थमर्थान्तरन्यासेन द्रढयति,पित्तं-रोगविशेषो यदि शर्क्करया - सितोपलया शाम्यति तत्-तर्हि पटोलया-कोशातक्या क्षारवल्ल्या किं ?, न किमपि कार्यमित्यर्थः ॥९९६॥ ततः-तदनन्तरं मन्त्री प्रभणति, अहो इति आश्चर्ये, हे प्रभो ! - हे स्वामिन् ! तव बुद्धिर्वयसोऽधिका वर्त्तते, तव गम्भीरता समुद्रादधिका वर्त्तते, क्षान्तिः -क्षमा महीतः-पृथ्वीतोऽधिकाऽस्ति ॥९९७॥ ततः-तस्मात्कारणात् एष चतुर्मुखो नाम द्विजवरो - ब्राह्मणेषु श्रेष्ठो दूतः प्रेष्यताम्, यश्चतुर्मुखो दूतो गुणैः-वाग्मित्वादिभिः समेतो-युक्तोऽत्र जगति विख्यातः -प्रसिद्धोऽस्ति ॥९९८॥

For Private and Personal Use Only

सो ओअतेअमइबल-कलिओ सम्माणिऊण भूवइणा । संपेसिओ तुरंतो, पत्तो चंपाइ नयरीए ॥९९९॥
तत्थाजिअसेणनरेसरस्स पुरओ पसन्नवयणेहिं । सो दूओ चउरमुहो, एवं भणिउं समाढत्तो ॥१०००॥
नरवर ! तए तया जो, सिरिपालो भायनंदणो बालो । भूवालपयपइट्ठो, दिट्ठो भूभारअसमत्थो ॥१००१॥
तो तं भारं आरोविऊण निअयंमि चेव खंधमि । सयलकलसिक्खणत्थं, जो अ तए पेसिओ आसि ॥१००२॥
सो सयलकलाकुसलो, अतुलबलो सयलरायनयचलणो । चउरंगबलजुओ तुह, लहुअत्तकए इमो एइ ॥१००३॥

ओजो-मानसं बलं तेजो-शरीरप्रतापो मतिः-बुद्धिः बलं-पराक्रमस्तैः कलितो-युक्तः स दूतो भूपतिना-श्रीपालमहाराजेन सम्मान्य-सत्कार्य सम्प्रेषितः सन् त्वरमाणः-शीघ्रं गच्छन् चम्पायां नगर्यां प्राप्तः ॥९९९॥ तत्र-चम्पायां नगर्यां स चतुर्मुखो दूतो अजितसेननरेश्वरस्य पुरतः-अग्रतः प्रसन्नवचनैः -मधुरवाक्यैरेवं भणितुं-वक्तुं समारब्धः - प्रारम्भं कृतवान् ॥१०००॥ हे नरवर-हे राजन् ! त्वया तदा-तस्मिन्काले यो भ्रातृनन्दनो-भ्रातुः पुत्रः श्रीपालो बालो भूपालपदे राजपदे प्रतिष्ठा स्थितिर्यस्य स तथाभूतो बालत्वाद् भूभारे-पृथ्वीभारोत्पाटनेऽसमर्थो दृष्टः ॥१००१॥ ततस्तं भारं निजके-स्वकीये एव स्कन्धे आरोप्य-संस्थाप्य च - पुनः यः श्रीपालः सकलकलाशिक्षणार्थं त्वया प्रेषितो-विदेशे मुक्त आसीत् ॥१००२॥ स श्रीपालः सकलकलासु कुशलो-निपुणस्तथा अतुलं-सर्वोत्कृष्टं बलं-सैन्यं यस्य स तथा पुनः सकलराजैर्नतौ चलनौ - पादौ यस्य स तथा पुनश्चतुरङ्गं यद् बलं-सैन्यं तेन युक्तोऽयं तव लघुकृते-लघुत्वकरणार्थम् एति-आगच्छति ॥१००३॥

ता जुज्जए तुज्झवि तंमि रज्जभारावयारणं काउं । जं जुन्नथंभभारो, लोएवि ठविज्जइ नवेसु ॥१००४॥
अन्नं च तस्स रन्नो, पयपंकयसेवणत्थमन्नेऽवि । बहवेऽवि हु नरनाहा, समागया संति भत्तीए ॥१००५॥
जं तुब्भे निअयावि हु, नो पत्ता तस्स मिलणकज्जेऽवि । सोवि हु तक्किज्जइ दुज्जणेहिं नूणं कुलविरोहो ॥
जो पुण कुले विरोहो, सो रिउगेहेसु कप्परुक्खसमो । तेण न जुज्जइ तुम्हं, परुप्परं मच्छरो कोऽवि ॥
सोवि हु किज्जउ जइ किर, नज्जइ अहमम्हि इत्थ सुसमत्थो । कत्थ तुमं खज्जोओ, कत्थ य सो चंडमत्तंडो ? ॥

ततः-तस्मात्कारणात् तवापि तस्मिन् श्रीपाले राज्यभारस्य अवतारणं कर्तुं युज्यते, यत्-यतो लोकेऽपि जीर्णस्तम्भस्य भारो नवेषु-नवीनस्तम्भेषु स्थाप्यते ॥१००४॥ अन्यच्च-अपरं च तस्य राज्ञः पदपङ्कजयोः-चरणकमलयोः सेवनार्थमन्येऽपि बहवोऽपि नरनाथा-राजानो भक्त्या समागताः सन्ति ॥१००५॥ यत् यूयं निजका अपि-आत्मीया अपि तस्य-श्रीपालराजस्य मिलनकार्येऽपि -मिलनार्थमपि नो प्राप्ताः सोऽपि -स एव कुलविरोधो-गृहविरोधो, नूनं-निश्चयेन दुर्ज्जनैः-शत्रुभिस्तर्क्यते-अभिलष्यते, सोऽपीति अपिशब्द एवकारार्थः ॥१००६॥ यः पुनः कुले विरोधः स रिपुगेहेषु-वैरिगृहेषु कल्पवृक्षसमः-कल्पवृक्षतुल्योऽस्ति, तेन कारणेन युष्माकं परस्परम्-अन्योऽन्यं कोऽपि मत्सरो-द्वेषो न युज्यते ॥१००७॥ सोऽपि-गृहविरोधोऽपि क्रियतां यदि किलेति निश्चयेन अहं अत्र-विरोधे सुतराम्-अतिशयेन समर्थोऽस्मीति ज्ञायते, परं क्व त्वं खद्योततुल्यः कुत्र च स श्रीपालश्चण्डमार्त्तण्डः - प्रचण्डसूर्यसदृशः ? भवतोर्द्वयोः खद्योतसूर्ययोरिव महदन्तरमस्तीति भावः ॥१००८॥

कत्थ तुमं सरसरसव - ससयसमाणोसि देव ! हीणबलो । कत्थ य सो रयणायर - मेरुमयंदेहिं सारिच्छो ॥१००९॥
जइ तं रुट्ठोऽसि न जीविअस्स ता झत्ति भत्तिसंजुत्तो । सिरिसिरिपालनरेसर - पाए अणुसरसु सुपसाए ॥१०१०॥
जइ कहवि गव्वपव्वय - मारूढो नो करेसि तस्साणं । तो होही जुज्झसज्जो, कज्जपयं इत्तिअं चेव ॥१०११॥

पुनर्हे देव ! - हे राजन् ! कुत्र त्वं ? कुत्र च स श्रीपालः ? कथमित्याह- त्वं तु सरःसर्षपशशकैः समानः-तुल्योऽसि, सरः-सरोवरः सर्षपो-लघुधान्यविशेषः शशको-लघुजन्तुविशेषः तैः सदृश इत्यर्थः, अत एव हीनं बलं यस्य स हीनबलस्त्वमसि, स श्रीपालस्तु रत्नाकरमेरुमृगेन्द्रैः सदृक्षः-तुल्योऽस्ति,रत्नाकरः - समुद्रः मेरुः -सुरगिरिः मृगेन्द्रः-सिंहस्तैः सदृश इत्यर्थः, एतावता क्व सरः ? क्व समुद्रः ? क्व सर्षपः ? क्व मेरुः ? क्व शशकः ? क्व सिंहः ? इति भावः ॥१००९॥ यदि त्वं जीवितस्योपरि न रुष्टोऽसि तत्-तर्हि झटिति-शीघ्रं भक्त्या संयुक्तः-सहितः सन् श्रीश्रीपालनरेश्वरस्य पादौ - चरणौ अनुसर-सेवस्व, कीदृशौ पादौ ?-सुष्ठु-शोभनः प्रसादो ययोस्तौ सुप्रसादौ ॥१०१०॥ यदि कथमपि गर्वः-अहङ्कारस्तद्रूपं पर्वतमारूढः सन् तस्य श्रीपालस्य आज्ञां नो करोषि ततः-तर्हि युद्धाय-युद्धार्थं सज्जो भव, कार्यपदम् इयदेव - एतावदेवास्ति ॥१०११॥

तं सोउणं सो अजिअसेणरायावि एरिसं भणइ । दूओ अ दिओ अ तुमं, नज्जसि एएण वयणेणं ॥१०१२॥
पढमं महुरं मज्झंमि अंबिलं कडुअतित्तयं अंते । वुत्तुं भुत्तुं व तुमं, जाणंतो होसि चउरमुहो ॥१०१३॥
निअया न केऽवि अम्हे, तस्स न सो कोऽवि अम्ह निअओत्ति । सो अम्हाणं सत्तू, अम्हेवि अ सत्तुणो तस्स ॥१०१४॥
जं जीवंतो मुक्को, सो तइआ बालओत्ति करुणाए । तेणऽम्हे हीणबला, सो बलिओ वन्निओ तुमए ॥१०१५॥

तद्-दूतवचनं श्रुत्वा सोऽजितसेनो राजापि ईदृशं वचनं भणति, कीदृशं भणतीत्याह- अरे त्वमेतेन वचनेन दूतश्च द्विजो-ब्राह्मणो ज्ञायते ॥१०१२॥ प्रथमं मधुरं, मध्ये आम्लम्, अन्ते कटुकं तिक्तं च-तीक्ष्णम्, ईदृशं वचनं वक्तुम्-कथयितुमीदृशं भोजनं भोक्तुं च जानन् त्वं चतुर्मुखो भवसि, चत्वारि मुखानि यस्य स तथा ॥ १०१३॥ वयं केऽपि तस्य-तव स्वामिनो निजकाः-स्वकीया न स्मः, स-तव स्वामी अस्माकं कोऽपि निजको नास्तीति, किन्तु स- त्वत्स्वामी अस्माकं शत्रुरस्ति, वयमपि च तस्य शत्रवः स्मः ॥१०१४ ॥ स-तव स्वामी तदा-तस्मिन्नवसरे बालकोऽस्तीति ज्ञात्वाऽस्माभिः करुणया-अनुकम्पया यज्जीवन्मुक्तस्तेन कारणेन त्वया वयं हीनबला वर्णिताः, स - निजस्वामी बलिको-बलवान् वर्णितः ॥१०१५॥

निअजीविअस्स नाहं, रुट्ठो हु तस्स जमराया । जेणाहं निच्चिंतो, सुत्तो सीहुव्व जग्गविओ ॥१०१६॥
जं तं दूओऽसि दिओऽसि तेण मुक्कोऽसि गच्छ जीवंतो । तुह सामिअहणणत्थं, एसोऽहं आगओ सिग्घं ॥१०१७॥
दूओवि दुअं गंतुं, सव्वं निअसामिणो निवेएइ । तत्तो सो सिरिपालो, भूवालो चल्लिओ सबलो ॥१०१८॥
चंपाए सीमाए, गंतूणावासिअं समग्गंपि । सिरिपालरायसिन्नं, तडिणीतडउच्चभूमीए ॥१०१९॥
सो अजिअसेणरायावि सम्मुहो आविऊण तत्थेव । आवासिओ अ अभिमुहमहीइ सिन्नेण संजुत्तो ॥१०२०॥

अहं निजजीवितस्योपरि न रुष्टोऽस्मि किन्तु हु इति निश्चितं तस्य-त्वत्स्वामिन उपरि यमराजो रुष्टोऽस्ति, येन त्वत्स्वामिना अहं निश्चिन्तः सुप्तः सिंह इव जागरितः ॥१०१६॥ यत् त्वं दूतोऽसि पुनर्द्विजोऽसि तेन कारणेन मुक्तोऽसि जीवन् गच्छ, तव स्वामिनो हननार्थं-मारणार्थमेषोऽहं शीघ्रं-झटिति आगतः ॥१०१७॥ ततो दूतोऽपि शीघ्रं-झटिति गत्वा सर्वं वृत्तान्तं निजस्वामिने निवेदयति-कथयति, ततः-तदनन्तरं स श्रीपालो भूपालः सबलः-सैन्यसहितश्चलितः ॥१०१८॥ चम्पाया नगर्याः सीमायां गत्वा समग्रं-समस्तमपि श्रीपालराजस्य सैन्यं-कटकं तटिन्यां- गङ्गानद्यास्तटे उच्चभूमौ आवासितम्-निवेशं कृतवत् ॥१०१९॥ च - पुनः सः - अजितसेनो राजापि सम्मुखमागत्य तत्रैव गङ्गानद्यास्तटे एव अभिमुखमह्यां-सम्मुखभूमौ सैन्येन-निजकटकेन संयुक्तः -सहितः आवासितो-निवेशं कृतवान् ॥१०२०॥

सोहिज्जइ रणभूमी, किज्जइ पूआ य सयलसत्थाणं। सुहडाणं च पसंसा, किज्जइ भट्टेहिं उच्चसरं ॥१०२१॥
किज्जंति भूहरीओ, सुहडाणं चारुचंदणरसेण। पूरिज्जंति अ सिहरा, चंपयकुसुमेहिं पवरेहिं ॥१०२२॥
वामपयतोडरेहिं, दाहिणकरचारुवीरवलएहिं। वारणयचामरेहिं नज्जंति फुडं महासुहडा ॥१०२३॥
गयगज्जिअं कुणंता, सुहडगणा तत्थ सीहनायं च। मुच्चंता नच्चंता, कुणंति वरवीरवरणीओ ॥१०२४॥

ततो रणभूमिः-सङ्ग्रामभूमिका शोध्यते-प्रस्तरकण्टकाद्यपनयनेन शुद्धा क्रियते, च - पुनः सकलशस्त्राणां पूजा क्रियते, च - पुनः भट्टैः-भट्टलोकैः उच्चः स्वरो यत्र कर्मणि तत् उच्चस्वरं यथा भवेत्तथा सुभटानां-योधानां प्रशंसा-श्लाघा क्रियते ॥१०२१॥ तथा सुभटानां चारु-सुन्दरं यच्चन्दनं तस्य रसेन 'भूहरीओ'ति-तिलकविशेषाः क्रियन्ते, च - पुनः प्रवरैः प्रधानैश्चम्पककुसुमैः-चम्पकपुष्पैः सुभटानां शिरस्सु शेखराणि पूर्यन्ते ॥१०२२॥ वामपदे-वामचरणे टोडरैः-माल्यविशेषैस्तथा दक्षिणकरे चारुभिः मनोज्ञैर्वीरवलयैः-वीरत्वसूचकैः कटकविशेषैस्तथा वारणशब्देन आतपवारणमुच्यते आतपवारैः-छत्रैः पुनश्चामरैः स्फुटं-प्रकटं महासुभटा ज्ञायन्ते ॥१०२३॥ तत्र सैन्यद्वये सुभटनां गणाः-समूहा गजवत् गर्जितं कुर्वन्तश्च -पुनः सिंहनादं मुञ्चन्तः पुनर्नृत्यन्तो-नृत्यं कुर्वन्तो वरवीरवरणानि-परस्परं शस्त्रप्रहारयाचनानि कुर्वन्ति ॥१०२४॥

जणयपुरओवि तणयं, कावि हु जणणी भणेइ वच्छ ! तए । तह कहवि जूझिअव्वं, जह तुह ताओ न संकेइ ॥१०२५
अन्ना भणेइ वच्छाहं वीरसुआ पिआ य वीरस्स । तह तुमए जइअव्वं होमि जहा वीरजणणीवि ॥१०२६॥
धन्ना सच्चिअ नारी, जीए जणओ पई अ पुत्तो अ । वीरावयायपयवीसमन्निआ हुंति तिन्निवि ॥१०२७॥
कावि पइं पइ जंपइ, महमोहो नाह ! नेव कायव्वो । जीवंतस्स मयस्स व, जं तुह पुट्ठिं न मुंचिस्सं ॥१०२८॥

कापि जननी-माता जनकस्य पुरतः-अग्रतस्तनयं-पुत्रं भणति-कथयति, हे वत्स ! त्वया तथा-तेन प्रकारेण कथमपि योद्धव्यं-युद्धं कर्त्तव्यं यथा तव तातः-पिता न शङ्कते ॥ १०२५॥ अन्या काचित् स्त्री भणति, हे वत्स ! अहं वीरस्य -शूरस्य सुता-पुत्री अस्मि, च - पुनः वीरस्य प्रिया-पत्नी अस्मि, अथ त्वया तथा-तेन प्रकारेण यतितव्यं-युद्धे यत्नः कार्यो यथा वीरस्य जनन्यपि भवामि ॥१०२६॥ सा एव नारी-स्त्री धन्याऽस्ति, यस्या जनकः१ पतिश्च२ पुत्रश्च३ त्रयोऽपि वीरावदातपदवीसमन्विता भवन्ति, वीर इत्येवंरूपा या अवदातपदवी-निर्मलपदवी तया समन्विता-युक्ता इति विग्रहः ॥१०२७॥ कापि स्त्री पतिं-स्वभर्त्तारं प्रति जल्पति-वक्ति, हे नाथ- हे स्वामिन् ! मम मोहो नैव कर्तव्यः, यद्- यस्मात्कारणात् अहं तव जीवतो मृतस्य वा पृष्ठिं न मोक्ष्यामि- त्यक्ष्यामि ॥१०२८॥

कावि हु हसेइ रमणं, महनयणहओवि होसि भयभीओ। नाह! तुमं विज्जुज्जल-भल्लअघाए कहं सहसि ? ॥१०२९॥
इत्थंतरंमि उब्भड-सुहडकयाडंबरं व असहंतो। सूरो फुरंततेओ संजाओ, पुव्वदिसिभाए ॥१०३०॥
मिलिऊण तक्खणं चिअ, अग्गिमसेणाइ उब्भडा सुहडा। मग्गणमसिक्खिअंपि हु, कुणंति पढमासिघायाणं
खग्गाखग्गि सरासरि, कुंताकुंतिप्पयंडदंडं च। जुज्झंता ते सुहडा, संजाया एगमेगं च ॥१०३२॥

कापि स्त्री रमणं-भर्त्तारं हसति, हे नाथ ! त्वं मम नयनाभ्यां हतोऽपि भयभीतो भवसि, तर्हि विद्युदिव-तडिदिव उज्ज्वला ये 'भल्लय'त्ति-कुन्तास्तेषां घातान्-प्रहारान् कथं सहसे-सहिष्यसे ? ॥१०२९॥ अत्रान्तरे-अस्मिन्नवसरे उद्धता ये सुभटास्तैः कृतमाडम्बरमसहमान इव सूरः - सूर्यः पूर्वदिग्भागे-पूर्वस्यां दिशि स्फुरत्-सञ्चरत्तेजो यस्य स स्फुरत्तेजाः सञ्जातः-उदित इत्यर्थः ॥१०३०॥ तदा अग्रिमसेनयोः-पुरोवर्तिकटकयोः उद्भटाः - सुभटास्तत्क्षणं-तत्काल एव परस्परं मिलित्वा प्रथमं येऽसिघाताः-खडग्प्रहारास्तेषामशिक्षितमपि मार्गणं-याचनां कुर्वन्ति ॥१०३१॥ खड्गैः खड्गैः प्रहृत्य इदं युद्धं प्रवृत्तमिति खड्गाखड्गि, तथा शरैः शरैः प्रहृत्य इदं युद्धं प्रवृत्तमिति शराशरि, तथा कुन्तैः कुन्तैः प्रहृत्य इदं युद्धं प्रवृत्तमिति कुन्ताकुन्ति, च - पुनः प्रचण्डा दण्डा यत्र कर्मणि तत्प्रचण्डदण्डं यथा स्यात्तथा युध्यमाना-युद्धं कुर्वाणास्ते सुभटा एकमेकं च सञ्जाताः-सर्वेऽपि एकत्रीभूता इत्यर्थः ॥१०३२॥

कस्सवि भडस्स सीसं, खग्गच्छिन्नं च वालविकरालं । रविणोऽवि राहुसंकं, करेइ गयणंमि उच्छलिअं ॥१०३३॥
कोऽवि भडो सिल्लेणं, गयणे उल्लालिओ महल्लेणं । दीसइ सुरंगणाहिं, सग्गमिअंतो सदेहुव्व ॥१०३४॥
कोऽवि हु भडो भिडंतो, छिन्नसिरो खग्गखेडयकरो अ । गयसऋणसीसभारो, पणच्चए जायहरिसुव्व ॥१०३५॥

कस्यापि भटस्य-शूरस्य शीर्ष-मस्तकं खड्गेन छिन्नं वालैः-केशैर्विकरालं गगने-आकाशे उच्छलितं सत् रवेः - सूर्यस्यापि राहो-राहुग्रहस्य शङ्कां करोति-उत्पादयति ॥१०३३॥ कोऽपि भटो महता 'सिल्लेणं' ति भिन्दिपालेन बरछीइत्याख्येन शस्त्रेण गगने-आकाशे उल्लालित-ऊर्ध्वमुच्छालितः सन् सुराङ्गनाभिः-देवाङ्गनाभिः सदेहः-शरीरसहितः स्वर्गमायन्-आगच्छन् इव दृश्यते-विलोक्यते ॥१०३४॥ कोऽपि भटो 'भिडन्तो' त्ति युद्धमानो वैरिणा छिन्नं शिरो यस्य स छिन्नशिराः, च - पुनः खड्गखेटके-तरवारिस्फरके करयोः- हस्तयोर्यस्य स खड्गखेटककरः, पुनः ऋणेन सह वर्त्तमानं सऋणम्, ईदृशं यत् शीर्ष-मस्तकं तस्य भारः सऋणशीर्षभारः, स गतो यस्य स तथाऽत एव जातो हर्षो यस्य स जातहर्ष इव प्रकर्षेण नृत्यति-प्रनृत्यति ॥१०३५॥

तत्थ य पप्पडभंगं, भज्जंति रहा य कोहलयभेअं। भज्जंति गया तुरया, चिब्भडछेअं च छिज्जंति ॥१०३६॥
तओ- सत्थच्छुरिआ बहुमुंडमंडिआ धउडिआ भडधडेहिं। अंतेहिं निरंतरिआ, भरिआ मयहयगयसएहिं ॥१०३७॥
रुहिरोहजणिअकद्दम-मज्जविमद्दिज्जमाणमडयाणं। कडयडसद्दरउद्दा, खणेण सा रणमही जाया ॥१०३८॥

तत्र च-सङ्ग्रामे रथाः पर्पटभङ्गं भज्यन्ते, यथा पर्पटानां भङ्गो भवेत्तथा भज्यन्ते इत्यर्थः, च - पुनः गजा-हस्तिनः कुष्माण्डकभेदं भिद्यन्ते-विदार्यन्ते, यथा कुष्माण्डकफलानां भेदो-विदारणं भवेत्तथा भिद्यन्ते इत्यर्थः, च - पुनः तुरगा-अश्वाश्चिर्भटच्छेदं छिद्यन्ते, यथा चिर्भटफलच्छेदो भवेत्तथा छिद्यन्ते इत्यर्थः ॥ १०३६ ॥ ततः-तदनन्तरं सा रणमही-सङ्ग्रामभूमिः क्षणेन ईदृशी जाता इति द्वितीयगाथान्त्यपादेऽन्वयः, कीदृशीत्याह- शस्त्रैः आस्तृता-संस्तृता, पुनः बहुभिर्मुण्डैःमस्तकैर्मण्डिता-भूषिता, पुनः भटानां-वीराणां 'धडेहिं'ति-निर्जीवकलेवरैः 卐 स्थपुटिता-विषमोन्नतीभूता, पुनः अन्त्रैः-शरीरावयवविशेषैर्निरन्तरिता-अन्तररहिता व्याप्तेत्यर्थः, पुनः मृतानां हयानां गजानां च शतैर्भरिता ॥ १०३७ ॥ तथा रुधिरस्य ओघः-प्रवाहस्तेन जनित-उत्पादितो यः कर्दमस्तन्मध्ये विमर्द्यमानानि यानि मृतकानि तेषां यः कडकडशब्दस्तेन रौद्रा-भयङ्करा, ईदृशी सा रणभूमिर्जातेत्यर्थः ॥ १०३८ ॥

卐 स्थपुट એટલે ઊંચું-નીચું સ્થળ. स्थपुट (=ઊંચું-નીચું સ્થળ)છે જેમાં તે स्थपुटिता. स्थपुट શબ્દને તદ્ધિત इत પ્રત્યય લાગતાં અને સ્ત્રીલિંગમાં आ લાગતાં स्थपुटिता શબ્દ બન્યો છે.

For Private and Personal Use Only

सिरिपालबलभडेहिं, भग्गं दट्ठूण निअबलं सयलं । उट्ठवइ अजिअसेणो, निअनामाओ व लज्जंतो ॥१०३९॥
जा सो परबलसुहडे, कुविअकयंतुव्व संहरइ ताव । सत्तसयराणएहिं, समंतओ वेढिओ झत्ति ॥ १०४० ॥
पच्चारिओ अ तेहिं, नरवर ! अज्जवि चएसु अभिमाणं । सिरिपालरायपाए, पणमसु मा मरसु मुहिआए ॥१०४१॥
तहवि हु जाव न थक्कइ, जुज्झंतो ताव तेहिं सुहडेहिं । सो पाडिऊण बद्धो, जीवंतो चेव लीलाए ॥१०४२॥

श्रीपालस्य राज्ञो यद् बलं-कटकं तत्र ये भटास्तैर्भग्नं सकलं-समस्तं निजबलं-स्वसैन्यं दृष्ट्वाऽजितसेनो राजा निजनामतो लज्जमान इव उत्तिष्ठते-युद्धार्थमुद्यतो भवति, न केनापि जिता सेना यस्येति व्युत्पत्तेरन्यथाभवनादिति भावः ॥ १०३९ ॥ सोऽजितसेनो राजा कुपितः कृतान्तो-यमराज इव यावत् परबलस्य-शत्रुसैन्यस्य सुभटान् संहरति-विनाशयति तावत् सप्तशतसङ्ख्यैः 'राणएहिं' ति लघुराजविशेषैः श्रीपालसेवकैर्झटिति-शीघ्रं समन्तात्-सर्वदिक्षु वेष्टितः ॥ १०४० ॥ च - पुनः तैः 'पच्चारिओ' त्ति प्रभाषितः, कथमित्याह- हे नरवर-हे राजन् ! अद्यापि अभिमानम्-अहङ्कारं त्यज, श्रीपालराजस्य पादौ-चरणौ प्रणम-प्रकर्षेण नम, मुधिकया-वृथा मा म्रियस्व ॥ १०४१ ॥ एवमुक्तस्तथापि स यावद्युद्ध्यमानो न 'थक्क'इति न निवर्तते तावत्तैः-श्रीपालस्य सुभटैः सोऽजितसेनो-राजाऽधः पातयित्वा जीवन्नेव लीलया बद्धः ॥ १०४२ ॥

सिरिपालरायपासे, आसीओ जाव सो तहा बद्धो । ताव तेणं च रन्ना, सोवि हु मोआविओ झत्ति ॥१०४३॥
भणिओ अ ताय ! मा किंपि निअमणे संकिलेसलेसंपि । चिंतेसु किंतु पुव्वंव निअभुवं भुंजसु सुहेणं ॥१०४४॥
तो अजिअसेणराया, चित्ते चिंतेइ ही मए किमिअं । अविमंसिअं कयं जं, दूअस्स न मन्निअं वयणं ? ॥१०४५॥
कत्थाहं वुड्ढोऽवि हु, परदोहपरायणो महापावो । कत्थ इमो बालोऽवि हु, परोवयारिक्कधम्मपरो ॥ १०४६ ॥

स राजा तथा-तेन प्रकारेण बद्धः सन् यावत् श्रीपालराजपार्श्वे आनीतस्तावत् च तेन-श्रीपालेन राज्ञा सोऽपि-अजितसेनोऽपि झटिति-शीघ्रं मोचितः ॥ १०४३ ॥ भणितश्च, किमित्याह- हे तात ! निजमनसि-स्वचित्ते किमपि सङ्क्लेशलेशमपि मा चिन्तय, किन्तु पूर्वमिव-पूर्ववत् निजभुवं-स्वकीयभूमिं सुखेन भुङ्क्ष्व ॥ १०४४॥ ततः-श्रीपालवचनश्रवणानन्तरमजितसेनो राजा चित्ते चिन्तयति, ही इति खेदे, मया किमिदमविमृष्टं कृतम्-अविचार्य कार्यं कृतम्, यद् दूतस्य वचनं न मानितम्-नाङ्गीकृतम् ॥ १०४५ ॥ अहं हु इति निश्चितं वृद्धोऽपि परस्य द्रोहे-जिघांसायां परायणः-तत्परो महापापः कुत्र ? अयं पुनर्बालोऽपि परोपकार एव य एकः-अद्वितीयो धर्मः स एव परः-प्रधानो यस्य सः परोपकारैकधर्मपरः कुत्र ? द्वौ कुत्रशब्दौ महदन्तरं सूचयतः ॥ १०४६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुत्तदोहेण कित्ती, नासइ नीई अ रायदोहेण । बालदोहेण सुगई, हहा मए तं तिगंपि कयं ॥ १०४७ ॥
कत्थत्थि मज्झ ठाणं, नरयं मुत्तूण पावचरिअस्स ? । ता पावघायणत्थं पव्वज्जं संपवज्जामि ॥ १०४८ ॥
एवं च तस्स चिंतंतयस्स सुहभावभाविअमणस्स । पावरासीहिं भिन्नं, दिन्नं विवरं च कम्मेहिं ॥१०४९॥
तो सरिअपुव्वजम्मेण तेण सिरिअजिअसेण भूवइणा । पडिवन्नं चारित्तं, सुदेवयादत्तवेसेणं ॥ १०५० ॥

पुनः चिन्तयति, गोत्रद्रोहेण कीर्त्तिर्नश्यति, राजद्रोहेण च नीतिः-न्यायमार्गो नश्यति, तथा बालद्रोहेण सुगतिः-देवगत्यादिका नश्यति, हहा इति खेदे, मया एतत्त्रिकमपि कृतम् ॥ १०४७ ॥ पापचरितस्य-ईदृक्पापाचारस्य मम नरकं मुक्त्वा-नरकं विना कुत्र स्थानमस्ति ?, तत्-तस्मात्कारणात् पापस्य घातनार्थं-विनाशनार्थं प्रव्रज्यां-जैनीं दीक्षां सम्प्रपद्ये - अङ्गीकुर्वे ॥ १०४८ ॥ एवम्-अनन्तरोक्तप्रकारेण चिन्तयतोऽत एव शुभभावेन-शुभपरिणामेन भावितं-वासितं मनो यस्य स तस्य, तथाभूतस्य तस्य राज्ञः पापराशिभिः-पापसमूहैर्भिन्नं-विदीर्णं च - पुनः कर्मभिर्विवरं दत्तम् ॥ १०४९ ॥ ततः-तदनन्तरं स्मृतं पूर्वजन्म-पूर्वभवो येन स स्मृतपूर्वजन्मा, तेन तथाभूतेन श्रीअजितसेनभूपतिना-अजितसेनराजेन चारित्रं-सर्वविरत्याख्यं प्रतिपन्नं-अङ्गीकृतम्, कीदृशेन तेन ?-सुदेवतया-सम्यग्दृष्टिदेवतया दत्तो वेषो-रजोहरणादिको यस्मै स तेन तथा ॥ १०५० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं च पवन्नचरित्तं, दट्ठुं सिरिपालनरवरो झत्ति । पणमेइ सपरिवारो, भत्तीइ थुणेइ एवं च ॥ १०५१ ॥
जेणेस कोहजोहो, हणिओ हेलाइ खंतिखग्गेणं । समयासिअधारेणं, तस्स महामुणिवइ ! नमो ते ॥१०५२॥
माणगिरिगरुअमयसिहरअट्ठयं मद्दविवज्जेणं । जेण हणिऊण भग्गं, तस्स महामुणिवइ ! नमो ते ॥१०५३॥
मायामयविसवल्ली, जेणऽज्जवसारसरलकीलेणं । उक्खणिआ मूलाओ, तस्स महामुणिवइ ! नमो ते ॥१०५४॥

प्रपन्नं-अङ्गीकृतं चारित्रं येन स तं प्रपन्नचारित्रं तं च अजितसेनं दृष्ट्वा श्रीपालनरवरः-श्रीपालनृपो झटिति-शीघ्रं सपरिवारः-परिवारसहितः प्रणमति-नमस्करोति, च - पुनर्भक्त्या एवं-वक्ष्यमाणप्रकारेण स्तौति, तथाहि- ॥ १०५१ ॥ येन एष क्रोधयोधः-क्रोध एव भटः क्षान्तिखड्गेन-क्षमारूपकरवालेन हेलया-अवज्ञया लीलया वा हतस्तस्मै ते-तुभ्यं महामुनिपतये नम इत्यन्वयः, कीदृशेन क्षान्तिखड्गेन ?-समता एव शिता-तीक्ष्णा धारा यस्य स तेन तथा ॥ १०५२ ॥ पुनर्येन मुनिना मानः-अभिमान एव गिरिः-पर्वतस्तत्र गुरुकाणि-महान्ति लाभैश्वर्यादिका मदा एव शिखराणि तेषामष्टकं मार्दवं-मृदुता एव एकम्-अद्वितीयं वज्रं तेन हत्वा भग्नं-त्रोटितं तस्मै ते-तुभ्यं महामुनिपतये नमः ॥ १०५३ ॥ माया स्वरूपमस्या इति मायामयी या विषवल्ली सा येन मुनिना आर्जवं-सरलता एव सारः-श्रेष्ठः सरलः-अवक्रः कीलः-शङ्कुस्तेन मूलात् उत्खाता-निष्कासिता तस्मै ते-तुभ्यं महामुनिपतये नमः ॥ १०५४ ॥

For Private and Personal Use Only

जेणिच्छामुच्छावेलसंकुलो लोहसागरो गरुओ । तरिओ मुत्तितरीए, तस्स महामुणिवइ ! नमो ते ॥१०५५॥
जेण कंदप्पसप्पो, विवेअसंवेअजणिअजंतेण । गयदप्पुच्चिअविहिओ, तस्स महामुणिवइ ! नमो ते ॥१०५६॥
जेण निअमणपडाओ, कोसुंभपयंगमंगसमरागो । तिविहोऽवि हु निद्धूओ, तस्स महामुणिवइ ! नमो ते ॥१०५७॥
दोसो दुट्ठगयंदो, वसीकओ जेण लीलमित्तेणं । उवसमसिणिनिउणेणं, तस्स महामुणिवइ ! नमो ते ॥१०५८॥

येन मुनिना गुरुको-महान् लोभसागरो-लोभसमुद्रो मुक्तिः-निर्लोभता एव तरीः-नौस्तया तीर्णस्तस्मै ते० नमः, कीदृशो लोभसागरः ?-'इच्छामूर्च्छाविलासङ्कुलः' इच्छा-सामान्यतो वाञ्छा, मूर्च्छा-विशेषतस्तृष्णा, इच्छायुक्ता मूर्च्छा इच्छामूर्च्छा, सा एव वेला-जलवृद्धिस्तया सङ्कुलो-व्याकुलः ॥ १०५५ ॥ येन मुनिना विवेकसंवेगाभ्यां जनितम्-उत्पादितं यत् यन्त्रं तेन कन्दर्प एव सर्प्पो गतदर्प्प एव विहितः-कृतः तस्मै ते० नमः, गतो दर्प्पो मानो यस्य स तथा ॥ १०५६ ॥ येन मुनिना निजमनः-पटात्-स्वकीयचित्तरूपवस्त्रात् कुसुम्भपतङ्गमङ्गैः समः-तुल्यः कामस्नेहदृष्टिरागाख्यस्त्रिविधोऽपि रागो निर्धूतो - दूरीकृतस्तस्मै ते० नमः, तत्र कुसुम्भरागसमः कामरागः, पतङ्गरागसमः स्नेहरागः मङ्गरागसमो दृष्टिरागः, मङ्गो रञ्जनद्रव्यविशेषस्तद्रागो दुस्त्यजो भवति ॥ १०५७ ॥ पुनर्येन मुनिना लीलामात्रेण-लीलया एव द्वेषो दुष्टगजेन्द्रो वशीकृतस्तस्मै ते० नमः, कीदृशेन येन ?-उपशम एव सृणिः-अङ्कुशस्तत्र निपुणेन, तत्प्रयोगज्ञेनेत्यर्थः ॥ १०५८ ॥

मोहो महल्लमल्लोऽवि पीडिओ ताडिऊण जेणेसो । वेरग्गमुग्गरेणं, तस्स महामुणिवइ ! नमो ते ॥ १०५९ ॥
एए अंतररिउणो, दुज्जेआ सयलसुरवरिंदेहिं । जेण जिआ लीलाए, तस्स महामुणिवइ ! नमो ते ॥१०६०॥
पुव्वंपि तुमं पुज्जो, आसि ममं जेण तायभायाऽसि । संपइ पुणो मुणीसरु, जाओ पुज्जो तिलुक्कस्स ॥१०६१॥
एवं थोऊण नमंसिऊण तं अजिअसेणमुणिनाहं । सिरिपालनिवो ठावइ, तप्पुत्तं तस्स ठाणंमि ॥१०६२॥
कयसोहाए चंपा-पुरीइ समहुस्सवं सुमुहुत्ते । पविसइ सिरिसिरिपालो, अमरपुरीए सुरिंदुव्व ॥ १०६३ ॥
तत्थ य सयलेहिं नरेसरेहिं मिलिऊण हरिसिअमणेहिं । पिअपट्टंमि निवेसिअ, पुणोऽभिसेओ कओ तस्स ॥१०६४॥

येन मुनिना एष मोहो महान्मल्लोऽपि वैराग्यमुद्गरेण ताडयित्वा पीडितस्तस्मै ते० नमः ॥ १०५९ ॥ सकलसुरवरेन्द्रैः दुर्जेया एते क्रोधादय आन्तररिपव-आत्मस्था वैरिणो येन मुनिना लीलया जितास्तस्मै ते-तुभ्यं मुनिपतये नमः ॥ १०६० ॥ पूर्वमपि त्वं मम पूज्य आसीः येन कारणेन त्वं तातस्य-मत्पितुर्भ्रातासि, सम्प्रति-इदानीं पुनः मुनीश्वरः सन् त्रैलोक्यस्य पूज्यो जातोऽसि ॥ १०६१ ॥ एवं तमजितसेनमुनिनाथं स्तुत्वा नमस्कृत्य च श्रीपालनृपस्तस्य-अजितसेनस्य पुत्रं तस्य स्थाने स्थापयति ॥ १०६२ ॥ कृता शोभा यस्याः सा कृतशोभा तस्यां चम्पापुर्यां श्रीश्रीपालो नृपः सुमुहूर्त्ते-शोभने मुहूर्त्ते समहोत्सवं-महोत्सवसहितं प्रविशति-प्रवेशं करोति, कस्यां क इव ?-अमरपुर्यां-देवनगर्य्यां सुरेन्द्र इव ॥ १०६३ ॥ तत्र-तस्यां च नगर्यां हर्षितं मनो येषां ते हर्षितमनसस्तैः सकलैः-सर्वैर्नरेश्वरैः-राजभिर्मिलित्वा पितुः पट्टे निवेश्य-स्थापयित्वा तस्य-श्रीपालस्य पुनरभिषेको-राज्याभिषेकः कृतः ॥ १०६४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलपट्टाभिसेओ, कओ तहिं मयणसुंदरीएवि । सेसाणं अट्ठण्हं, कओ अ लहुपट्टअभिसेओ ॥ १०६५ ॥
मइसायरो अ इक्को, तिन्नेव य धवलसिट्ठिणो मित्ता । एए चउरोऽवि तया, रन्ना निअमंतिणो ठविआ ॥१०६६॥
कोसंबीनयरीओ, अणाविओ धवलनंदणो विमलो । सो कणयपट्टपुव्वं, सिट्ठी संठाविओ रन्ना ॥ १०६७ ॥
अट्ठाहियाउ चेईहरेसु काराविऊण विहिपुव्वं । सिरिसिद्धचक्कपूअं, च कारए परमभत्तीए ॥ १०६८ ॥
ठाणे ठाणे चेईहराइं कारेइ तुंगसिहराइं । घोसावेइ अमारिं, दाणं दीणाण दावेइ ॥ १०६९ ॥

तत्र मदनसुन्दर्या अपि मूलपट्टाभिषेकः, सा मूलपट्टराज्ञीपदे स्थापितेत्यर्थः, च - पुनः शेषाणामष्टानां राज्ञीनां लघुपट्टाभिषेकः कृतः ॥ १०६५ ॥ तदा एकश्च मतिसागरः त्रीण्येव च धवलश्रेष्ठिनो मित्राणि एते चत्वारोऽपि राज्ञा श्रीपालेन निजमन्त्रिणः स्थापिताः ॥ १०६६ ॥ तथा कोशाम्बीनगरीतो विमलो नाम धवलनन्दनो-धवलश्रेष्ठिपुत्र आनायितः, स विमलो राज्ञा श्रीपालेन कनकपट्टपूर्वं-सौवर्णपट्टबन्धकपूर्वकं श्रेष्ठी सं-सम्यक् प्रकारेण स्थापितः ॥ १०६७ ॥ तथा श्रीपालश्चैत्यगृहेषु-जिनमन्दिरेषु अष्टाहिकामहोत्सवान् कारयित्वा विधिपूर्वं परमभक्त्या श्रीसिद्धचक्रपूजां च कारयति ॥ १०६८ ॥ स्थाने स्थाने तुङ्गानि-उच्चानि शिखराणि येषां तानि तुङ्गशिखराणि चैत्यगृहाणि कारयति, तथाऽमारिं-सर्वजन्तुभ्योऽभयदानं घोषयति, पुनः दीनेभ्यो दानं दापयति, इत्थं पुण्यकृत्यानि करोतीत्यर्थः ॥ १०६९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नायमग्गेण रज्जं, पालंतो पियअमाहिं संजुत्तो । सिरिसिरिपालनरिंदो, इंदुव्व करेइ लीलाओ ॥१०७०॥
अह अजिअसेणनामा, रायरिसी सो विसुद्धचारित्तो । उप्पन्नावहिनाणो, समागओ तत्थ नयरीए ॥१०७१॥
तस्सागमणं सोऊण नरवरो पुलइओ पमोएणं । माइपियाहिं समेओ, संपत्तो वंदणनिमित्तं ॥१०७२॥
तिपयाहिणित्तु सम्मं, तं मुणिनाहं नमित्तु नरनाहो । पुरओ अ संनिविट्ठो, सपरीवारो अ विणयपरो ॥१०७३॥
सोऽवि सिरिअजिअसेणो, मुणिराओ रायरोसपरिमुक्को । करुणिक्कपरो परमं, धम्मसरूवं कहइ एवं ॥१०७४॥

न्यायमार्ग्गेण राज्यं पालयन् प्रियतमाभिः-वल्लभाभिः संयुक्तः-सहितः श्रीश्रीपालनरेन्द्र इन्द्र इव लीलाः-क्रीडाः करोति ॥ १०७० ॥ अथ स श्रीअजितसेननामा राजर्षिस्तत्र नगर्यां-चम्पायां समागतः, कीदृशः सः ?- विशुद्धं-निर्मलं चारित्रं यस्य स तथाऽत एव उत्पन्नमवधिज्ञानं यस्य स तथाभूतः ॥ १०७१ ॥ तस्य-राजर्षेरागमनं श्रुत्वा नरवरो-राजा श्रीपालः प्रमोदेन-हर्षेण पुलकितः-सञ्जातरोमोद्गमः सन् मात्रा-जनन्या प्रियाभिश्च-वल्लभाभिः समेतः-सहितो वन्दननिमित्तं-मुनेः वन्दनार्थं सम्प्राप्तः ॥ १०७२ ॥ नरनाथो-राजा श्रीपालस्तं-मुनिनाथं त्रिः प्रदक्षिणीकृत्य पुनः सम्यग् नत्वा प्रणम्य पुरतः-अग्रतश्च संनिविष्टः, कीदृशो नरनाथः ?- सपरिवारः-परिवारसहितश्च - पुनर्विनयपरः ॥ १०७३ ॥ सः श्रीअजितसेनोऽपि मुनिराजो रागरोषपरिमुक्तो-रागद्वेषाभ्यां समन्ताद्रहितः, पुनः करुणा परा-प्रकृष्टा यस्य स तथाभूतः सन् एवं - वक्ष्यमाणप्रकारेण परमं-प्रधानं धर्मस्य स्वरूपं कथयति ॥ १०७४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भो भो भव्वा ! भवोहंमि, दुल्लहो माणुसो भवो । चुल्लगाईहिं नाएहिं, आगमंमि विआहिओ ॥ १०७५ ॥
लद्धंमि माणुसे जम्मे, दुल्लहं खित्तमारिअं । जं दीसंति इहाणेगे, मिच्छा भिल्ला पुलिंदया ॥ १०७६ ॥
आरिएसु अ खित्तेसु, दुल्लहं कुलमुत्तमं । जं वाहसुणियाईणं, कुले जायाण को गुणो ? ॥ १०७७ ॥
कुले लद्धेऽवि दुल्लंभं, रूवमारुग्गमाउअं । विगला वाहिआऽकाल-मया दीसंति जं जणा ॥ १०७८ ॥
तेसु सव्वेसु लद्धेसु, दुल्लहो गुरुसंगमो । जं सया सव्वखित्तेसु, पाविज्जंति न साहुणो ॥ १०७९ ॥

भो ! भो ! भव्या भवौघे-भवसमूहे मानुषो-मनुष्यसम्बन्धी भवो-जन्म आगमे-सिद्धान्ते चुल्लकादिभिः-चुल्लगपासगधन्ने इत्यादिभिर्ज्ञातैः-दृष्टान्तैः दुर्लभो -दुष्प्रापो व्याख्यात-उक्तः ॥ १०७५ ॥ कदाचित् मानुषे जन्मनि लब्धे सति आर्यं क्षेत्रं दुर्लभम्, यद्-यस्मात्कारणात् इह भरते अनार्यक्षेत्रेषु अनेके-बहवो म्लेच्छा भिल्लाः पुलिन्दाश्च म्लेच्छभेदा एव दृश्यन्ते-विलोक्यन्ते ॥ १०७६ ॥ आर्येषु च क्षेत्रेषु उत्तमं कुलं दुर्लभं यद्-यस्मात्कारणात् व्याधसौनिकादीनां-लुब्धकखटिकादीनां कुलेषु जातानाम्-उत्पन्नानां को गुणः ?, न कोऽपीत्यर्थः ॥ १०७७ ॥ कुले लब्धेऽपि रूपं-परिपूर्णेन्द्रियपञ्चकं तथा आरोग्यं-नीरोगता तथा आयुष्कं-महदायुः एतत्त्रयं दुर्ल्लभम्, यद्-यस्मात्कारणात् जना-उत्तमकुलोद्भवा अपि बहवो लोका विकला-दूषितेन्द्रियास्तथा व्याधिता-रोगिणस्तथाऽकाले मृता दृश्यन्ते ॥ १०७८ ॥ तेषु रूपादिषु सर्वेषु लब्धेष्वपि गुरुसङ्गमः-सद्गुरोः सङ्गो दुर्लभः, यद्-यस्मात्कारणात् सर्वक्षेत्रेषु सदा साधवो न प्राप्यन्ते ॥ १०७९ ॥

For Private and Personal Use Only

महंतेणं च पुन्नेणं, जाएवि गुरुसंगमे। आलस्साईहिं रुद्धाणं, दुल्लहं गुरुदंसणं॥ १०८०॥
कहं कहंपि जीवाणं, जाएऽवि गुरुदंसणे। वुग्गाहियाण धुत्तेहिं, दुल्लहं पज्जुवासणं॥ १०८१॥
गुरुपासेऽवि पत्ताणं, दुल्लहा आगमस्सुई। जं निद्दा विगहाओ अ, दुज्जआओ सयाइवि॥ १०८२॥
संपत्ताए सुईएवि, तत्तबुद्धी सुदुल्लहा। जं सिंगारकहाईसु, सावहाणमणो जणो॥ १०८३॥
उवइट्ठेऽवि तत्तंमि, सद्धा अच्चंतदुल्लहा। जं तत्तरुइणो जीवा, दीसंति विरला जए॥ १०८४॥

कदाचित् महता पुण्येन च गुरुसङ्गमे जातेऽपि आलस्यादिभिः त्रयोदशतस्करै रुद्धानां प्राणिनां गुरुदर्शनं दुर्लभं, ते चामी "आलस्समोहवन्ना, थंभा कोहा पमायकिवणत्ता। भयसोगा अन्नाणा, विक्खेवकुऊहला रमणा॥ १॥" ॥ इति ॥ १०८०॥ जीवानां कथंकथमपि-केन केनापि प्रकारेण गुरुदर्शने जातेऽपि धूर्तैर्व्युद्ग्राहितानां-भ्रान्तचित्तीकृतानां पर्युपासनं-गुरुसेवनं दुर्लभम्॥ १०८१॥ गुरुपार्श्वे प्राप्तानामपि आगमस्य-सिद्धान्तस्य श्रुतिः-श्रवणं दुर्लभा, यत्-यस्मात्कारणात् निद्रा विकथाश्च सदापि दुर्जयाः सन्ति, तत्प्रसङ्गात् श्रवणं दुर्लभमपीत्यर्थः॥ १०८२॥ श्रुतौ-आगमश्रवणे सम्प्राप्तायामपि तत्त्वबुद्धिः सुदुर्लभा, यत्-यस्मात्कारणात् जनो-लोकः शृङ्गारकथादिषु-शृङ्गारहास्यादिकथासु सावधानम्-एकाग्रयुक्तं मनो यस्य स तथा बहुर्दृश्यते इति शेषः॥ गुरुभिस्तत्त्वे उपदिष्टेऽपि श्रद्धा-आस्तिक्यमत्यन्तदुर्लभा, यद्-यस्मात् कारणात्तत्त्वेषु-जिनोक्तपदार्थेषु रुचिर्येषां ते तत्त्वरुचयो जीवा जगति-लोके विरला दृश्यन्ते॥ १०८४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जायाए तत्तसद्धाए, तत्तबोहो सुदुल्लहो । जं आसन्नसिवा केई, तत्तं बुज्झंति जंतुणो ॥ १०८५ ॥
तत्तं दसविहो धम्मो, खंती मद्दव अज्जवं । मुत्ती तवो दया सच्चं, सोयं बंभमकिंचणं ॥ १०८६ ॥
खंतीनाममकोहत्तं, मद्दवं माणवज्जणं । अज्जवं सरलो भावो, मुत्ती निग्गंथया दुहा ॥ १०८७ ॥
तवो इच्छानिरोहो अ, दया जीवाण पालणं । सच्चं वक्कमसावज्जं, सोयं निम्मलचित्तया ॥ १०८८ ॥
बंभमट्ठारभेअस्स, मेहुणस्स विवज्जणं । अकिंचणं न मे कज्जं, केणावित्थित्तिऽणीहया ॥ १०८९ ॥

तत्त्वश्रद्धायां-तत्त्वप्रतीतौ जातायामपि तत्त्वबोधः-तत्त्वज्ञानं सुदुर्लभः, यद्-यस्मात्कारणात्केचित् आसन्नं-निकटं शिवं-मुक्तिर्येषां ते आसन्नशिवा एव जन्तवो-जीवाः तत्त्वं बुध्यन्ते, न सर्वेऽपीत्यर्थः ॥ १०८५ ॥ तत्त्वं किमित्याह- तत्त्वं दशविधो धर्मस्तथाहि- क्षान्तिः १ मार्दवम् २ आर्जवं ३ मुक्तिः ४ तपः ५ दया ६ सत्यं ७ शौचं ८ ब्रह्म ९ आकिञ्चन्यम् १० ॥ १०८६ ॥ अथैषामर्थानाह- क्षान्तिर्नाम अक्रोधत्वं-क्रोधाभावः १ मार्दवं-मानवर्जनम् २ आर्जवम्-सरलो भावः-अभिप्रायः ३ मुक्तिर्द्विधा निर्ग्रन्थता-निर्लोभता, द्रव्यतो भावतश्च परिग्रहरहितत्वमित्यर्थः ४ ॥ १०८७ ॥ इच्छाया निरोधश्च तप उच्यते ५ जीवानां पालनं-रक्षणं दया उच्यते ६ असावद्यं-निर्दोषं वाक्यं सत्यमुच्यते ७ निर्मलचित्तता शौचमुच्यते ८ ॥ १०८८ ॥ अष्टादशभेदस्य मैथुनस्य विवर्जनं ब्रह्म उच्यते, तत्र औदारिकवैक्रियभेदाद् द्विविधं मैथुनं, तदेकैकमपि मनोवाक्कायैः करणकारणानुमतिभेदान्नवविधं, द्वयोर्मिलने अष्टादशविधमिति ९, केनापि वस्तुना मम कार्यं न-नास्ति इत्येवं याऽनीहता-निःस्पृहता तत् आकिञ्चन्यमुच्यते १० ॥ १०८९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एसो दसविहोद्देसो, धम्मो कप्पदुमोवमो । जीवाणं पुण्णपुण्णाणं, सव्वसुक्खाण दायगो ॥ १०९० ॥
धम्मो चिंतामणी रम्मो, चिंतिअत्थाण दायगो । निम्मलो केवलालोअ-लच्छिविच्छिड्डिकारओ ॥१०९१॥
कल्लाणिक्कमओ वित्त-रूवो मेरूवमो इमो । सुमणाणं मणोतुट्ठिं, देइ धम्मो महोदओ ॥ १०९२ ॥

दशविधा-दशप्रकारा उद्देशा-अवयवा नामोच्चारणानि वा यस्य स तथाभूत एष धर्म्मः कल्पद्रुमोपमः-कल्पवृक्षसदृशः पूर्णपुण्येभ्यो जीवेभ्यः सर्वसौख्यानां दायकोऽस्ति, पूर्णं पुण्यं येषां ते पूर्णपुण्यास्तेभ्यः, कल्पवृक्षाणामपि दशविधत्वात्तदुपमो धर्म उक्तः ॥ १०९० ॥ धर्म्मश्चिन्तामणिरिव रम्यो-मनोज्ञश्चिन्तितार्थानां-वाञ्छितार्थानां दायको-दाताऽस्ति, कीदृशो धर्म्मो ? - निर्म्मलो-निर्दोषः अत एव - केवलालोकः केवलज्ञानरूपप्रकाशः सा एव लक्ष्मीः-सम्पत् तस्या 'विच्छिड्डि'त्ति विस्तारस्तत्कारकः ॥ १०९१ ॥ कल्याणं-मङ्गलं मेरुपक्षे कल्याणम्-सुवर्णं तदेव एकं स्वरूपमस्येति कल्याणैकमयः, पुनर्वित्तं-प्रसिद्धं रूपं-स्वरूपं यस्य स तथा, द्वयोस्तुल्यं विशेषणमिदं, यद्वा मेरुपक्षे वृत्तं-वर्त्तुलं रूपम्-आकृतिर्यस्य स तथा, पुनर्महान् उदयो यस्मात् स महोदयः, मेरुपक्षे महानुदय-औन्नत्यं यस्य स तथाऽत एव मेरुणा गिरिराजेन उपमा यस्य स मेरूपमोऽयं धर्म्मः, सुमनसां-शोभनमनोवृत्तीनां जनानां मेरुपक्षे देवानां मनसि तुष्टिं-तोषं ददाति ॥ १०९२ ॥

For Private and Personal Use Only

सुगुत्तसत्तखित्तीए, सव्वस्सव य सोहिओ। धम्मो जयइ संवित्तो, जंबूदीवोवमो इमो ॥ १०९३ ॥
एसो अ जेहिं पन्नत्तो, तेऽवि तत्तं जिणुत्तमा। एअस्स फलभूआ य, सिद्धा तत्तं न संसओ ॥ १०९४ ॥
दंसंता एयमायारं, तत्तमायरिआवि हु। सिक्खयंता इमं सीसे, तत्तमज्झावयावि अ ॥ १०९५ ॥
साहयंता इमं सम्मं, तत्तरूवा सुसाहुणो। एअस्स सद्दहाणेणं, सुतत्तं दंसणंपि हु ॥ १०९६ ॥

सर्वस्ववत्-सर्वगृहसारवत् सुगुप्ता-सुष्ठु रक्षिता या सप्तक्षेत्री 'जिणभवणबिम्बपुत्थये'त्यादिका जम्बूद्वीपपक्षे भरतैरावतविदेहहैमवतहैरण्यवतहरिवर्षरम्यकाख्या तया शोभितो-विराजितः, पुनः सं-सम्यक् वृत्तम्-आचारो यत्र स जम्बूद्वीपपक्षे संवृत्तः-सम्यग् वर्त्तुलोऽत एव जम्बूद्वीपेन उपमा यस्य स तथाभूतोऽयं धर्म्मो जयति, सर्वोत्कर्षेण वर्त्तते इत्यर्थः ॥ १०९३ ॥ एष धर्मो यैः प्रज्ञप्तः-प्रदर्शितस्ते जिनोत्तमा-जिनेन्द्रा अपि तत्त्वं, एतस्य धर्मस्य फलभूताः सिद्धाश्च तत्त्वं, न संशयः, अत्र सन्देहो नास्तीत्यर्थः ॥ १०९४ ॥ एतं धर्म्मरूपमाचारं दर्शयन्त आचार्या अपि तत्त्वं, तथा शिष्यान् इमं धर्मं शिक्षयन्तोऽध्यापका-उपाध्याया अपि च तत्त्वम् ॥ १०९५ ॥ इमं धर्मं सम्यक् साधयन्तः सुसाधवस्तत्त्वरूपाः सन्ति, एतस्य धर्मस्य श्रद्धानेन दर्शनं-सम्यक्त्वमपि सुष्ठु-शोभनं तत्त्वम् ॥ १०९६ ॥

एअस्सेवावबोहेणं, तत्तं नाणंपि निच्छयं। एअस्साराहणारूवं, तत्तं चारित्तमेव य ॥ १०९७ ॥
इत्तो जा निज्जरा तीए, रूवं तत्तं तवोऽवि अ। एवमेआइं सव्वाइं, पयाइं तत्तमुत्तमं ॥ १०९८ ॥
तत्तो नवपई एसा, तत्तभूआ विसेसओ। सव्वेहिं भव्वसत्तेहिं, नेआ झेआ य निच्चसो ॥ १०९९ ॥
एयं नवपयं भव्वा !, झायंता सुद्धमाणसा। अप्पणो चेव अप्पंमि, सक्खं पिक्खंति अप्पयं ॥ ११०० ॥
अप्पंमि पिक्खिए जं च, खणे खिज्जइ कम्मयं। न तं तवेण तिव्वेण, जम्मकोडीहिं खिज्जए ॥ ११०१ ॥

एतस्य धर्मस्यैव अवबोधेन-सम्यग्ज्ञानेन निश्चयं-निश्चयात्मकं वस्तुनिर्णयजनकं ज्ञानमपि तत्त्वं, च -पुनरेतस्य धर्मस्य आराधनारूपं चारित्रमपि तत्त्वम्, एवशब्दोऽप्यर्थे ॥ १०९७ ॥ इतः-अस्माच्चारित्रात् या कर्म्मणां निर्जरा तस्या रूपं-स्वरूपं तपोऽपि च तत्त्वमस्ति, एवम्-अमुना प्रकारेण एतानि सर्वाणि पदानि उत्तमं-सर्वोत्कृष्टं तत्त्वमस्ति, अत्र जातावेकवचनम् ॥ १०९८ ॥ ततः-तस्मात्कारणात् एषा-अनन्तरोक्ता नवानां पदानां समाहारो नवपदी सर्वैर्भव्यसत्त्वैः-भव्यप्राणिभिर्विशेषतस्तत्त्वभूता ज्ञेया नित्यशो ध्येया-ध्यातव्या च ॥ १०९९ ॥ एतां नवपदीं ज्ञात्वा शुद्धं मानसं-मनो येषां ते शुद्धमानसाः सन्तो ध्यायन्तो नरा आत्मना-स्वयमेव आत्मनि-स्वस्मिन् साक्षात्-प्रत्यक्षमात्मानं प्रेक्षन्ते-पश्यन्ति ॥ ११०० ॥ आत्मनि प्रेक्षिते-दृष्टे सति क्षणे-क्षणमात्रे यच्च कर्म क्षीयते तत्कर्म तीव्रेण तपसा जन्मकोटिभिरपि न क्षीयते ॥ ११०१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ता तुज्झे भो महाभागा !, नाऊणं तत्तमुत्तमं । सम्मं झाएह जं सिग्घं, पावेहाणंदसंपयं ॥ ११०२ ॥
एवं सो मुणिराओ, काऊणं देसणं ठिओ जाव । ताव सिरिपालराया, विणयपरो जंपए एवं ॥ ११०३ ॥
नाणमहोयहि भयवं ! केण कुकम्मेण तारिसो रोगो । बालत्ते मह जाओ ?, केण सुकम्मेण समिओ अ ? ॥११०४॥
केणं च कम्मणाऽहं, ठाणे ठाणे अ एरिसिं रिद्धिं । संपत्तो ? तह केणं, कुकम्मणा सायरे पडिओ ? ॥११०५॥
तह केण नीअकम्मेण, चेव डुंबत्तणं महाघोरं । पत्तोऽहं ? तं सव्वं, कहेह काऊण सुपसायं ॥ ११०६ ॥

ततः-तस्मात्कारणात् भो ! महाभागा-अहो ! महाभाग्यवन्तो यूयमिदमुत्तमं तत्त्वं ज्ञात्वा सम्यग् यथा स्यात्तथा ध्यायत, यत्-यतः शीघ्रमानन्दसम्पदं-परमाह्लादरूपसम्पत्तिं प्राप्नुत ॥ ११०२ ॥ सोऽजितसेनो मुनिराज एवम्-उक्तप्रकारेण देशनां कृत्वा यावत् स्थितस्तावत् श्रीपालो राजा विनयपरः सन् एवं-वक्ष्यमाणप्रकारेण जल्पति-वदति ॥ ११०३ ॥ हे ज्ञानमहोदधे-हे ज्ञानसमुद्र ! हे भगवन् ! केन कुकर्मणा मम बालत्वे तादृशो रोगो जात-उत्पन्नः ? च - पुनः केन सुकर्मणा शान्तो-नाशम्प्राप्तः ? ॥११०४॥ च - पुनः केन कर्मणाऽहं स्थाने स्थाने ईदशीमृद्धिं सम्प्राप्तः ? तथा केन कर्मणाऽहं सागरे-समुद्रे पतितः ? ॥ ११०५ ॥ तथा केन नीचकर्मणा एवाहं महाघोरं-महादारुणं डुम्बत्वं प्राप्तः ? तत्सर्वं सुतरामतिशयेन प्रसादं कृत्वा कथय ॥ ११०६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो भणइ मुणिवरिंदो, नरवर ! जीवाण इत्थ संसारे । पुव्वकयकम्मवसओ, हवंति सुक्खाइं दुक्खाइं ॥११०७॥
इत्थेव भरहवासे, हिरन्नउरनामयंमि वरनयरे । सिरिकंतो नाम निवो, पावड्डिपसत्तओ अत्थि ॥११०८॥
तस्सऽत्थि सिरिसमाणा, सरीरसोहाइ सिरिमई देवी । जिणधम्मनिउणबुद्धी, विसुद्धसंमत्तसीलजुआ ॥११०९॥
तीए अ नरवरिंदो, भणिओ तुह नाह ! जुज्जइ न एअं । पावड्डिमहावसणं, निबंधणं नरयदुक्खाण ॥१११०॥
भीसणसत्थकरेहिं, तुरयारूढेहिं जं हणिज्जंति । नासंतावि हु ससया, सो किर को खत्तिआयारो ? ॥११११॥

ततः- तदनन्तरं मुनिवरेन्द्रो भणति, हे नरवर-हे राजन् ! अत्र- अस्मिन् संसारे जीवानां पूर्वकृतकर्मणां वशात् सुखानि दुःखानि च भवन्ति ॥११०७॥ अत्रैव भरतक्षेत्रे हिरण्यपुरनामकेप्रधाननगरे पापर्द्धो-आखेटके प्रसक्त- आसक्तः श्रीकान्तो नाम नृपो-राजाऽस्ति,आसीदित्यर्थः ॥११०८॥ तस्य राज्ञः शरीरशोभया श्रीसमाना-लक्ष्मीतुल्या श्रीमतीनाम देवी-पट्टराज्ञी अस्ति, कीदृशी ?-जिनधर्मे निपुणा-दक्षा बुद्धिर्यस्याः सा तथा, पुनर्विशुद्धे-निर्मले ये सम्यक्त्वशीले-सम्यग्दर्शनब्रह्मचर्ये ताभ्यां युता-सहिता ॥११०९॥ तया च श्रीमत्या नरवरेन्द्रो भणितः, कथमित्याह- हे नाथ- हे स्वामिन् ! एतत् पापर्द्धिमहाव्यसनं तव न युज्यते, कीदृशमेतत् ?-नरकदुःखानां निबन्धनं-कारणम् ॥१११०॥ भीषणानि-भयङ्कराणि शस्त्राणि करेषु- हस्तेषु येषां ते भीषणशस्त्रकरास्तैस्तुरगारूढैः - अश्वारूढैर्नरैर्यन्नश्यन्तोऽपि शशका- जन्तुविशेषा हन्यन्ते-मार्यन्ते स किल कः क्षत्रियाणामाचारः ?, न कोऽपीत्यर्थः ॥११११॥

For Private and Personal Use Only

जत्थ अकयावराहा, मया वराहाइणोऽवि निन्नाहा । मारिज्जंति वराया, सा सामिअ ! केरिसी नीई ॥१११२॥
हंतूण परप्पाणं, अप्पाणं जे कुणंति सप्पाणं । अप्पाणं दिवसाणं, कए अ नासंति अप्पाणं ॥१११३॥
इच्चाइजिणिंदागम-उवएससएहिं बोहयंतीए । तीए न सक्किओ सो, निवारिउं पाववसणाओ ॥१११४॥
अन्नदिणे सो सत्तहिं, सएहिं उल्लंठदुट्ठवंठेहिं । मइआसत्तो पत्तो, कत्थवि एगंमि वणगहणे ॥१११५॥
दट्ठूण तत्थ एगं, धम्मज्झयसंजुअं मुणिवरिंदं । राया भणेइ एसो, चमरकरो कुट्ठिओ कोऽवि ॥१११६॥

यत्र नीतिमार्गे न कृतोऽपराधो यैस्तेऽकृतापराधा मृगा-हरिणा वराहादयः - शूकरादयोऽपि निर्नाथा-अनाथा वराका-दुर्बला जीवा मार्यन्ते सा स्वामिन् ! कीदृशी नीतिः ? ॥१११२॥ परात्मानं-परजीवं हत्वा ये जीवास्तन्मांसभक्षणेन आत्मानं सप्राणं-सबलं कुर्वन्ति ते दुष्टा अल्पानां-स्तोकानां दिवसानां कृते च -निमित्तमात्मानं नाशयन्ति ॥१११३॥ इत्यादिभिर्जिनेन्द्रागमसम्बन्धिभिरुपदेशानां शतैर्बोधयन्त्या तया राज्या स राजा पापव्यसनान्निवारयितुं न शक्योऽभूत् ॥१११४॥ अन्यस्मिन्दिने स श्रीकान्तो राजा सप्तभिः शतैः उल्लण्ठदुष्टवण्ठैः पुरुषैः सह मृगयायां-पापर्द्धौ आसक्तः सन् कुत्राप्येकस्मिन् वनगहने-दुरवगाहवने प्राप्तः ॥१११५॥ तत्र वने एकं धर्मध्वजेन-रजोहरणेन संयुतं-सहितं मुनिवरेन्द्रं दृष्ट्वा राजा भणति, मक्षिकापनयनार्थं चामरं करे यस्य स चामरकर एष कोऽपि कुष्ठिकोऽस्ति ॥१११६..

तं चेव भणंतेहिं, तेहिं वंठेहिं दुट्ठचित्तेहिं । उवसग्गिओ मुणिंदो, खमापरो लिट्ठुलट्ठीहिं ॥१११७॥
जह जह तार्डति मुणिं, ते दुट्ठा तह तहा समुल्लसइ । हासरसो नरनाहे, मुणिनाहे उवसमरसो अ ॥१११८॥
ते कयमुणिउवसग्गा, निब्भग्गा हणिअभूरिमयवग्गा । नरवइपुट्ठिविलग्गा, पत्ता निअयंमि नयरंमि ॥१११९॥
अन्नदिणे सो पुणरवि, राया मिगयागओ निअं सिन्नं । मुत्तूण हरिणपुट्ठीइ धाविओ इक्कगो चेव ॥११२०॥
नइतडवणे निलुक्को, सो हरिणो नरवरो तओ चुक्को । जा पिच्छइ ता पासइ, नइउवकंठे ठिअं साहुं ॥११२१॥

तदेव-नृपोक्तमेव वचनं भणद्भिः-जल्पद्भिस्तैर्दुष्टचित्तैः वण्ठैः मुनीन्द्रो लेष्टुभिः-लोष्टैर्यष्टिभिः-लकुटैः उपसर्गित-उपद्रुतः, कीदृशो मुनीन्द्रः ?- क्षमापरः-क्षमाप्रधानः ॥१११७॥ ते दुष्टा वण्ठा यथा यथा मुनिं ताडयन्ति तथा तथा नरनाथे-नृपे हास्यरसः समुल्लसति, मुनिनाथे-मुनीश्वरे च उपशमरसः-शान्तरसः समुल्लसति ॥१११८॥ कृतो मुनेरुपसर्गो यैस्ते तथाऽत एव निर्भाग्या-भाग्यहीनाः पुनर्हता भूरयो-बहवो मृगवर्गा-मृगसमूहा यैस्ते तथा, ते वण्ठा नरपते राज्ञः पृष्ठौ विलग्नाः सन्तो निजके-स्वकीये नगरे प्राप्ताः ॥१११९॥ अन्यस्मिन्दिने स राजा पुनरपि मृगयायां गतो निजं सैन्यं मुक्त्वा-त्यक्त्वा एककः-एकाकी एव हरिणस्य पृष्ठौ धावितः ॥११२०॥ स हरिणो नद्यास्तटे यद् वनं तत्र 'निलुक्को' त्ति घनवृक्षाद्याच्छादितत्वाददृश्यतां गतस्तदा नरवरो-राजा ततो मृगाच्च्युतः सन् यावत्प्रेक्षते-विलोकयति तावन्नद्या उपकण्ठे-समीपे स्थितं साधुं पश्यति ॥११२१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं दट्ठूणं पावेण तेण तह पिल्लिओ मुणिवरिंदो । सहसत्ति जहा पडिओ, नईजले तो पुणो तेण ॥११२२॥
संजायकिंपिकरुणा-भावेणं कड्ढिऊण सो मुक्को । को जाणइ जीवाणं, भावपरावत्तमइविसमं ? ॥११२३॥
गिहमागएण तेणं, निआवयाओ निवेइओ सहसा । सिरिमइदेवीपुरओ, तीए अ निवो इमं भणिओ ॥११२४॥
अन्नेसिंपि जीआणं, पीडाकरणं हवेइ कडुअफलं । जं पुण मुणिजणपीडा-करणं तं दारुणविवागं ॥११२५॥

तं साधुं दुष्ट्वा तेन पापेन क्रूरेण राज्ञा तथा-तेन प्रकारेण कराभ्यां प्रेरितो यथा मुनिवरेन्द्रः सहसेति-अकस्मात् नदीजले पतितः तदनन्तरं पुनस्तेन राज्ञा ॥११२२॥ सञ्जातः-समुत्पन्नः किमपि करुणाभावो-दयापरिणामो यस्य स तेन तथाभूतेन सता स मुनीन्द्रः 'कड्ढिऊण'त्ति जलमध्यान्निष्कास्य नदीतटे मुक्तः, कथमेतज्जातमित्याह- जीवानामतिविषमं भावपरावर्त-परिणामविपर्ययं को जानाति ? अतिशयितज्ञानिनं विना न कोऽपीत्यर्थः, युग्ममेतत् ॥११२३॥ गृहमागतेन राज्ञा सहसा-सद्यः श्रीमत्या-देव्याः पुरतः -अग्रतो निजावदातः-स्वकीयनिर्मलभावो निवेदितो-ज्ञापितः तदा तया नृप इदं-वक्ष्यमाणं भणितः, नृपायेदमुक्तमित्यर्थः ॥११२४॥ अन्येषामपि जीवानां पीडाकरणं कटुकं फलं यस्य तत् कटुकफलं भवति, यत्पुनर्मुनिजनस्य पीडाकरणं तद् दारुणो विपाको यस्य तद् दारुणविपाकम्, अतिभयङ्करफलप्रदमित्यर्थः ॥११२५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जओ- साहूणं हीलाए, हाणी हासेण रोयणं होइ । निंदाइ वहो बंधो, ताडणया वाहिमरणाई ॥११२६॥
मुणिमारणेण जीवाणऽणंतसंसारिआण बोहीवि । दुलहा चिअ होइ धुवं, भणिअमिणं आगमेऽवि जओ ॥११२७॥
चेइअदव्वविणासे, इसिघाए पवयणस्स उड्डाहे । संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥११२८॥
तं सोऊण नरिंदो, किंपि समुल्लसिअधम्मपरिणामो । पभणेइ अहं पुणरवि, न करिस्सं एरिसमकज्जं ॥ ११२९॥

यत उक्तं शास्त्रे, साधूनां हीलया हानिर्भवति, साधूनां हास्येन-हसनेन रोदनं भवति, साधूनां निन्दया बन्धो वधश्च भवति, साधूनां ताडनया व्याधिमरणादिः-रोगप्राणवियोगादिर्भवति ॥११२६॥ मुनिमारणेन अनन्तः संसारोऽस्त्येषामित्यनन्तसंसारिकास्तेषां जीवानां बोधिः-जिनधर्मप्राप्तिरपि ध्रुवं-निश्चितं दुर्लभैव भवति, यत आगमे-सिद्धान्तेऽपि इदं भणितम्-उक्तमस्ति ॥११२७॥ किमित्याह- चैत्यद्रव्यं-जिनगृहसम्बन्धि द्रव्यं तस्य विनाशे-भक्षणोपेक्षणादिना मूलतो ध्वंसे तथा ऋषिघाते-साधुमारणे तथा प्रवचनस्य-चतुर्विधसङ्घस्य उड्डाहे-कलङ्कदानादिनाऽपवादकरणे तथा संयत्याः-साध्व्याश्चतुर्थव्रतस्य-ब्रह्मचर्यस्य भङ्गे बोधिलाभस्य-अर्हद्धर्मावाप्तेर्मूलेऽग्निर्दत्तः, एतावता एतत्कर्त्तुः पुनः सद्धर्मलाभो दुर्लभ एवेति (आवश्यकनिर्युक्तौ) ॥११२८॥ तत् राज्ञीवचनं श्रुत्वा नरेन्द्रो-राजा प्रभणति, कीदृशो नरेन्द्रः ? -किमपि समुल्लसितो धर्मपरिणामो यस्य स तथा, किं कथयतीत्याह -अहं पुनरपि ईदृशमकार्यम्-अकृत्यं न करिष्यामि ॥११२९॥

For Private and Personal Use Only

कइवयदिणेसु पुणरवि, तेण गवक्खट्ठिएण कोवि मुणी । दिट्ठो मलमलिणतणू, गोअरचरिअं परिभमंतो ॥११३०॥
तत्तो सहसा वीसारिऊण तं सिरिमईइ सिक्खंपि । सो राया दुट्ठमणो, निअवंठे एवमाइसइ ॥११३१॥
रे रे एअं डुंबं नयरं विट्टालयंतमम्हाणं । कंठे घित्तूण दुअं, निस्सारह नयरमज्झाओ ॥११३२॥
तेहिं नरेहिं तहच्चिअ, कड्ढिज्जंतो पुराउ सो साहू । निअयगवक्खठिआए, दिट्ठो तीए सिरिमईए ॥११३३॥
तो कुविआए तीए, राया निब्भच्छिओ कडुगिराए । तो सोऽवि लज्जिओ भणइ देवि ! मे खमसु अवराहं ॥११३४॥

कतिपयदिनेषु-कियद्दिवसेषु गतेषु पुनरपि गवाक्षस्थितेन तेन राज्ञा कोऽपि मुनिर्दृष्टः, कीदृशो ?-मलेन-रजःप्रस्वेद-समुद्भवेन मलिना तनुः-कायो यस्य स तथा, पुनः कीदृशः?-गोचरचर्यां परिभ्रमन् ॥११३०॥ ततो-मुनिदर्शनानन्तरं स राजा दुष्टं मनो यस्य स दुष्टमनाः सन् सहसा-सद्यः श्रीमत्याः शिक्षां विस्मार्य निजवण्ठान् एवं-वक्ष्यमाणप्रकारेण आदिशति -आज्ञां ददाति ॥११३१॥ रे रे सेवकाः ! अस्माकं नगरं 'वीट्टालयंतं'ति अशुद्धं कुर्वन्तमेतं डुम्बं कण्ठे गृहीत्वा द्रुतं-शीघ्रं नगरमध्यात् निस्सारयत-निष्कासयत ॥११३२॥ एवं राज्ञा उक्ते सति तैर्वण्ठनरैस्तथैव पुरान्निष्कास्यमानः स साधुर्निजगवाक्षस्थितया-स्वगवाक्षस्थया तया श्रीमत्या देव्या दृष्टः ॥११३३॥ ततः कुपितया-क्रुद्धया तया राज्ञ्या कटुगिरा-कटुकवाण्या राजा निर्भर्त्सितः, ततः स राजापि लज्जितः सन् भणति- हे देवि ! ममापराधं क्षमस्व, पुनर्नैवं करिष्यामीति भावः ॥११३४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सो मुणिनाहो रन्ना, तत्तो आणाविओ निआवासं । नमिओ अ पूइओ खामिओ अ तं निअयमवराहं ॥११३५॥
पुट्ठो अ सिरिमईए, भयवं ! अन्नाणभावओ रन्ना । साहूणं उवसग्गं, काऊण कयं महापावं ॥११३६॥
तप्पावघायणत्थं, किंपि उवायं कहेह पसिऊण । जेण कएणं एसो, पावाओ छुट्टइ नरेसो ॥११३७॥
तो भणइ मुणिवरिंदो भद्दे ! पावं कयं अणेण घणं । जं गुणिणो उवघाए, सव्वगुणाणंपि उवघाओ ॥११३८॥
तहवि कयदुक्कयाणवि, जियाण जइ होइ भावउल्लासो । ता होइ दुक्कयाणं, नासो सव्वाणवि खणेणं ॥११३९॥

ततः-तदनन्तरं राज्ञा स मुनिनाथो निजं-स्वकीयम् आवासं-गृहमानायितश्च पुनर्नतो-नमस्कृतः पूजितो वस्त्रादिना च-पुनस्तं निजकमपराधं क्षामितः ॥११३५॥ श्रीमत्या पृष्टश्च- हे भगवन् ! राज्ञाऽज्ञानभावतः साधूनामुपसर्गं कृत्वा महापापं कृतम्-उपार्जितं ॥११३६॥ तस्य पापस्य घातनार्थं-विनाशार्थं प्रसद्य-प्रसन्नीभूय कमपि उपायं कथय, येन उपायेन कृतेन एष नरेशो-राजा पापात् छुटति ॥११३७॥ ततो मुनिवरेन्द्रो भणति- हे भद्रे ! अनेन-राज्ञा घनं-सान्द्रं पापं कृतम्, कथमित्याह-यद्-यस्मात्कारणात् गुणिनो-गुणवतः पुरुषस्य उपघाते-विनाशे कृते सति सर्वेषामपि गुणानामुपघातो भवति ॥११३८॥ तथापि कृतं दुष्कृतं-पापं यैस्ते कृतदुष्कृतास्तेषामपि जीवानां यदि भावोल्लासः -शुभपरिणामविवृद्धिर्भवति तत्-तर्हि सर्वेषामपि दुष्कृतानां क्षणेन नाशो भवति ॥११३९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावस्सुल्लासकए, अरिहाइपसिद्धसिद्धचक्कस्स । आराहणं मुणीहिं, उवइट्ठं भव्वजीवाणं ॥११४०॥
ता जइ करेइ सम्मं, एयस्साराहणं नरवरोऽवि । तो छुट्टइ सयलाणं, पावाणं नत्थि संदेहो ॥११४१॥
तो सिक्खिऊण पूआतवोविहाणाइअं विहिं राया । भत्तीइ सिद्धचक्कं, आराहइ सिरिमइसमेओ ॥११४२॥
पुन्ने अ तवोकम्मे, रन्ना मंडाविए अ उज्जमणे । सिरिमइसहीहि अट्ठहि, विहिआ अणुमोअणा तस्स ॥११४३॥
सत्तहिं सएहिं तेहिं, सेवयपुरिसेहिं तस्स नरवइणो । दट्ठूण धम्मकरणं, पसंसिअं किंपि खणमित्तं ॥११४४॥

भावस्य उल्लासकृते-विवृद्धिनिमित्तमर्हदादिभिः पदैः प्रसिद्धसिद्धचक्रस्य आराधनं भव्यजीवेभ्यो मुनिभिः उपदिष्टम् ॥११४०॥ तत्-तस्मात्कारणात् नरवरोऽपि-राजापि यदि सम्यक् एतस्य-श्रीसिद्धचक्रस्य आराधनं करोति तत्-तर्हि सकलेभ्यः-सर्वेभ्यः पापेभ्यश्छुटति, अत्र सन्देहो नास्ति ॥११४१॥ ततो राजा पूजायास्तपसश्च यद्विधानं-करणं तदादिकं विधिं शिक्षयित्वा श्रीमत्या राज्ञ्या समेतः -सहितो भक्त्या सिद्धचक्रमाराधयति ॥११४२॥ च - पुनस्तपःकर्मणि-तपःक्रियायां पूर्णे सति राज्ञा उद्यापने च मण्डिते सति अष्टभिः श्रीमत्याः सखीभिस्तस्य-उद्यापनयुक्ततपसोऽनुमोदना-प्रशंसा विहिता-कृता ॥११४३॥ तैः सप्तभिः शतैः सेवकपुरुषैः तस्य नरपतेः-राज्ञो धर्मकरणं-प्रागुक्तनीत्या धर्मकार्यकरणं दृष्ट्वा क्षणमात्रं किमपि प्रशंसितम्, अस्माकं स्वामी सम्यक्कार्यं कुरुते इत्यादिका प्रशंसा कृतेत्यर्थः ॥११४४ ॥

For Private and Personal Use Only

ते अन्नदिणे रायाएसेणं सीहनामनरवइणो । हणिऊण गाममिक्कं, जा वलिआ गोधणं गहिउं ॥११४५॥
ता पुट्ठि पत्तो सीहो, बहुबलकलिओ पयंडभुअदंडो । तेण कुविएण सव्वे, धाडयपुरिसा हया तत्थ ॥११४६॥
तेऽवि मरिऊण खत्तिअपुत्ता होऊण तरुणभावेऽवि । साहूवसग्गपावप्पसायओ कुट्ठिणो जाया ॥११४७॥
जो सिरिकंतो राया, पुन्नपभावेण सो तुमं जाओ । सिरिमइजीवो मयणासुंदरि एसा मुणिअतत्ता ॥११४८॥
जं पुव्वंपि हु धम्मुज्जमपरा तुह हिइक्कतल्लिच्छा । आसि इमा तं जाया, एसा तुह मूलपट्टंमि ॥११४९॥

अन्यस्मिन्दिने ते सप्तशतपुरुषा राज्ञ आदेशेन-आज्ञया सिंहनाम्नो नरपतेः-नृपस्य एकं ग्रामं हत्वा गोधनं गृहीत्वा यावत्पश्चाद्वलिताः ॥११४५॥ तावद् बहुबलकलितो-बहुसैन्ययुक्तः पुनः प्रचण्डौ भुजदण्डौ यस्य स तथाभूतः सिंहो राजा तेषां पृष्ठे प्राप्तः, तेन सिंहेन कुपितेन सता तत्र प्रदेशे सर्वे धाटकपुरुषा हताः-मारिता इत्यर्थः ॥११४६॥ तेऽपि सप्तशतनृपसेवका मृत्वा क्षत्रियाणां पुत्रा भूत्वा तरुणभावेऽपि-यौवनेऽपि साधूपसर्गपापप्रसादात् कुष्ठिनो जाताः,साधूनामुपसर्गाः साधूपसर्गास्ते एव पापहेतुत्वात्पापं तस्य प्रसादात् कुष्ठोत्पत्तिरभूदित्यर्थः ॥११४७॥ यः श्रीकान्तो राजा स पुण्यप्रभावेण त्वं जातः, श्रीमत्या जीव एषा मदनसुन्दरी जाता,कीदृशी एषा? - मुणितं - ज्ञातं तत्त्वं यया सा तथा ॥११४८॥ हु इति निश्चितम्, इयं यद्-यस्मात् कारणात् पूर्वमपि धर्मे य उद्यमः स एव परः-प्रधानः यस्याः सा धर्मोद्यमपरा, पुनस्तव यत् हितं तत्र एका सा एव लिप्सा यस्याः सा एवम्भूता आसीत्, तत्- तस्मात्कारणात् एषा तव मूलपट्टे जाता, मूलपट्टराज्ञी अभूदित्यर्थः ॥११४९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुमए जहा मुणीणं, विहिआ आसायणा तहा चेव । कुट्ठित्तं जलमज्जणमवि डुंबत्तं च संपत्तं ॥११५०॥
जं च तए तीए, सिरिमईइ वयणेण सिद्धचक्कस्स । आराहणा कया तं, मयणावयणा सुहं पत्तो ॥११५१॥
जो एसो वित्थारो, रिद्धिविसेसस्स तुज्झ संजाओ । सो सयलोऽवि पसाओ, नायव्वो सिद्धचक्कस्स ॥११५२॥
सिरिमइसहीहिं जाहिं, विहिआ अणुमोअणा तया तुम्हं । ताओ इमाओ जायाओ तुज्झ लहुपट्टदेवीओ ॥११५३॥
एआसु अट्ठमीए, ससवत्तीसंमुहं कहियमासी । खज्जसु सप्पेण तुमंति तेण कम्मेण सा दट्ठा ॥११५४॥
धम्मपसंसाकरणेण तत्थ सत्तहिं सएहिं सुहकम्मं । जं विहिअं तेण इमे, गयरोगा राणया जाया ॥ ११५५॥

त्वया यथा-येन प्रकारेण मुनीनामाशातना-विराधना विहिता-कृता तथैव-तेनैव प्रकारेण त्वया इहभवे कुष्ठित्वं, ततो जलमज्जनं-समुद्रजले पतनं, च - पुनः डुम्बत्वमपि सम्प्राप्तम् ॥११५०॥ च - पुनर्यत्त्वया तस्याः श्रीमत्या वचनेन सिद्धचक्रस्याराधना कृता तन्मदनसुन्दरीवचनात् इह सुखं प्राप्तः ॥११५१॥ य एष तव ऋद्धिविशेषस्य विस्तारः सञ्जातः स सकलोऽपि समस्तोऽपि सिद्धचक्रस्य प्रसादः-अनुग्रहो ज्ञातव्यः ॥११५२॥ याभिः श्रीमत्याः सखीभिस्तदा युवयोरनुमोदना विहिता-कृता ता इमास्तव लघुपट्टदेव्यो जाताः ॥११५३॥ एतासु अष्टसु मध्ये अष्टम्या राज्या प्राग्भवे स्वसपत्न्याः सम्मुखं सर्पेण त्वं खाद्यस्वेति कथितमासीत् तेन कर्मणा इह सा सर्प्पेण दष्टा ॥११५४॥ धर्मस्य प्रशंसाकरणेन तत्र-प्राग्भवे सप्तभिः शतैः सेवकैर्यत् शुभकर्म विहितं, तेन शुभकर्मणा गतो रोगो येषां ते गतरोगा इमे राणाख्या जाताः ॥११५५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सीहो य घायविहुरो, पालित्ता मासमणसणं दिक्खं । जाओऽहमजिअसेणो, बालत्ते तुज्झ रज्जहरो ॥११५६॥
तेणं चिअ वेरेणं, बद्धोऽहं राणएहिं एएहिं । पुव्वकयब्भासेणं, जाओ मे चरणपरिणामो ॥११५७॥
सुहपरिणामेण मए, जाइं सरिऊण संजमो गहिओ । सोऽहं उप्पन्नावहिनाणो नरनाह ! इह पत्तो ॥११५८॥
एवं जं जेण जहा, जारिसं कम्मं कयं सुहं असुहं । तं तस्स तहा तारिसमुवट्ठिअं मुणसु इत्थ भवे ॥११५९॥
तं सोऊणं सिरिपालनरवरो चिंतए सचित्तंमि । अहह अहो केरिसयं, एअं भवनाडयसरूवं ? ॥ ११६०॥

सिंहश्च नृपो घातैः-प्रहारैर्विधुरः-पीडितः सन् एकं मासं यावत् अनशनाम्-अनशनयुक्तां दीक्षां पालित्वाऽहमजितसेनो जातोऽस्मि, कीदृशोऽहं ?-बालत्वे तव राज्यहरः ॥११५६॥ तेनैव वैरेण एतै राणाख्यैः अहं बद्धो-निगडितः,पूर्वं कृतो योऽभ्यासो-दीक्षाभ्यासस्तेन मे-मम चरणपरिणामः-चारित्रपरिणामो जातः ॥११५७॥ मया शुभपरिणामेन जातिं-पूर्वजन्म स्मृत्वा संयमो गृहीतः, हे नरनाथ !- हे राजन् ! उत्पन्नमवधिज्ञानं यस्य स तथाभूतः सोऽहमिह प्राप्तः ॥११५८॥ एवं-अमुना प्रकारेण येन प्राणिना यत् शुभमशुभं यादृशं कर्म यथा कृतं तस्य प्राणिनस्तत्तादृशं कर्म अत्र-अस्मिन् भवे तथा-तेन प्रकारेण उपस्थितं-समीपस्थं मुण-जानीहि ॥११५९॥ श्रीपालो नाम नरवरो-राजा तन्मुनिवचनं श्रुत्वा स्वचित्ते चिन्तयति-अहहेति खेदे, अहो इत्याश्चर्ये, एतद् भवनाटकस्य स्वरूपं कीदृशं वर्तते ?, अतिविषममिति भावः ॥११६०॥

For Private and Personal Use Only

पभणेइ अ मे भयवं !, संपइ चरणस्स नत्थि सामत्थं । तो काऊण पसायं, मह उचिअं दिसह करणिज्जं ॥११६१॥
तो भणइ मुणिवरिंदो, नरवर ! जाणेसु निच्छयं एयं । भोगफलकम्मवसओ, इत्थ भवे नत्थि तुह चरणं ॥११६२॥
किंतु तुमं एआइं, अरिहंताई नवावि सुपयाइं । आराहंतो सम्मं, नवमं सग्गंपि पाविहिसि ॥११६३॥
तत्तोवि उत्तरुत्तर-नरसुरसुक्खाइं अणुहवंतो अ । नवमे भवंमि मुक्खं, सासयसुक्खं धुवं लहसि ॥११६४॥
तं सोऊणं राया, साणंदो निअगिहंमि संपत्तो । मुणिनाहोऽवि अ तत्तो, पत्तो अन्नत्थ विहरंतो ॥११६५॥

च - पुनः नृपः प्रभणति-कथयति, हे भगवन् ! सम्प्रति-अधुना मे -मम चरणस्य-चारित्रस्य सामर्थ्यं नास्ति, तत्-तस्मात्कारणात् प्रसादं कृत्वा ममोचितं-मम योग्यं करणीयं-कर्त्तव्यं दिश-कथय ॥११६१॥ ततो मुनिवरेन्द्रो भणति-हे नरवर ! एतं निश्चयं जानीष्व भोगः फलं येषां तानि भोगफलानि यानि कर्माणि तेषां वशतोऽत्र-अस्मिन् भवे तव चरणं-चारित्रं नास्ति ॥११६२॥ किन्तु त्वमेतानि अर्हदादीनि नवापि सुष्ठु शोभनानि पदानि सम्यक् आराधयन् नवमं स्वर्गम्-आनतारख्यमपि प्राप्स्यसि ॥११६३॥ च - पुनः ततः-तस्मादपि देवलोकात् उत्तरोत्तराणि-अधिकाधिकानि नरसुरसुखानि अनुभवन्-भुञ्जानस्त्वं नवमे भवे ध्रुवं-निश्चितं मोक्षं लभसे-प्राप्स्यसीत्यर्थः, कीदृशं मोक्षं ?-शाश्वतं-नित्यं सौख्यं यत्र स तथा तम् ॥११६४॥ तन्मुनिवचनं श्रुत्वा राजा श्रीपालः सानन्दः-आनन्दसहितः सन् निजगृहे सम्प्राप्तः, तदनन्तरं मुनिनाथो-मुनीन्द्रोऽपि विचरन् अन्यत्र-अन्यस्मिन्नगरादौ प्राप्तः ॥११६५॥

सिरिपालोऽवि हु राया, भत्तीए पिअयमाहिं संजुत्तो । पुव्वुत्तविहाणेणं, आराहइ सिद्धवरचक्कं ॥११६६॥
अह मयणसुंदरी भणइ नाह ! जइआ तए कया पुव्विं । सिरिसिद्धचक्कपूआ, तइआ नो आसि भूरि धणं ॥११६७॥
इण्हिं च तुम्ह एसा, रज्जसिरी अत्थि वित्थरसमेआ । ता कुणह वित्थरेणं, नवपयपूअं जहिच्छाए ॥११६८॥
तं सोऊणं अइगरुअभत्तिसत्तीहिं संजुओ राया । अरिहंताइपयाणां, करेइ आराहणं एवं ॥११६९॥
नव चेईहरपडिमा, जिन्नुद्धाराइ विहिविहाणेणं । नाणाविहपूआहिं, अरिहंताराहणं कुणई ॥११७०॥

श्रीपालोऽपि राजा प्रियतमाभिः -नवराज्ञीभिः संयुक्तः-सहितो भक्त्या पूर्वोक्तविधानेन-पूर्वभणितविधिना सिद्धवर-चक्रमाराधयति ॥ ११६६॥ अथ मदनसुन्दरी नृपं भणति- हे नाथ ! यदा त्वया पूर्वं श्रीसिद्धचक्रस्य पूजा कृता तदा भूरि-प्रचुरं धनं नो आसीत् ॥११६७॥ इदानीं च-साम्प्रतं पुनर्युष्माकमेषा राज्यश्रीः-राज्यलक्ष्मीर्विस्तारेण समेता-युक्ता अस्ति, तत्-तस्मात् कारणात् यथेच्छया विस्तारेण नवपदपूजां कुरुत ॥११६८॥ तद्राज्ञीवचनं श्रुत्वाऽतिगुरुके-अतिमहत्यौ ये भक्तिशक्ती ताभ्यां संयुतः-सहितो राजा एवं-वक्ष्यमाणप्रकारेण अर्हदादिपदानामाराधनां करोति ॥ ११६९ ॥ तथाहि-नव चैत्यगृहाणि- नवसङ्ख्यानि जिनगृहाणि, नव प्रतिमाः, नव जीर्णोद्धारा इत्यादिना विधिना विधानं-निर्मापणं तेन, तथा नानाविधा-अनेकप्रकारा याः पूजास्ताभिरर्हतः-अर्हत्पदस्याराधनां करोति ॥ ११७० ॥

सिद्धाणवि पडिमाणं, कारावणपूअणापणामेहिं । तग्गयमणझाणेणं, सिद्धपयाराहणं कुणइ ॥ ११७१ ॥
भत्तिबहुमाणवंदण-वेआवच्चाइकज्जमुज्जुत्तो । सुस्सूसणविहिनिउणो, आयरिआराहणं कुणइ ॥ ११७२ ॥
ठाणासणवसणाई, पढंतपाढंतयाण पूरंतो । दुविहभत्तिं कुणंतो, उवज्झायाराहणं कुणइ ॥ ११७३ ॥
अभिगमणवंदणनमंसणेहिं असणाइवसहिदाणेहिं । वेआवच्चाईहिं अ, साहुपयाराहणं कुणई ॥११७४॥
रहजत्ताकरणेणं, सुतित्थजत्ताहिं संघपूआहिं । सासणपभावणाहिं, सुदंसणाराहणं कुणइ ॥ ११७५ ॥

सिद्धानामपि याः प्रतिमाः तासां कारणं-निर्मापणं पूजना-अर्चना प्रणामो-नमस्कारस्तैस्तथा तद्गतेन-तेषु सिद्धेषु प्राप्तेन मनसा यत् ध्यानं तेन सिद्धपदस्याराधनां करोति ॥ ११७१ ॥ भक्तिः-मनसि निर्भरा प्रीतिर्बहुमानो-बाह्यप्रतिपत्तिर्वन्दनवैयावृत्त्ये प्रसिद्धे इत्यादिकार्येषु युक्त-उद्यतस्तथा शुश्रूषणस्य-सेवनस्य यो विधिस्तत्र निपुणो-दक्ष एवम्भूतः सन् आचार्यपदाराधनां करोति ॥ ११७२ ॥ पठतां पाठयतां च साध्वादीनां स्थानाशनवसनादि-निवासस्थानभोजनवस्त्रादि पूरयन् द्रव्यभावभेदतो द्विविधां भक्तिं कुर्वन् उपाध्यायपदाराधनां करोति ॥ ११७३ ॥ अभिगमनं-सम्मुखगमनं वन्दनं-स्तुतिः नमस्यनं-नमस्कारकरणं तैस्तथा अशनादीनां वसतेश्च दानैश्च पुनर्वैयावृत्त्यादिभिः साधुपदाराधनां करोति ॥ ११७४ ॥ रथयात्राकरणेन सुतीर्थयात्रादिभिः पुनः सङ्घपूजाभिस्तथा शासनस्य प्रभावनाभिः सुदर्शनं-सम्यग्दर्शनं तस्याराधनां करोति ॥ ११७५ ॥

सिद्धंतसत्थपुत्थय-कारावणरक्खणच्चणाईहिं । सज्झायभावणाइहिं, नाणपयाराहणं कुणइ ॥ ११७६ ॥
वयनिअमपालणेणं, विरइक्कपराण भत्तिकरणेणं । जइधम्मणुरागेणं, चारित्ताराहणं कुणइ ॥ ११७७ ॥
आसंसाइविरहिअं, बाहिरब्भिंतरं तवोकम्मं । जहसत्तीइ कुणंतो, सुद्धतवाराहणं कुणइ ॥ ११७८ ॥
एमेयाइं उत्तमपयाइं सो दव्वभावभत्तीए । आराहंतो सिरिसिद्धचक्कमच्चेइ निच्चंपि ॥ ११७९ ॥

सिद्धान्तशास्त्राणां ये पुस्तकास्तेषां कारणं-निर्मापणं पुनर्यत्नतो रक्षणं तथाऽर्चनं-धूपचन्दनवस्त्रादिभिः पूजनं इत्यादिस्तथा स्वाध्यायेन-वाचनादिपञ्चप्रकारेण तथा भावनाभिर्ज्ञानस्वरूपचिन्तनरूपाभिर्ज्ञानपदस्याराधनां करोति ॥ ११७६ ॥ व्रतानाम्-अणुव्रतानाम् नियमानां-अभिग्रहादीनां पालनेन तथा विरतिः-सावद्यव्यापारनिवृत्तिः सा एव एका परा-प्रकृष्टा येषां ते तेषां विरत्येकपराणां साध्वादीनां भक्तिकरणेन तथा यतिधर्म्मे-दशविधसाधुधर्मेऽनुरागेण चारित्रपदस्याराधनां करोति ॥ ११७७ ॥ आशंसा-इहपरभवसुखादिवाञ्छा तया विशेषेण रहितं बाह्यमुपवासादि आभ्यन्तरं च प्रायश्चित्तादि तपःकर्म यथाशक्ति-स्वशक्त्यनुसारेण कुर्वन् शुद्धतपसो-निर्मलतपस आराधनां करोति ॥ ११७८ ॥ एवम्-अमुना प्रकारेण स श्रीपाल एतानि उत्तमपदानि द्रव्यभावभक्त्या आराधयन् नित्यं-निरन्तरमपि श्रीसिद्धचक्रमर्चयति-पूजयति ॥ ११७९ ॥

एवं सिरिपालनिवस्स सिद्धचक्कच्चणं कुणंतस्स । अधपंचमवरिसेहिं, जा पुन्नं तं तवोकम्मं ॥ ११८० ॥
तत्तो रन्ना निअरज्जलच्छिवित्थारगरुअसत्तीए । गुरुभत्तीए कारिउमारद्धं तस्स उज्जमगं ॥ ११८१ ॥
कत्थवि विच्छिन्ने जिणहरंमि काउं तिवेइअं पीढं । विच्छिण्णं वरकुट्टिमधवलं नवरंगकयचित्तं ॥ ११८२ ॥
सालिपमुहेहिं धन्नेहिं पंचवन्नेहिं मंतपूएहिं । रइऊण सिद्धचक्कं, संपुन्नं चित्तचुज्जकरं ॥ ११८३ ॥

एवं-अमुना प्रकारेण सिद्धचक्रस्य अर्चनं-पूजनं कुर्वतः श्रीपालनृपस्य अर्द्धपञ्चमवर्षैः-सार्द्धैश्चतुर्भिः संवत्सरैर्यावत्ततपःकर्म पूर्णं-पूर्णीभूतम्, अर्द्धं पञ्चमं येषु तानि अर्द्धपञ्चमानि, अर्द्धपञ्चमानि यानि वर्षाणि तैरिति विग्रहः ॥ ११८० ॥ ततः-तदनन्तरं राज्ञा श्रीपालेन निजराज्यलक्ष्म्या यो विस्तारस्तेन या गुरुका-महती शक्तिस्तया पुनर्गुर्व्या-महत्या भक्त्या तस्य तपस उद्यापनं कारयितुमारब्धम् ॥ ११८१ ॥ कुत्रापि विस्तीर्णे जिनगृहे तिस्रो वेदिका यत्र तत् त्रिवेदिकं विस्तीर्णं वरकुट्टिमेन-प्रधानबद्धभूम्या धवलम्-उज्ज्वलं पुनर्नवरङ्गैः-नवीनरञ्जकद्रव्यैः कृतानि चित्राणि-आलेख्यानि यत्र तत्तथाभूतं पीठं कृत्वा ॥ ११८२ ॥ मन्त्रैः पूतानि-पवित्राणि मन्त्रपूतानि तैः पञ्चवर्णैः शालिप्रमुखैर्धान्यैः चित्तचोज्जकरं सम्पूर्णं सिद्धचक्रं रचयित्वेति सम्बन्धः, पश्यतां जनानां चित्ते चोज्जम्-आश्चर्यं करोतीति विग्रहः ॥ ११८३ ॥

तत्थ य अरिहंताइसु, नवसु पएसुं ससप्पिखंडाइ । नालियरगोलयाइं, सामन्नेणं ठविज्जंति ॥११८४॥
तेण पुणो नरवइणा, मयणासहिएण वरविवेएण । ताइंपि गोलयाइं, विसेससहियाइं ठवियाइं ॥११८५॥
जहा- अरिहंतपए धवले, चंदणकप्पूरलेवसिअवन्नं । अडकक्केअणचउतीसहीरयं गोलयं ठविअं ॥११८६॥
सिद्धपए पुण रत्ते, इगतीसपवालमट्ठमाणिक्कं। नवरंगघुसिणविहिअप्पलेवगुरुगोलयं ठवियं ॥११८७॥

तत्र-सिद्धचक्रेऽर्हदादिषु नवसु पदेषु सामान्येन सर्पिः-घृतं खण्डश्च-मधुधूलिस्ताभ्यां सहितानि भूतानि ससर्पिःखण्डानि नारिकेलफलानि स्थाप्यन्ते ॥ ११८४ ॥ तेन पुनर्नरपतिना-राज्ञा श्रीपालेन मदनसुन्दरीसहितेन तान्यपि गोलकानि विशेषवस्तुयुक्तानि स्थापितानि, कीदृशेन तेन ?-वरः-प्रशस्तो विवेको यस्य स तेन ॥ ११८५ ॥ कथमित्याह- यथा धवले-धवलवर्णतया व्यवस्थापितेऽर्हत्पदे चन्दनकर्पूरयोर्लेपनेन सितः-श्वेतो वर्णो यस्य तत्तथा पुनरष्टौ कर्केतनानि-श्वेतरत्नविशेषाश्चतुस्त्रिंशच्च हीरका यस्मिंस्तत्तथाभूतं गोलकं स्थापितं, अत्रायं भावः- अष्टप्रातिहार्याऽपेक्षयाऽष्टौ कर्क्केतनानि चतुस्त्रिंशदतिशयापेक्षया तावन्तो हीरका इति ॥ ११८६ ॥ रक्ते-रक्तवर्णतया व्यवस्थापिते सिद्धपदे, पुनः एकत्रिंशत्-विद्रुमा यत्र तत्तथा, पुनरष्टौ माणिक्यानि यत्र तत्तथा, पुनर्नवरङ्गं-नवीनरक्तत्वयुक्तं यद् घुसृणं-कुङ्कुमं तेन विहितः प्रलेपः-प्रकृष्टलेपो यस्य तत् तथाभूतं गुरु-महत् गोलकं स्थापितं, अष्टकर्मक्षयोत्पन्नाष्टगुणापेक्षयाऽष्टौ माणिक्यानि, एकत्रिंशद्गुणापेक्षया तावन्तः प्रवाला इति ॥ ११८७ ॥

कणयाभे सूरिपए, गोलं गोमेअपंचरयणजुअं । छत्तीसकणयकुसुमं, चंदणघुसिणंकियं ठविअं ॥११८८॥
उज्झायपए नीले, अहिलयदलनीलगोलयं ठविअं । चउरिंदनीलकलिअं मरगयपणवीसपयगजुयं ॥११८९॥
साहुपए पुण सामे, समयमयं पंचरायपट्टंकं । सगवीसइरिट्ठमणिं, भत्तीए गोलयं ठविअं ॥११९०॥

कनकं-सुवर्णं तद्वत् आभा-प्रभा यस्य तत् कनकाभं, तस्मिन् सूरिपदे-आचार्यपदे गोमेदाख्यानि यानि पञ्च रत्नानि तैर्युतं षट्त्रिंशत्कनककुसुमानि-स्वर्णपुष्पाणि यस्मिंस्तत्तथा, पुनश्चन्दनघुसृणाभ्याम् अङ्कितं-लिप्तम् ईदृशं गोलकं स्थापितं, ज्ञानादिपञ्चाचारयुक्तत्वात् पञ्च गोमेदरत्नानि षट्त्रिंशद्गुणोपेतत्वात्तावन्ति स्वर्णपुष्पाणीति ॥ ११८८ ॥ नीले-नीलवर्णतया व्यवस्थापिते उपाध्यायपदेऽहिलता-नागवल्ली तस्या दलैः-पत्रैर्नीलं-नीलवर्णं गोलकं स्थापितम्, कीदृशं गोलकम् ?-चतुर्भिरिन्द्रनीलैः-नीलमणिभिः कलितं-युक्तं, पुनः मरकतानां-हरिमणीनां पञ्चविंशतिरेव मध्यवर्तिपदकं तेन युतं-युक्तं, द्रव्यानुयोगादिचतुरनुयोगयुक्तत्वाच्चत्वार इन्द्रनीलाः पञ्चविंशतिगुणयुक्तत्वात्तावन्तो मरकतमणय इति ॥ ११८९ ॥ श्यामे-श्यामवर्णतया व्यवस्थापिते साधुपदे पुनः सह मृगमदेनेति समृगमदं-कस्तूर्या लिप्तमित्यर्थः, पुनः पञ्चभिः राजपट्टैः- वैराटरत्नैरङ्को-भूषा यस्य तत्तथा, यद्वा पञ्च राजपट्टा अङ्के- उत्सङ्गे अर्थान्मध्ये यस्य तत्तथा, पुनः सप्तविंशतिः रिष्ठमणयः-श्यामरत्नविशेषा यस्मिंस्तत्तथाभूतं गोलकं भक्त्या स्थापितम्, पञ्चमहाव्रताऽपेक्षया पञ्च राजपट्टाः, सप्तविंशतिगुणाऽपेक्षया तावन्तो रिष्ठमणय इति ॥ ११९० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेसेसु सिअपएसुं, चंदणसिअगोलए ठवइ राया । सगसट्ठिगवन्नसयरिपन्न-मुत्ताहलसमेए ॥११९१॥
अन्नं च नवपयाणं, उद्देसेणं नरेसरो तत्थ । तत्तव्वन्नाइं सुमेरुमालाचीराइं मंडेइ ॥११९२॥
सोलस अणाहएसु अ, गरुआइं सक्कराइं लिंगाइं । मंडावेइ नरिंदो, नाणामणिरयणचित्ताइं ॥११९३॥

शेषेषु दर्शनादिषु चतुर्षु सितपदेषु-श्वेततया व्यवस्थापितेषु राजा श्रीपालः चन्दनेन सितानि-धवलानि गोलकानि स्थापयति, कीदृशानि गोलकानि ?-सप्तषष्ट्या ६७ एकपञ्चाशता ५१ सप्तत्या ७० पञ्चाशता ५० च मुक्ताफलैः समेतानि-भृतानि, अयं भावः- दर्शनादिपदेषु भेदापेक्षया क्रमेणैतावन्ति मुक्ताफलानि गोलकेषु-भृतानि, यतः सम्यग्दर्शनस्य चउसद्दहण - तिलिंगमित्यादिकाः सप्तषष्टिर्भेदाः, ज्ञानस्य स्पर्शनेन्द्रियव्यञ्जनावग्रहमतिज्ञानमित्यादिकाः ५१ भेदाः, चारित्रस्य वयसमणधम्मसंजमेत्यादिकाः सप्ततिर्भेदाः ७० तपस इत्वरानशनतप इत्यादिकाः ५० भेदाः ॥ ११९१ ॥ अन्यच्च नरेश्वरो-राजा श्रीपालो नवपदानाम् उद्देशेन-नवपदानि उद्दिश्य-आश्रित्येत्यर्थः, तत्र-तस्मिन्पीठे तत्तद्वर्णानि सुमेरुमालाचीराणि मण्डयति ॥ ११९२ ॥ च - पुनः षोडशसु अनाहतेषु षोडशैव गुरुकाणि-महान्ति शर्करायाः-सितोपलाया लिङ्गानि नाना-बहुप्रकारैर्मणिरत्नैश्चित्राणि-विचित्राणि नरेन्द्रो-राजा श्रीपालो मण्डयति ॥ ११९३ ॥

For Private and Personal Use Only

इगसोलसपंचसु सीइ दोसु चउसट्ठि सरसदक्खाओ । कणयकच्चोलिआइं, मंडावइ अट्ठवग्गेसु ॥११९४॥
मणिकणगनिम्मिआइं, नरनाहो अट्ठ बीअपूराइं । वग्गंतरगयपढमे, परमिट्ठिपयंमि ठावेइ ॥११९५॥
खारिक्कपुंजयाइं, ठावइ अडयाललद्धिठाणेसु । गुरुपाउआसु अट्ठसु, नाणाविहदाडिमफलाणि ॥११९६॥
नारिंगाइफलाइं, जयाइठाणेसु अट्ठसु ठवेइ । चत्तारि उ कोहलए, चक्काहिट्ठायगपएसु ॥११९७॥

अष्टसु वर्गेषु एकस्मिन्प्रथमे वर्गे अवर्गाख्ये षोडश सरसद्राक्षाः, ततः पञ्चसु वर्गेषु प्रत्येकं षोडश षोडश विन्यासादशीतिर्द्राक्षाः, तयोर्द्वयोर्वर्गयोः-यवर्गशवर्गयोः प्रत्येकं द्वात्रिंशद्वात्रिंशद्विन्यासात् चतुष्षष्टिः सरसद्राक्षाः कनककच्चोलिकाभिर्मण्डयति ॥ ११९४ ॥ नरनाथो-राजा श्रीपालो मणिकनकाभ्यां निर्मितानि-रचितानि अष्टौ बीजपूरकफलानि वर्ग्गाणाम् अन्तरेषु मध्येषु गते-प्राप्ते प्रथमे-आद्ये परमेष्ठिपदे 'नमो अरिहंताण' मित्याकारके स्थापयति ॥ ११९५ ॥ अष्टचत्वारिंशतूलब्धिस्थानेषु खारिकफलपुञ्जानि स्थापयति, तथा अष्टसु गुरुपादुकासु नानाविधानि-बहुप्रकाराणि दाडिमफलानि स्थापयति ॥ ११९६ ॥ तथाऽष्टसु जयादिस्थानेषु नारङ्गादिफलानि स्थापयति, च - पुनः चक्रस्य-सिद्धचक्रस्य अधिष्ठायकपदेषु विमलस्वामिचक्रेश्वरीक्षेत्रपालादिषु चत्वारि कूष्माण्डकफलानि स्थापयति ॥ ११९७ ॥

आसन्नसेवयाणं, देवीणं बारस य वयंगाइं । विज्जसुरिजक्खजक्खिणि- चउसट्ठिपएसु पूगाइं ॥११९८॥
पीअबलीकूडाइं चत्तारि दुवारपालगपएसु । कसिणबलीकूडाइं, चउवीरपएसु ठविआइं ॥११९९॥
नवनिहिपएसु कंचणकलसाइं विचित्तरयणपुन्नाइं । गहदिसिवालपएसु अ, फलफुल्लाइं सवन्नाइं ॥१२००॥
इच्चाइगुरुअवित्थर-सहिअं मंडाविऊणमुज्जमणं । ण्हवणूसवं नरिंदो, कारावइ वित्थरविहीए ॥१२०१॥

तथा-आसन्नसेवकानां-निकटसेवाकारिकाणां द्वादशदेवीनां द्वादश च वयङ्गानि-फलविशेषान् स्थापयति, चतुर्थाधिष्ठायकस्य द्वादशदेवीनां च नामानि न ज्ञायन्ते, तथाविधसम्प्रदायाभावात्, तथा 'विज्जसुरि' त्ति विद्यादेव्यः षोडश यक्षाश्चतुर्विंशतिः शासनसुराः यक्षिण्यश्चतुर्विंशतिरेव शासनदेव्यः एवमेतेषु चतुष्षष्टिपदेषु पूगानि-क्रमुकफलानि स्थापयति ॥ ११९८ ॥ चतुर्षु द्वारपालकपदेषु कुमुदादिषु चत्वारि पीतस्य-पीतवर्णस्य बलेः-पक्वान्नादेः कूटानि-पुञ्जानि स्थापितानि, तथा चतुर्षु वीरपदेषु-माणिभद्रादिषु कृष्णवर्णस्य बलेः-पक्वान्नादेः कूटानि स्थापितानि ॥ ११९९ ॥ नवनिधिपदेषु विचित्रै रत्नैः पूर्णानि-भृतानि काञ्चनस्य-सुवर्णस्य कलशानि स्थापितानि, तथा ग्रहपदेषु दिक्पालपदेषु च स्वस्ववर्णानि फलपुष्पाणि स्थापितानि ॥ १२०० ॥ इत्यादिना गुरुकेण-महता विस्तारेण सहितमुद्यापनं मण्डयित्वा नरेन्द्रो-राजा श्रीपालो विस्तारविधिना स्नपनोत्सवं-स्नात्रमहोत्सवं कारयति ॥ १२०१ ॥

विहिआए पूआए, अट्ठपयाराइ मंगलावसरे। संघेण तिलयमाला, मंगलकरणं कयं रन्नो ॥१२०२॥
तओ- जो धुरि सिरि अरिहंतमूलदढपीढपइट्ठिओ। सिद्धसूरिउवज्झायसाहुचसाहगरिट्ठिओ ॥
दंसणनाणचरित्ततवहिं पडिसाहहिं सुंदरु। तत्तक्खरसरवग्गलद्धिगुरुपयदलडंबरु ॥
दिसिवालजक्खजक्खिणि-पमुहसुरकुसुमेहिं अलंकिओ। स सिद्धचक्कगुरुकप्पतरु अम्हह मणवंछिअ दिअओ ॥१२०३॥
इच्चाइ नमुक्कारे, भणिऊण नरेसरो गहीरसरं। सक्कत्थयं भणित्ता, नवपयथवणं कुणइ एवं ॥१२०४॥

अष्टप्रकारायां पूजायां विहितायां-कृतायां सत्यां मङ्गलस्य अवसरे सङ्घेन राज्ञः-श्रीपालस्य तिलकमालयोः मङ्गलकरणं कृतम् ॥ १२०२ ॥ ततश्चैत्यवन्दनं करोति, तत्रादौ नमस्कारमाह- यः श्रीसिद्धचक्ररूपो गुरुः-महान् कल्पतरुः-कल्पवृक्षो धुरि-आदौ अर्हन्नेव यन्मूलदृढपीढं तत्र प्रतिष्ठितः, कीदृशो ?-यः सिद्धसूर्युपाध्यायसाधव एव चतस्रः शाखास्ताभिर्गरिष्ठः-अतिमहान्, पुनर्दर्शनज्ञानचारित्रतपोरूपाभिः प्रतिशाखाभिः सुन्दरः, पुनः तत्त्वाक्षराणि ॐकारादीनि स्वरा अवर्णादयः वर्गा अवर्गकवर्ग्गादयः लब्धिपदानि अष्टचत्वारिंशद् गुरुपदानि-अर्हत्पादुकादीनि तान्येव दलानां-पत्राणामाडम्बरो यस्य स तथा, पुनः दिक्पालयक्षयक्षिणीप्रमुखैः सुरकुसुमैः अलङ्कृतः-शोभितः स सिद्धचक्रगुरुकल्पतरुः अस्मभ्यं मनोवाञ्छितं फलं ददातु ॥ १२०३ ॥ इत्यादि नमस्कारान् भणित्वा नरेश्वरो-राजा श्रीपालो गम्भीरः स्वरो यत्र कर्म्मणि तद्यथा स्यात् तथा शक्रस्तवं भणित्वा एवं-वक्ष्यमाणप्रकारेण नवपदानां संस्तवनं करोति ॥ १२०४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उप्पन्नसन्नाणमहोमयाणं, सप्पाडिहेरासणसंठिआणं । सद्देसणाणंदियसज्जणाणं, नमो नमो होउ सया जिणाणं ॥
सिद्धाणमाणंदरमालयाणं, नमो नमोऽणंतचउक्कयाणं । सूरीण दूरीकयकुग्गहाणं, नमो नमो सुरसमप्पभाणं ॥१२०६॥

तथाहि- उत्पन्नं यत्सज्ज्ञानं-केवलज्ञानं तदेव महः-तेजस्तत्स्वरूपमेषामिति उत्पन्नसज्ज्ञानमहोमयास्तेभ्यः, पुनः प्रातिहार्यैः-छत्रचामरादिभिः सह वर्त्तते यत्तत्सप्रातिहार्यम्, ईदृशं यत् आसनं-सिंहासनं तत्र सं-सम्यक् प्रकारेण स्थितेभ्यः, पुनः सद्देशनया-सद्धर्मोपदेशेन आनन्दिताः सज्जनाः-सत्पुरुषा यैस्ते तथा तेभ्यः, ईदृशेभ्यो जिनेभ्यः-अर्हद्भ्यः सदा नमो नमो भवतु, नित्यं पुनः पुनर्नमस्कारोऽस्तु इत्यर्थः ॥ १२०५ ॥ आनन्दरमा-परमानन्दलक्ष्मीस्तस्या आलया-निवासास्तेभ्यः, पुनरनन्तं चतुष्कं ज्ञानदर्शनसम्यक्त्वाकरणवीर्यचतुष्टयं येषां ते तथा, तेभ्यः सिद्धेभ्यो नमो नमोऽस्तु, तथा दूरीकृतः कुग्रहः-कुत्सिताभिनिवेशो यैस्ते दूरीकृतकुग्रहास्तेभ्यः पुनः सूरः-सूर्यस्तेन समा-तुल्या प्रभा-ज्योतिर्येषां ते तथा तेभ्यः सूरिभ्यः-आचार्येभ्यो नमो नमोऽस्तु ॥ १२०६ ॥

For Private and Personal Use Only

सुत्तत्थवित्थारणतप्पराणं, नमो नमो वायगकुंजराणं । साहूण संसाहिअसंजमाणं, नमो नमो सुद्धदयादमाणं ॥१२०७॥

जिणुत्ततत्ते रुइलक्खणस्स, नमो नमो निम्मलदंसणस्स । अन्नाणसम्मोहतमोहरस्स, नमो नमो नाणदिवायरस्स ॥१२०८॥

आराहिआऽखंडिअसक्कियस्स, नमो नमो संजमवीरियस्स । कम्मद्दुमुम्मूलणकुंजरस्स, नमो नमो तिव्वतवोभरस्स ॥१२०९॥

सूत्रार्थयोर्विस्तारणे तत्परेभ्यः वाचका-उपाध्यायाः कुञ्जरास्ते-हस्तिन इव गणशोभाकारित्वात् समर्थत्वाच्च वाचककुञ्जरास्तेभ्यो नमो नमोऽस्तु, तथा सं-सम्यक्प्रकारेण साधितः संयमो यैस्ते तथा तेभ्यः, पुनः दया च दमश्च दयादमौ शुद्धौ दयादमौ येषां ते तथा तेभ्यः साधुभ्यो नमो नमोऽस्तु ॥ १२०७ ॥ जिनोक्ततत्त्वे या रुचिः सा लक्षणं यस्य स तथा तस्मै निर्मलदर्शनाय-उज्ज्वलसम्यग्दर्शनाय नमो नमोऽस्तु, तथाऽज्ञानेन यः सम्मोहो-मतिभ्रमः स एव तमः-अन्धकारं तत् हरतीति अज्ञानसंमोहतमोहरस्तस्मै ज्ञानदिवाकराय-ज्ञानसूर्याय नमो नमोऽस्तु ॥ १२०८ ॥ तथा संयमे-संयमविषये यद्वीर्य-पराक्रमस्तस्मै नमो नमोऽस्तु, कीदृशाय संयमवीर्याय ?-आराधिताऽखण्डिता सत्क्रिया-साध्वाचाररूपा यस्मात्तत् तथा तस्मै, तथा कर्माण्येव द्रुमा-वृक्षास्तेषां यदुन्मूलनम्-उत्खननं तत्र कुञ्जरो-हस्ती इव कर्मद्रुमोन्मूलनकुञ्जरस्तस्मै तीव्रतपोभराय नमो नमोऽस्तु ॥ १२०९ ॥

इअ नवपयसिद्धं लद्धिविज्जासमिद्धं, पयडिअसरवग्गं ह्रींतिरेहासमग्गं ।
दिसिवइसुरसारं खोणिपीढावयारं, तिजयविजयचक्कं सिद्धचक्कं नमामि ॥१२१०॥
वज्जंतएहिं मंगलतूरेहिं सासणं पभावंतो । साहम्मिअवच्छल्लं, करेइ वरसंघपूअं च ॥१२११॥
एवं सो नरनाहो, सहिओ ताहिं च पट्टदेवीहिं । अन्नेहिवि बहुएहिं, आराहइ सिद्धवरचक्कं॥१२१२॥
अह तस्स मयणसुंदरि-पमुहाहिं राणियाहिं संजाया । नव निरुवमगुणजुत्ता, तिहुअणपालाइणो पुत्ता ॥१२१३॥

इति-अमुना प्रकारेण नवपदैः सिद्धं-निष्पन्नं पुनर्लब्धिभिः-लब्धिपदैः-विद्यादेवीभिश्च समृद्धं-समृद्धियुक्तं, पुनः प्रकटिताः-प्रकटीकृताः स्वरा वर्गाश्च यस्मिंस्तत्तथा, पुनः ह्रीं इत्यक्षरस्य समन्ताद् यास्तिस्रो रेखास्ताभिः समग्रं-सम्पूर्णं, पुनः दिक्पतिभिः-दिक्पालैः सुरैश्च-शेषसुरैः सारं-प्रधानं, पुनः क्षोणिपीठे-पृथ्वीपीठे अवतारः-अवतरणं यस्य तत्तथा, पुनस्त्रिजगतः-त्रिभुवनस्य विजये-विजयार्थं चक्रमिव त्रिजगद्विजयचक्रम्, ईदृशं सिद्धचक्रमहं नमामि ॥१२१०॥ इति श्रीसिद्धचक्रस्तवः । मङ्गलतूरैः-मङ्गलवाद्यैर्वाद्यमानैः शासनं-जिनमतं प्रभावयन्-उद्दीपयन् राजा श्रीपालः साधर्म्मिकवात्सल्यं च -पुनर्वरां-प्रधानां सङ्घपूजां करोति ॥ १२११ ॥ एवम्-अमुना प्रकारेण स नरनाथो-राजा श्रीपालस्ताभिश्च पट्टदेवीभिः सहितोऽन्यैरपि बहुभिर्लोकैः सहितः सिद्धवरचक्रमाराधयति ॥ १२१२ ॥ अथ-अनन्तरं तस्य राज्ञो मदनसुन्दरीप्रमुखाभिः राज्ञीभिर्निरुपमगुणैर्युक्तास्त्रिभुवनपालादयो नव पुत्राः सञ्जाताः ॥ १२१३ ॥

गयरहसहस्सनवगं, नव लक्खाइं च जच्चतुरयाणं । पत्तीणं नवकोडी, तस्स नरिंदस्स रज्जंमि ॥१२१४॥
एवं नवनवलीलाहिं चेव सुक्खाणि अणुहवंतो सो । धम्मनीईइ पालइ, रज्जं निक्कंटयं निच्चं ॥१२१५॥
रज्जं च तस्स पालंतयस्स सिरिपालनरवरिंदस्स । जायाइं जाव सम्मं, नव वाससयाइं पुन्नाइं ॥१२१६॥
ताव निवो तं तिहुअणपालं रज्जंमि ठावइत्ताणं । सिरिसिद्धचक्कनवपयलीणमणो संथुणइ एवं ॥१२१७॥
सेसतिभवेहिं मणुएहिं जेहिं विहियारिहाइठाणेहिं । अज्जिज्जइ जिणगुत्तं, ते अरिहंते पणिवयामि ॥१२१८॥

तस्य श्रीपालस्य नरेन्द्रस्य-राज्ञो गजानां-हस्तिनां रथानां च प्रत्येकं सहस्रनवकमासीत्, नव सहस्राणि गजाः नव सहस्राण्येव रथाश्चासन्नित्यर्थः, च - पुनः जात्यतुरगाणां-सुलक्षणाश्वानां नव लक्षाणि आसन्, पत्तीनां-पदातीनां नवकोटय आसन् ॥ १२१४ ॥ एवम्-अमुना प्रकारेण नवनवलीलाभिः-नवनवक्रीडाभिरेव सुखानि अनुभवन् स श्रीपालो धर्मनीत्या-धर्मन्यायेन नित्यं निष्कण्टकं राज्यं पालयति ॥ १२१५ ॥ राज्यं पालयतस्तस्य च श्रीपालनरवरेन्द्रस्य यावन्नववर्षशतानि सम्यग् पूर्णानि जातानि ॥ १२१६ ॥ तावन्नृपः श्रीपालस्तं पूर्वोक्तं त्रिभुवनपालं-स्वज्येष्ठपुत्रं राज्ये स्थापयित्वा श्रीसिद्धचक्रे यानि नवपदानि तेषु लीनं-लग्नं मनो यस्य स सिद्धचक्रनवपदलीनमनाः सन् एवं-वक्ष्यमाणप्रकारेण संस्तौति ॥ १२१७ ॥ शेषाः-अवशिष्टास्त्रयो भवा येषां ते पुनर्विहितानि-कृतानि सेवितानीति यावत् अर्हदादिस्थानानि-विंशतिस्थानकानि यैस्ते तथा तैः, एवंभूतैर्यैर्जिनगोत्रं-जिननामकर्म अर्ज्यते-उपार्ज्यते तान् अर्हतोऽहं प्रणिपतामि-नमस्कुर्वे ॥ १२१८ ॥

जे एगभवंतरिया, रायकुले उत्तमे अवयरंति । महसुमिणसूइअगुणा, ते अरिहंते पणिवयामि ॥१२१९॥
जेसिं जम्मंमि महिमं, दिसाकुमारीओ सुरवरिंदा य । कुव्वंति पहिट्ठमणा, ते अरिहंते पणिवयामि ॥१२२०॥
आजम्मंपि हु जेसिं, देहे चत्तारि अइसया हुंति । लोगच्छेरयभूया ते अरिहंते पणिवयामि ॥१२२१॥
जे तिहुनाणसमग्गा, खीणं नाऊण भोगफलकम्मं । पडिवज्जंति चरित्तं, ते अरिहंते पणिवयामि ॥१२२२॥
उवउत्ता अपमत्ता, सिअझाणा खवगसेणिहयमोहा । पावंति केवलं जे, ते अरिहंते पणिवयामि ॥१२२३॥

ये एकभवान्तरिता उत्तमे राजकुले अवतरन्ति, कीदृशा ये ?-महास्वप्नैश्चतुर्दशभिः सूचिता-ज्ञापिता गुणा येषां ते तथा तानर्हतः प्रणिपतामि-प्रणमामि ॥ १२१९ ॥ येषां जन्मनि महिमां महिमानं वा दिक्कुमार्य्यः षट्पञ्चाशत् सुरवरेन्द्राश्च चतुष्षष्टिः प्रहृष्टं-प्रकर्षेण हर्षितं मनो येषां ते प्रहृष्टमनसः सन्तः कुर्वन्ति, तानर्हतः प्रणिपतामीति पूर्ववत् ॥ १२२० ॥ हु इति निश्चितं, येषां देहे-शरीरे आजन्मापि-जन्मत आरभ्यापि लोके आश्चर्यभूताश्चत्वारोऽतिशया भवन्ति, 'तेषां च देहोऽद्भुतरूपगन्ध' इत्यादयस्तानर्हतः प्रणिपतामि ॥ १२२१ ॥ ये त्रिभिर्ज्ञानैः-मतिश्रुतावधिभिः समग्राः-सम्पूर्णाः सन्तो भोगः फलं यस्य तद्भोगफलं कर्म क्षीणं ज्ञात्वा चारित्रं प्रतिपद्यन्ते-अङ्गीकुर्वन्ति तानर्हतः प्रणिपतामि ॥ १२२२ ॥ ये उपयुक्ता-उपयोगयुताः पुनरप्रमत्ताः-प्रमादरहिताः पुनः सितं -शुक्लं ध्यानं येषां ते सितध्यानाः अत एव क्षपकश्रेण्या हतो मोहो यैस्ते तथा, ईदृशाः सन्तः केवलज्ञानं प्राप्नुवन्ति, तानर्हतः प्रणिपतामि ॥ १२२३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कम्मक्खइया तह सुरकया य जेसिं च अइसया हुंति । एगारसगुणवीसं, ते अरिहंते पणिवयामि ॥१२२४॥
जे अट्ठपाडिहारेहिं सोहिया सेविया सुरिंदेहिं । विहरंति सया कालं, ते अरिहंते पणिवयामि ॥१२२५॥
पणतीसगुणगिराए, जे अ विबोहं कुणंति भव्वाणं । महिपीढे विहरंता, ते अरिहंते पणिवयामि ॥१२२६॥
अरहंता वा सामन्नकेवला अकयकयसमुग्घाया । सेलेसीकरणेणं, होऊणमयोगिकेवलिणो ॥१२२७॥
जे दुचरिमंमि समए, दुसयरिपयडीओ तेरस अ चरमे । खविऊण सिवं पत्ता, ते सिद्धा दिंतु मे सिद्धिं ॥१२२८॥

चः - पुनः येषां कर्मक्षयजाः-कर्मक्षयोत्पन्ना एकादश अतिशया भवन्ति, तथा सुरैः-देवैः कृताश्च एकोनविंशतिरतिशया भवन्ति, तानर्हतः प्रणिपतामि ॥ १२२४ ॥ ये 'अष्टप्रातिहार्यैः' अशोकवृक्षादिभिः शोभिताः पुनः सुरेन्द्रैः सेविताः सदा कालं विचरन्ति, तानर्हतः प्रणिपतामि ॥ १२२५ ॥ पञ्चत्रिंशद्गुणाः यस्यां सा पञ्चत्रिंशद्गुणा या गीः-वाणी तया ये च भव्यानां विबोधं-विशिष्टज्ञानं कुर्वन्ति, कीदृशाः सन्तः ?-महीपीठे-पृथ्वीपीठे विचरन्तस्तानर्हतः प्रणिपतामि ॥ १२२६ ॥ अर्हन्तः तीर्थङ्करा वा अथवा सामान्यकेवलिनः अकृतः कृतो वा समुद्घातः-केवलिसमुद्घातो यैस्ते तथा एवम्भूता ये योगीन्द्राः शैलेशीकरणेन-आत्मप्रदेशस्थिरीकरणरूपेण अयोगिकेवलिनो भूत्वा ॥ १२२७ ॥ द्विचरमे-आयुःक्षयसमयात् प्राक्तने समये द्वासप्ततिं ७२ प्रकृतीर्नामाद्यघातिकर्मोत्तरप्रकृतीः क्षपयित्वा चः - पुनः चरमे समये त्रयोदश प्रकृतीः क्षपयित्वा शिवं-मोक्षं प्राप्ताः, ते सिद्धा मे-मह्यं मुक्तिं ददतु ॥ १२२८ ॥

For Private and Personal Use Only

चरमंगतिभागोणावगाहणा जे अ एगसमयंमि । संपत्ता लोगग्गं, ते सिद्धा दिंतु मे सिद्धिं ॥१२२९॥
पुव्वपओग असंगा, बंधणछेया सहावतो वावि । जेसिं उड्ढा हु गई, ते सिद्धा दिंतु मे सिद्धिं ॥१२३०॥
ईसीपब्भाराए, उवरिं खलु जोयणंमि लोगंते । जेसिं ठिई पसिद्धा ते सिद्धा दिंतु मे सिद्धिं ॥१२३१॥
जे अ अणंता अपुणब्भवा य असरीरया अणाबाहा । दंसणनाणुवउत्ता, ते सिद्धा दिंतु मे सिद्धिं ॥१२३२॥

चरमा-अन्तिमा अङ्गस्य-शरीरस्य त्रिभागेन ऊनावगाहना-देहमानं येषां ते तथा, ये च ईदृशाः सन्तः एकस्मिन्समये लोकाग्रं सम्प्राप्तास्ते सिद्धा मे सिद्धिं ददतु ॥ १२२९ ॥ पूर्वप्रयोगतो धनुर्मुक्तबाणवत्, तथाऽसङ्गात्-निःसङ्गतया कर्ममलापगमेन अलाबुद्रव्यवत्, तथा बन्धनच्छेदात्-कर्मबन्धनच्छेदनेन एरण्डफलवत्, तथा स्वभावतो वापि धूमवत्, येषां ऊर्ध्वा गतिः प्रवर्त्तते ते सिद्धा मे सिद्धिं ददतु ॥ १२३० ॥ ईषत्प्राग्भारायाः-सिद्धिशिलाया उपरि खलु-निश्चयेन एकस्मिन् योजने लोकान्तोऽस्ति, तत्र येषां स्थितिः-अवस्थानं प्रसिद्धमस्ति ते सिद्धा मे सिद्धिं ददतु ॥ १२३१ ॥ चः - पुनः येऽनन्ताः, पुनरपुनर्भवाः-न विद्यते पुनर्भवो येषां ते तथा, पुनरशरीरका-न विद्यते शरीरं येषां ते तथा, पुनरनाबाधा-न विद्यते आबाधा-पीडा येषां ते तथा, पुनर्दर्शनं च ज्ञानं च दर्शनज्ञाने तयोरुपयुक्ता दर्शनज्ञानोपयुक्ताः, येषां प्रथमसमये ज्ञानोपयोगो द्वितीयसमये दर्शनोपयोगोऽस्ति, ते सिद्धा मे सिद्धिं ददतु ॥ १२३२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जेऽणंतगुणा विगुणा, इगतीसगुणा अ अहव अट्ठगुणा । सिद्धाणंतचउक्का, ते सिद्धा दिंतु मे सिद्धिं ॥१२३३॥
जह नगरगुणे मिच्छो, जाणंतोऽवि हु कहेउमसमत्थो । तह जेसिं गुणे नाणी, ते सिद्धा दिंतु मे सिद्धिं ॥१२३४॥
जे अ अणंतमणुत्तरमणोवमं सासयं सयाणंदं । सिद्धिसुहं संपत्ता, ते सिद्धा दिंतु मे सिद्धिं ॥१२३५॥
जे पंचविहायारं, आयरमाणा सया पयासंति । लोयाणणुग्गहत्थं, ते आयरिए नमंसामि ॥१२३६॥

ये सिद्धा अनन्तगुणा-अनन्ता ज्ञानादयो येषु ते तथा, पुनर्विगुणा-विगता वर्णादयो गुणा येभ्यस्ते तथा, च -पुनरेकत्रिंशत् संस्थानवर्णादिप्रतिषेधरूपा एव गुणा येषु ते तथा, अथवाऽष्टगुणा-अष्टकर्मक्षयसमुद्भवा अष्टौ गुणा येषु ते तथा, पुनः सिद्धं-निष्पन्नम् अनन्तचतुष्कं-प्रागुक्तलक्षणं येषां ते तथा, ते सिद्धा मे सिद्धिं ददतु ॥ १२३३ ॥ यथा म्लेच्छो नगरगुणान्-प्रासादनिवासमधुररसभोजनादीन् जानन्नपि अन्येषां म्लेच्छानां पुरस्तात् कथयितुम् असमर्थः-समर्थो न भवति, तथा - तेन प्रकारेण येषां सिद्धानां गुणान् जानन्नपि ज्ञानी कथयितुं न समर्थो भवति, ते सिद्धा मे सिद्धिं ददतु ॥ १२३४ ॥ ये च सिद्धिसुखं-मुक्तिसुखं सम्प्राप्तास्ते सिद्धा मे-मह्यं सिद्धिं ददतु, कीदृशं सिद्धिसुखम् ?-'अनन्तं' न विद्यते अन्तो-नाशो यस्य तत्तथा, पुनः 'अनुत्तरं' न विद्यते उत्तरम्-उत्कृष्टं यस्मात्तत्तथा, पुनः 'अनुपमं' न विद्यते उपमा यस्य तत्तथा, पुनः 'सदानन्दं' सदा-सर्वस्मिन्काले आनन्दो यत्र तत्तथा ॥ १२३५ ॥ ये ज्ञानादिपञ्चविधाचारम् आचरन्तो लोकानामनुग्रहार्थं सदा प्रकाशयन्ति-प्रकटीकुर्वन्ति तान् आचार्यान् अहं नमस्यामि-नमस्करोमि ॥ १२३६ ॥

For Private and Personal Use Only

देसकुलजाइरूवाइएहिं बहुगुणगणेहिं संजुत्ता । जे हुंति जुगे पवरा, ते आयरिए नमंसामि ॥१२३७॥
जे निच्चमप्पमत्ता, विगहविरत्ता कसायपरिचत्ता । धम्मोवएससत्ता, ते आयरिए नमंसामि ॥१२३८॥
जे सारणवारणचोयणाहिं पडिचोयणाहिं निच्चंपि । सारंति नियं गच्छं, ते आयरिए नमंसामि ॥१२३९॥
जे मुणियसुत्तसारा, परोवयारिक्कतप्परा दिंति । तत्तोवएसदाणं, ते आयरिए नमंसामि ॥१२४०॥

ये देशकुलजातिरूपादिकैर्बहुभिर्गुणानां गणैः-समूहैः संयुक्ताः-सहिताः सन्तः युगे प्रवरा-मुख्या भवन्ति, तानाचार्यान् अहं नमस्यामि ॥ १२३७ ॥ ये नित्यम् अप्रमत्ताः-प्रमादरहिताः, पुनः विकथा-राजकथादिकास्ताभ्यो विरक्ताः, पुनः परित्यक्ताः कषायाः-क्रोधादयो यैस्ते तथा, पुनर्धर्मोपदेशे सक्ता-लग्नाः यद्वा शक्ताः-समर्थास्तानाचार्यान्नमस्यामि ॥ १२३८ ॥ ये आचार्याः स्मारणावारणाचोदनादिभिः पुनः प्रतिचोदनादिभिर्नित्यमपि निजं गच्छं सारयन्ति, तत्र विस्मृतस्य स्मारणं स्मारणा, अशुद्धं पठतो वारणं वारणा, अध्ययनाद्यर्थं प्रेरणं चोदना, कठोरवचनैः प्रेरणं प्रतिचोदना, इत्थं स्मारणादिभिर्ये स्वगच्छस्य रक्षणं कुर्वन्ति तानाचार्यान्नमस्यामि ॥ १२३९ ॥ मुणितो-ज्ञातः सूत्राणां सारो यैस्ते तथा, अत एव परोपकारे एवैकस्मिन् तत्पराः सन्तो ये तत्त्वोपदेशदानं ददति, तानाचार्यान्नमस्यामि ॥ १२४० ॥

अत्थमिए जिणसूरे, केवलिचंदेऽवि जे पईवुव्व । पयडंति इह पयत्थे, ते आयरिए नमंसामि ॥१२४१॥
जे पावभरक्कंते, निवडंते भवमहंधकूवंमि । नित्थारयंति जीए, ते आयरिए नमंसामि ॥१२४२॥
जे मायतायबांधव-पमुहेहिंतोऽवि इत्थ जीवाणं । साहंति हिअं कज्जं, ते आयरिए नमंसामि ॥१२४३॥
जे बहुलद्धिसमिद्धा, साइसया सासणं पभावंति । रायसमा निच्चिंता, ते आयरिए नमंसामि ॥१२४४॥

जिनः-अर्हन्नेव सूरः-सूर्यस्तस्मिन् अस्तमिते - अस्तं गते सति पुनः केवली-सामान्यकेवली स एव चन्द्रस्तस्मिन्नपि अस्तमिते सति प्रदीप इव ये इह-लोके पदार्थान् प्रकटयन्ति-प्रकटीकुर्वन्ति, तानाचार्यान्नमस्यामि ॥ १२४१ ॥ पापस्य यो भरः-अतिशयस्तेन आक्रान्तान् अत एव भवः-संसार एव यो महानन्धकूपस्तस्मिन् निपततो जीवान् ये निस्तारयन्ति तानाचार्यान्नमस्यामि ॥ १२४२ ॥ अत्र-अस्मिन्संसारे ये आचार्या जीवानां मातृतातबान्धवप्रमुखेभ्यो-जननीजनकभ्रात्रादिभ्योऽपि अधिकं कार्यं साधयन्ति, तानाचार्यान्नमस्यामि ॥ १२४३ ॥ बहुभिर्लब्धिभिः समृद्धाः-समृद्धिमन्तः, अत एव सह अतिशयैर्वर्त्तन्ते इति सातिशयाः सन्तो ये शासनं-जिनमतं प्रभावयन्ति-दीपयन्ति, कीदृशा ?-ये राजसमा-नृपतुल्याः, अत एव निर्गता चिन्ता येभ्यस्ते निश्चिन्तास्तानाचार्यान्नमस्यामि ॥ १२४४ ॥

जे बारसंगसज्झाय-पारगा धारगा तयत्थाणं । तदुभयवित्थाररया, तेऽहं झाएमि उज्झाए ॥१२४५॥
पाहाणसमाणेऽवि हु, कुणंति जे सुत्तधारया सीसे । सयलजणपूयणिज्जे, तेऽहं झाएमि उज्झाए ॥१२४६॥
मोहाहिदट्ठनट्ठप्पनाणजीवाण चेयणं दिंति । जे केऽवि नरिंदा इव, तेऽहं झाएमि उज्झाए ॥१२४७॥
अन्नाणवाहिविहुराण पाणिणं सुअरसायणं सारं । जे दिंति महाविज्जा, तेऽहं झाएमि उज्झाए ॥१२४८॥
गुणवणभंजणमणगय-दमणंकुससरिसनाणदाणं जे । दिंति सया भवियाणं, तेऽहं झाएमि उज्झाए ॥१२४९॥

ये द्वादशाङ्गस्वाध्यायस्य पारगाः-पारगामिनः पुनः तदर्थानां-द्वादशाङ्ग्या अर्थानां धारकाः, पुनः तदुभयस्य-सूत्रार्थरूपस्य विस्तारे रता-रक्तास्तानुपाध्यायानहं ध्यायामि ॥ १२४५ ॥ ये गुरवो हु इति निश्चितं पाषाणसमानान्-प्रस्तरतुल्यानपि शिष्यान् सूत्रधारया-सूत्ररूपतीक्ष्णशस्त्रधारया सकलजनानां-सर्वलोकानां पूजनीयान् कुर्वन्ति, तानुपाध्यायान् अहं ध्यायामि ॥१२४६॥ मोह एव अहिः-सर्पस्तेन दष्टा, अत एव नष्टमात्मज्ञानं येषां ते नष्टात्मज्ञानाः, एवम्भूता ये जीवास्तेभ्यो ये केऽपि गुरवः चेतनां-चैतन्यं ददति, के इव ?-नरेन्द्रा इव-विषवैद्या इव, तानुपाध्यायानहं ध्यायामि ॥ १२४७ ॥ अज्ञानमेव व्याधिः-रोगस्तेन विधुराः-पीडितास्तेभ्यः प्राणिभ्यः सारं-प्रधानं श्रुतमेव रसायनं-महारोगनाशकौषधं ये महावैद्या इव गुरवो ददति तानुपाध्यायानहं ध्यायामि ॥ १२४८ ॥ गुणा एव वनानि तानि भञ्जन्तीति गुणवनभञ्जना ये मदा-जातिमदादयोऽष्टौ ते एव गजा-हस्तिनस्तेषां दमने-वशीकरणे अङ्कुशसदृशं यद् ज्ञानं तस्य दानं ये गुरवो भव्येभ्यः सदा ददति तानुपाध्यायान् अहं ध्यायामि ॥१२४९॥

दिणमासजीवियंताइं सेसदाणाइ मुणिउं जे नाणं । मुत्तितं दिंति सया, तेऽहं झाएमि उज्झाए ॥१२५०॥
अन्नाणंधे लोयाण लोयणे जे पसत्थसत्थमुहा । उग्घाडयंति सम्मं, तेऽहं झाएमि उज्झाए ॥ १२५१ ॥
बावन्नवण्णचंदण-रसेण जे लोयपावतावाइं । उवसामयंति सहसा, तेऽहं झाएमि उज्झाए ॥ १२५२ ॥
जे रायकुमरतुल्ला, गणतत्तिपरा अ सूरिपयजुग्गा । वायंति सीसवग्गं, तेऽहं झाएमि उज्झाए ॥ १२५३ ॥

शेषदानानि दिनमासजीवितान्तानि मुणित्वा - ज्ञात्वा ये गुरवः सदा मुक्त्यन्तं ज्ञानं ददति, तान् उपाध्यायानहं ध्यायामि, दिनं च मासश्च जीवितं च-दिनमासजीवितानि तेषु अन्तो येषां तानि शेषदानानि सन्ति इति ज्ञात्वा मुक्तौ अन्तो यस्य तत् मुक्त्यन्तं ज्ञानं-श्रुतज्ञानदानं ये ददति तानहं ध्यायामीति भावः ॥ १२५० ॥ ये गुरवोऽज्ञानेन अन्धानि लोकानां लोचनानि-नेत्राणि प्रशस्तशास्त्रमुखात् लोचनपक्षे प्रशस्तशस्त्रमुखात् सम्यक् उद्घाटयन्ति, तानुपाध्यायान् अहं ध्यायामि ॥ १२५१ ॥ द्वापञ्चाशद्वर्णा एव चन्दनरसः तेन ये गुरवः सहसा-अकस्मात् लोकानां पापतापान् उपशामयन्ति, तानुपाध्यायानहं ध्यायामि ॥ १२५२ ॥ ये राजकुमारतुल्याः, चः - पुनः गणतप्तिपरा-गणसमाधानकरणतत्पराः तथा सूरिपदस्य-आचार्यपदस्य योग्याः शिष्यवर्गं वाचयन्ति-शिष्यवर्गाय वाचनां ददति, तानुपाध्यायानहं ध्यायामि ॥ १२५३ ॥

जे दंसणनाणचरित्तरूवरयणत्तएण इक्केण । साहंति मुक्खमग्गं, ते सव्वे साहुणो वंदे ॥ १२५४ ॥
गयदुविहदुट्ठझाणा, जे झाइअधम्मसुक्कझाणा य । सिक्खंति दुविहसिक्खं, ते सव्वे साहुणो वंदे ॥१२५५॥
गुत्तित्तएण गुत्ता, तिसल्लरहिया तिगारवविमुक्का । जे पालयंति तिपइं, ते सव्वे साहुणो वंदे ॥१२५६॥
चउविहविगहविरत्ता जे चउविहचउकसायपरिचत्ता । चउहा दिसंति धम्मं, ते सव्वे साहुणो वंदे ॥१२५७॥

ये दर्शनज्ञानचारित्ररूपरत्नत्रयेण मोक्षमार्ग्गं साधयन्ति, कीदृशेन दर्शन० त्रयेण ?-एकेन - एकीभावं गतेन सम्मिलितेनेत्यर्थः, त्रयाणामेकत्वं विना मोक्षमार्गो न सिद्ध्यतीति भावः, तान् सर्वान् साधून् अहं वन्दे ॥ १२५४ ॥ गते द्विविधे-द्विप्रकारे दुष्टध्याने-आर्त्तरौद्राख्ये येभ्यस्ते गतद्विविधदुष्टध्यानाः, च - पुनः ध्याते धर्म्मशुक्लध्याने यैस्ते तथाभूताः सन्तो ये द्विविधशिक्षां-ग्रहणासेवनारूपां शिक्षन्ते, तान् सर्वान् साधून् वन्दे ॥ १२५५ ॥ गुप्तित्रयेण-मनोवाक्कायगुप्तिलक्षणेन गुप्ता-गुप्तिमन्तः पुनस्त्रिभिः शल्यैः-मायाशल्यादिभिः रहिता-वर्जितास्तथा त्रिभिर्गौरवैः-ऋद्धिगौरवादिभिर्विमुक्ताः सन्तो ये त्रिपदीं-ज्ञानदर्शनचारित्ररूपां पालयन्ति, तान् सर्वान् साधूनहं वन्दे ॥ १२५६ ॥ चतुर्विधाभ्यः-चतुष्प्रकाराभ्यः विकथाभ्यो-राजकथादिभ्यो विरक्ताः, पुनः चतुर्विधा-अनन्तानुबन्ध्यादिभेदाच्चतुष्प्रकारा ये चत्वारः कषायाः-क्रोधादयस्ते परित्यक्ता यैस्ते तथा, ईदृशाः सन्तो ये दानादिभेदाच्चतुर्द्धा-चतुर्भिः प्रकारैर्धर्मं दिशन्ति-प्ररूपयन्ति, तान् सर्वान् साधूनहं वन्दे ॥ १२५७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उज्झिअपंचपमाया, निज्जिअपंचिंदया य पालेंति । पंचेव समिईओ, ते सव्वे साहुणो वंदे ॥१२५८॥
छज्जीवकायरक्खण-निउणा हासाइछक्कमुक्का जे । धारंति अ वयछक्कं ते सव्वे साहुणो वंदे ॥१२५९॥
जे जियसत्तभया गयअट्ठमया नववि बंभगुत्तीओ । पालंति अप्पमत्ता, ते सव्वे साहुणो वंदे ॥१२६०॥
दसविहधम्मं तह बारसेव पडिमाओ जे अ कुव्वंति । बारसविहं तवोवि अ, ते सव्वे साहुणो वंदे ॥१२६१॥

उज्झिताः-त्यक्ताः पञ्च प्रमादा-मद्यादयो यैस्ते तथा, च - पुनः निर्जितानि पञ्चेन्द्रियाणि यैस्ते निर्ज्जितपञ्चेन्द्रियाः सन्तः पञ्चैव समितीः पालयन्ति, तान् सर्वान् साधून् वन्दे, च पादपूरणे ॥ १२५८ ॥ षड्जीवकायानां-पृथिव्यादीनां रक्षणे निपुणा-दक्षाः, च - पुनः हास्यादिषट्कात् मुक्ता-रहिताः सन्तो ये व्रतषट्कं-प्राणातिपातविरमणादिरात्रिभोजनपर्यन्तं धारयन्ति, तानित्यादि प्राग्वत् ॥ १२५९ ॥ जितानि इहलोकभयादीनि सप्त भयानि यैस्ते तथा, गता अष्टौ मदा-जातिमदादयो येभ्यस्ते गताष्टमदाः, पुनः अप्रमत्ताः-प्रमादरहिताः सन्तो ये नवापि ब्रह्मगुप्तीः पालयन्ति, तान् सर्वान् साधून् वन्दे ॥ १२६० ॥ च - पुनः ये दशविधं-दशप्रकारं धर्म्मं-क्षान्त्यादिकं, तथा द्वादशैव प्रतिमाः-साधुसम्बन्धिनीः कुर्वन्ति-धारयन्ति, च - पुनः द्वादशविधं तपोऽपि-अनशनादिकं कुर्व्वन्ति, तान् सर्वान् साधूनहं वन्दे ॥ १२६१ ॥

For Private and Personal Use Only

जे सतरसंजमंगा, उव्वूढाट्ठारसहससीलंगा । विहरंति कम्मभूमिसु, ते सव्वे साहुणो वंदे ॥१२६२॥
जं सुद्धदेवगुरुधम्मतत्तसंपत्तिसद्दहणरूवं । वण्णिज्जइ सम्मत्तं, तं सम्मद्दंसणं नमिमो ॥१२६३॥
जावेगकोडाकोडी-सागरसेसा न होइ कम्मठिई । ताव न जं पाविज्जइ, तं सम्मद्दंसणं नमिमो ॥१२६४॥
भव्वाणमद्धपुग्गल-परियट्टवसेसभवनिवासाणं ॥ जं होइ गंठिभेए, तं सम्मद्दंसणं नमिमो ॥१२६५॥
जं च तिहा उवसमिअं, खओवसमियं च खाइयं चेव । भणियं जिणिंदसमए, तं सम्मद्दंसणं नमिमो ॥ १२६६॥

सप्तदशभेदः संयमः अङ्गे-शरीरे येषां ते तथा, पुनरुद्यूढानि-उत्कर्षेण धृतानि अष्टादशसहस्रशीलाङ्गानि यैस्ते तथा, एवम्भूतास्सन्तो ये कर्मभूमिषु पञ्चदशसु विहरन्ति-विचरन्ति, तान् साधून् अहं वन्दे ॥ १२६२ ॥ शुद्धा-निर्दोषाः, देवगुरुधर्मा एतत् तत्त्वसंपत्तिः-तत्त्वसम्पत् तस्याः श्रद्धानं रूपं-स्वरूपं यस्य तत्तथाभूतं यत् सम्यक्त्वं सूत्रे वर्ण्यते तत्सम्यग्दर्शनं गुणं वयं नमामः ॥ १२६३ ॥ यावत् एककोटाकोटिसागरोपमाणि शेषाणि यस्यां सा तथाभूता कर्मस्थितिर्न भवति तावत् यन्न प्राप्यते तत्सम्यग्दर्शनं नमामः ॥ १२६४ ॥ अर्द्धपुद्गलपरावर्त्तप्रमाणोऽवशेषो भवनिवासः-संसारवासो येषां ते तथा, तेषां भव्यानां ग्रन्थेः-घनरागद्वेषपरिणामरूपस्य भेदे सति यत्सम्यक्त्वं भवति, तत्सम्यग्दर्शनं नमामः ॥ १२६५ ॥ च - पुनः यत्सम्यक्त्वं जिनेन्द्राणाम्-अर्हतां समये-सिद्धान्ते त्रिधा-त्रिभिः प्रकारैर्भणितं-कथितं, तथाहि- औपशमिकम् अन्तर्मुहूर्त्तस्थितिकं १, क्षायोपशमिकं (साधिक) षट्षष्टिसागरोपमस्थितिकं २, च - पुनः क्षायिकं त्रयस्त्रिंशत्सागरोपमस्थितिकं ३, तत्र मध्यमं पौद्गलिकम्, अन्यद्वयमपौद्गलिकं, तत्सम्यग्दर्शनं नमामः ॥ १२६६ ॥

पण वारा उवसमिअं, खओवसमियं असंखसो होइ । जं खाइअं च इक्कसि, तं सम्मद्दंसणं नमिमो ॥१२६७॥
जं धम्मदुममूलं, भाविज्जइ धम्मपुरप्पवेसं च । धम्मभवणपीढं वा, तं सम्मद्दंसणं नमिमो ॥१२६८॥
जं धम्मजयाहारं, उवसमरसभायणं च जं बिंति । मुणिणो गुणरयणनिहिं, तं सम्मद्दंसणं नमिमो ॥१२६९॥
जेण विणा नाणंपि हु, अपमाणं निष्फलं च चारित्तं । मुक्खोऽवि नेव लब्भइ, तं सम्मद्दंसणं नमिमो ॥१२७०॥
जं सद्दहाणलक्खण-भूसणपमुहेहिं बहुअभेएहिं । वण्णिज्जइ समयंमी, तं सम्मद्दंसणं नमिमो ॥१२७१॥

यत् औपशमिकम् आसंसारं पञ्च वारान् भवति, तथा क्षायोपशमिकम् असङ्ख्यवारान् भवति, च - पुनः क्षायिकम् एकशः-एकवारं भवति, तत्सम्यग्दर्शनं नमामः ॥ १२६७ ॥ यत् सम्यक्त्वं धर्मद्रुमस्य-धर्मरूपवृक्षस्य मूलं-मूलमिव भाव्यते, च - पुनः धर्मरूपपुरस्य प्रवेशं-प्रवेशद्वारमिव भाव्यते, तथा धर्मरूपं यद् भवनं-मन्दिरं तस्य पीठं वा-पीठमिव भाव्यते, तत्सम्यग्दर्शनं नमामः ॥ १२६८ ॥ तथा-यत्सम्यक्त्वं धर्मरूपस्य जगत आधारमिवाधारं मुनयो ब्रुवन्ति-कथयन्ति, च - पुनः यत्सम्यक्त्वमुपशमरूपरसस्य भाजनम्-पात्रमिव भाजनं ब्रुवन्ति, तथा-गुणा एव रत्नानि तेषां निधिरिव निधिस्तं यत्सम्यक्त्वं ब्रुवन्ति, तत् सम्यग्दर्शनं नमामः ॥ १२६९ ॥ येन सम्यक्त्वेन विना ज्ञानमपि अप्रमाणं, च - पुनश्चारित्रं निष्फलं, तथा मोक्षोऽपि नैव लभ्यते, तत् सम्यग्दर्शनं नमामः ॥ १२७० ॥ बहवो भेदा येषां ते तथा तैः, श्रद्धा ४ लक्षण ५ भूषण ५ प्रमुखैर्यत्सम्यक्त्वं समये-सिद्धान्ते वर्ण्यते, तत्सम्यग्दर्शनं वयं नमामः । परमार्थसंस्तवादीनि चत्वारि श्रद्धानानि, शमसंवेगादीनि पञ्च लक्षणानि, जिनशासने कौशलमित्यादीनि पञ्च भूषणानि ॥ १२७१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सव्वन्नुपणीयागमभणियाण जहट्ठियाण तत्ताणं । जो सुद्धो अवबोहो, तं सन्नाणं मह पमाणं ॥१२७२॥
जेणं भक्खाभक्खं, पिज्जापिज्जं अगम्ममवि गम्मं । किच्चाकिच्चं नज्जइ, तं सन्नाणं मह पमाणं ॥१२७३॥
सयलकिरिआण मूलं, सद्धा लोअंमि तीइ सद्धाए । जं किर हवेइ मूलं, तं सन्नाणं मह पमाणं ॥१२७४॥
जं मइसुअओहिमयं, मणपज्जवरूवकेवलमयं च । पंचविहं सुपसिद्धं, तं सन्नाणं मह पमाणं ॥१२७५॥

सर्वज्ञैः-अर्हद्भिः प्रणीताः-प्रज्ञप्ता ये आगमाः-सिद्धान्तास्तेषु भणितानां प्रोक्तानां यथास्थितानां-सद्भूतानां तत्त्वानाम्-जीवादिपदार्थानां यः शुद्धोऽवबोधो-ज्ञानं तत् सत् ज्ञानं मम प्रमाणमस्तीति शेषः ॥ १२७२ ॥ येन ज्ञानेन भक्ष्यं च अभक्ष्यं च ज्ञायते, तथा पेयं च अपेयं च ज्ञायते, अगम्यं गम्यमपि च वस्तु ज्ञायते, कृत्यं च अकृत्यं च ज्ञायते, तत् सत् ज्ञानं मम प्रमाणम्, अत्रायं भावः- भक्ष्यम्-अन्नादि, अभक्ष्यं-मांसादि, पेयं-वस्त्रपूतजलादि, अपेयं-सुरादि, गम्यं-स्वस्त्र्यादि, अगम्यं-परस्त्रीभगिन्यादि, कृत्यम्- अहिंसादि, अकृत्यं-हिंसादीति, ज्ञानं विना एतद्विवेको न भवतीत्यर्थः ॥ १२७३ ॥ लोके सकलक्रियाणां-सर्वशुभानुष्ठानानां मूलं श्रद्धाऽस्ति, तस्याः श्रद्धाया मूलं किलेति-निश्चयेन यद् ज्ञानं भवति, तत् सज्ज्ञानं मम प्रमाणम् ॥ १२७४ ॥ यद् ज्ञानं पञ्चविधं-पञ्चप्रकारं सुप्रसिद्धं, तदेव पञ्चविधत्वं विशेषणद्वारेणाह- कीदृशम् ?-मति १ श्रुता २ ऽवधयः ३ स्वरूपमस्येति-मतिश्रुतावधिमयं, च - पुनः मनःपर्यव ४ केवल ५ स्वरूपमस्येति मनःपर्यवकेवलमयं तत्सज्ज्ञानं मम प्रमाणम् ॥ १२७५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केवलमणोहिणंपि हु, वयणं लोयाण कुणइ उवयारं । जं सुयमइरूवेणं, तं सन्नाणं मह पमाणं ॥१२७६॥
सुयनाणं चेव दुवालसंगरूवं परूविअं जत्थ । लोयाणुवयारकरं , तं सन्नाणं मह पमाणं ॥१२७७॥
तत्तुच्चिय जं भव्वा, पढंति पाढंति दिंति निसुणंति । पूयंति लिहावंति अ, तं सन्नाणं मह पमाणं ॥१२७८॥
जस्स बलेणं अज्जवि, नज्जइ तियलोयगोयरवियारो । करगहियामलयंपिव, तं सन्नाणं मह पमाणं ॥१२७९॥
जस्स पसाएण जणा, हवंति लोयंमि पुच्छणिज्जा य । पूज्जा य वण्णणिज्जा, तं सन्नाणं मह पमाणं ॥१२८०॥

केवलमनःपर्यायावधीनामर्थात् केवलादिज्ञानत्रयधारिणामपि, वचनं यत् श्रुतमतिज्ञानरूपेण लोकानां-भव्यजन्तूनाम् उपकारं करोति तत्-तस्मात्कारणात् सत् ज्ञानम्-मतिश्रुतरूपं मम प्रमाणम् ॥ १२७६ ॥ लोकानामुपकारकम् आचारादिद्वादशाङ्गरूपं श्रुतज्ञानमेव यत्र प्ररूपितं तत् सज्ज्ञानं मम प्रमाणम् ॥ १२७७ ॥ ततः-तस्मात्कारणादेव भव्या यत् श्रुतज्ञानं पठन्ति पाठयन्ति ददति निश्रुण्वन्ति-आकर्णयन्ति पूजयन्ति लेखयन्ति च तत् सत् ज्ञानं मम प्रमाणम् ॥ १२७८ ॥ यस्य श्रुतज्ञानस्य बलेन अद्यापि त्रैलोक्यगोचरः-त्रिभुवनविषयो विचारः, करे-हस्ततले गृहीतम्, आमलकम्-आर्द्रामलकफलमिव ज्ञायते तत् सज्ज्ञानं मम प्रमाणम् ॥ १२७९ ॥ यस्य-श्रुतज्ञानस्य प्रसादेन जना-लोकाः लोके-लोकमध्ये प्रच्छनीयाः-प्रष्टुं योग्याः च - पुनः पूज्याः-पूजनीयाः च - पुनः वर्णनीया-वर्णयितुं योग्या भवन्ति, तत्सज्ज्ञानं मम प्रमाणम् ॥ १२८० ॥

For Private and Personal Use Only

जं देसविरइरूवं सव्वविरइरूवयं च अणुकमसो । होइ गिहीण जईणं, तं चारित्तं जए जयइ ॥१२८१॥
नाणंपि दंसणंपि अ, संपुण्णफलं फलंति जीवाणं । जेणं चिअ परिअरिया, तं चारित्तं जए जयइ ॥१२८२॥
जं च जईण जहुत्तरफलं सुसामाइयाइ पंचविहं । सुपसिद्धं जिणसमए, तं चारित्तं जए जयइ ॥१२८३॥
जं पडिवन्नं परिपालियं च सम्मं परूवियं दिन्नं । अन्नेसिं च जिणेहिवि, तं चारित्तं जए जयइ ॥१२८४॥
छक्खंडाणमखंडं, रज्जसिरिं चइअ चक्कवट्टीहिं । जं सम्मं पडिवन्नं, तं चारित्तं जए जयइ ॥१२८५॥

यच्चारित्रं देशविरतिरूपं च -पुनः सर्वविरतिरूपकम् अनुक्रमेण 'गृहिणां' गृहस्थानां 'यतीनां' साधूनां भवति, गृहिणां देशविरतिरूपं यतीनां सर्वविरतिरूपमित्यर्थः, तच्चारित्रं जगति जयति, सर्वोत्कर्षेण वर्त्तते इत्यर्थः ॥ १२८१ ॥ ज्ञानमपि दर्शनमपि च उभे अपि येन चारित्रेण 'परिकरिते' परिवृते एव जीवानां सम्पूर्णफलं यथा स्यात्तथा 'फलतः' फलं दत्तः, सम्पूर्णानि फलानि यत्र कर्मणि तत्तथेति क्रियाविशेषणं, तच्चारित्रं जगति जयति ॥ १२८२ ॥ च - पुनर्यच्चारित्रं 'जिनसमये' जिनसिद्धान्ते यतीनां - साधूनां सुष्ठु-शोभनं सामायिकादि 'पंचविधं' पंचप्रकारं सुतराम्-अतिशयेन प्रसिद्धं वर्त्तते 'यथोत्तरम्' उत्तरोत्तराधिकं फलं यस्य तत्तथा, तच्चारित्रं जगति जयति ॥ १२८३ ॥ जिनैरपि यच्चारित्रं 'प्रतिपन्नं' अङ्गीकृतं पुनः परिपालितं पुनः सम्यक्प्ररूपितम्-उपदिष्टम् अन्येभ्यो दत्तं च तच्चारित्रं जगति जयति ॥ १२८४ ॥ चक्रवर्त्तिभिः अखण्डां षण्णां खण्डानां राज्यश्रियं-राज्यलक्ष्मीं त्यक्त्वा यच्चारित्रं सम्यक् प्रतिपन्नम्-अङ्गीकृतं, तच्चारित्रं जगति जयति ॥ १२८५ ॥

जं पडिवन्ना दमगाइणोऽवि जीवा हवंति तियलोए । सयलजणपूयणिज्जा, तं चारित्तं जए जयइ ॥१२८६॥
जं पालेंताण मुणीसराण पाए णमंति साणंदा । देविंददाणविंदा, तं चारित्तं जए जयइ ॥१२८७॥
जं चाणंतगुणंपि हु, वण्णिज्जइ सतरभेअदसभेअं । समयंमि मुणिवरेहिं, तं चारित्तं जए जयइ ॥१२८८॥
समिईओ गुत्तीओ, खंतीपमुहाओ मित्तियाईओ । साहंति जस्स सिद्धिं, तं चारित्तं जए जयइ ॥१२८९॥

यच्चारित्रं प्रतिपन्ना-अङ्गीकृतवन्तो द्रमकादयो-रङ्कादयोऽपि जीवास्त्रैलोक्ये सकलजनानां-सर्वलोकानां पूजनीया भवन्ति तच्चारित्रं जगति जयति ॥ १२८६ ॥ यच्चारित्रं-पालयतां मुनीश्वराणां पादान्-चरणान् देवेन्द्रदानवेन्द्राः-सुरासुरेन्द्राः सानन्दाः-सहर्षाः सन्तो नमन्ति तच्चारित्रं जगति जयति ॥ १२८७ ॥ च - पुनः यच्चारित्रं अनन्ता गुणा यस्मिंस्तदनन्तगुणमपि 'हु' इति निश्चयेन समये - सिद्धान्ते मुनिवर्यैः सप्तदशभेदं दशभेदं च वर्ण्यते, सप्तदश भेदा यस्य तत्तथा, तच्च-'पञ्चाश्रवाद्विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः । दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः' ॥ १ ॥ इत्येवंरूपं, तथा दश भेदा यस्य तद्दशभेदं, तं च-'खंती मद्दव अज्जवे' त्यादिरूपं प्रसिद्धमेव, तच्चारित्रं जगति जयति ॥ १२८८ ॥ समितयः-पञ्च ईर्यासमित्याद्याः गुप्तयः-तिस्रो मनोगुप्ताद्याः क्षान्तिप्रमुखा दशयतिधर्मभेदाः, मैत्राद्याश्चतस्रो भावनाः, मैत्री - प्रमोदकरुणामाध्यस्थ्याख्याः, एते पदार्था यस्य चारित्रस्य सिद्धिं-निष्पत्तिं साधयन्ति, तच्चारित्रं जगति जयति ॥ १२८९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बाहिरमब्भिंतरयं, बारसभेयं जहुत्तरगुणं जं। वण्णिज्जइ जिणसमए, तं तवपयमेस वंदामि ॥ १२९०॥
तब्भवसिद्धिं जाणंतएहिं सिरिरिसहनाहपमुहेहिं। तित्थयरेहि कयं जं, तं तवपयमेस वंदामि ॥१२९१॥
जेण खमासहिएणं, कएण कम्माणमवि निकायाणं। जायइ खओ खणेणं, तं तवपयमेस वंदामि ॥१२९२॥
जेणं चिय जलणेण व, जीवसुवन्नाउ कम्मकिट्टाइं। फिट्टंति तक्खणं चिय, तं तवपयमेस वंदामि ॥१२९३॥
जस्स पसाएण धुवं, हवंति नाणाविहाउ लद्धीओ। आमोसहिपमुहाओ, तं तवपयमेस वंदामि ॥१२९४॥

यत्तपो जिनसमये-जैनसिद्धान्ते बाह्यमभ्यन्तरं चेति द्वादशभेदं वर्ण्यते, कीदृशम् ?-यथोत्तरा-उत्तरोत्तराधिका गुणा यस्मिंस्तद्यथोत्तरगुणम्, तत्तपःपदम् एषोऽहं वन्दे-स्तवीमि ॥ १२९० ॥ श्रीऋषभनाथप्रमुखैस्तीर्थकरैस्तद्भवसिद्धिं-तद्भवे एव स्वकीयं मुक्तिगमनं जानद्भिरपि यत्तपः कृतं-समाचरितं तत्तपःपदमेषोऽहं वन्दे ॥ १२९१ ॥ क्षमासहितेन कृतेन येन तपसा निकाचितानां-निबिडबद्धानामपि कर्मणां क्षणेन क्षयो जायते तत्तपःपदमेषोऽहं वन्दे ॥ १२९२ ॥ ज्वलनेन-अग्निना इव येन तपसा एव जीवसुवर्णात्-जीवरूपस्वर्णात् कर्म्मकिट्टानि-कर्मरूपकठिनतरमलानि तत्क्षणं-तत्कालमेव 'फिट्टंति'त्ति अपयान्ति-दूरीभवन्तीत्यर्थः, तत्तपःपदमेषोऽहं वन्दे ॥ १२९३ ॥ यस्य तपसः प्रसादेन ध्रुवं-निश्चितम्, आमर्षौषधिप्रमुखा नानाविधा-अनेकप्रकारा लब्धयो भवन्ति-उत्पद्यन्ते तत्तपःपदमेषोऽहं वन्दे ॥ १२९४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कप्पतरुस्स व जस्सेरिसाउ सुरनरवराण रिद्धीओ । कुसुमाइँ फलं च सिवं, तं तवपयमेस वंदामि ॥१२९५॥
अच्चंतमसज्झाइं, लीलाइवि सव्वलोयकज्जाइं । सिझंति झत्ति जेणं, तं तवपयमेस वंदामि ॥१२९६॥
दहिदुव्वियाइमंगल-पयत्थसत्थंमि मंगलं पढमं । जं वन्निज्जइ लोए, तं तवपयमेस वंदामि ॥१२९७॥
एवं च संथुणंतो, सो जाओ नवपएसु लीणमणो । तह कहवि जहा पिक्खइ, अप्पाणं तंमयं चेव ॥१२९८॥
एयंमि समयकाले, सहसा पुण्णं च आउयं तस्स । मरिऊणं सिरिपालो, नवमे कप्पंमि संपत्तो ॥१२९९॥

कल्पतरोः-कल्पवृक्षस्य इव यस्य तपस ईदृशः सुरवराणां नरवराणां च ऋद्धयः-सम्पदः कुसुमानि-पुष्पाणि सन्ति, च - पुनः शिवं-मोक्षं फलं वर्त्तते, तत्तपःपदमेषोऽहं वन्दे ॥ १२९५ ॥ अत्यन्तम् असाध्यानि-साधयितुमशक्यानि सर्वाणि लोकानां कार्याणि येन तपसा लीलयाऽपि-हेलया एव झटिति-शीघ्रं सिध्यन्ति तत्तपःपदमेषोऽहं वन्दे ॥ १२९६ ॥ लोके दधिदुर्विकादिमङ्गलपदार्थानां सार्थे-समूहे यत्तपः प्रथमं मङ्गलं वर्ण्यते, तस्य भावमङ्गलरूपत्वात्, तत्तपःपदमेषोऽहं वन्दे-स्तवीमि ॥ १२९७ ॥ एवम्-अमुना प्रकारेण च संस्तुवन्-सम्यक् स्तुतिं कुर्वन् स श्रीपालः तथा कथमपि नवपदेषु लीनं-लग्नं मनो यस्य स लीनमना जातः, तथा आत्मानं तन्मयं-नवपदमयमेव प्रेक्षते-पश्यति ॥ १२९८ ॥ एतस्मिन् समयरूपे काले सहसा-अकस्मात् तस्य-श्रीपालस्य आयुश्च पूर्णं, तदा श्रीपालो मृत्वा नवमे कल्पे-आनतदेवलोके सम्प्राप्तः ॥ १२९९ ॥

For Private and Personal Use Only

माया य मयणसुंदरिपमुहाओ राणियाओ समयंमि। सुहझाणा मरिऊणं, तत्थेव य सुरवरा जाया ॥१३००॥
तत्तो चविऊण इमे, मणुअभवं पाविऊण कयधम्मा। होहिंति पुणो देवा, एवं चत्तारि वाराओ ॥१३०१॥
सिरिपालभवाउ नवमे, भवंमि संपाविऊण मणुयत्तं। खविऊण कम्मरासिं, संपाविस्संति परमपयं ॥१३०२॥
एवं भो मगहेसर !, कहियं सिरिपालनरवरचरित्तं। सिरिसिद्धचक्कमाहप्पसंजुअं चित्तचुज्जकरं ॥ १३०३॥

माता-कमलप्रभा च - पुनः मदनसुन्दरीप्रमुखा राज्यः स्वायुषोऽवसानसमये शुभध्यानान्मृत्वा तत्रैव च-नवमे देवलोके सुरवरा जाताः ॥ १३०० ॥ ततः-तस्माद्देवलोकाच्च्युत्वा इमे-सर्वेऽपि श्रीपालादिजीवा मनुजभवं प्राप्य कृतो धर्मो यैस्ते कृतधर्माणः सन्तः पुनः देवा भविष्यन्ति, एवं चतुरो वारान् मनुष्या देवाश्च भविष्यन्ति ॥ १३०१ ॥ श्रीपालभवान्नवमे भवे मनुजत्वं-मनुष्यत्वं सम्प्राप्य कर्मणां राशिं-समूहं क्षपयित्वा परमपदं-मोक्षं सम्प्राप्स्यन्ति ॥ १३०२ ॥ श्रीगौतमस्वामी श्रेणिकनृपं वक्ति 'भो मगधेश्वर' - मगधाभिधदेशस्वामिन् ! एवम्-अमुना प्रकारेण श्रीपालनाम्नो नरवरस्य राज्ञः चरित्रं कथितं, कीदृशं ?-श्रीसिद्धचक्रस्य यन्माहात्म्यं तेन संयुतं-युक्तं, पुनः लोकानां चित्तेषु चोद्यम्-आश्चर्यं करोतीति चित्तचोद्यकरम् ॥ १३०३ ॥

तं सोऊणं सेणिय-राओ नवपयसमुल्लसियभावो । पभणेइ अहह केरिसमेयाण पयाण माहप्पं ? ॥१३०४॥
तो भणइ गणी नरवर !, पत्तं अरिहंतपयपसाएणं । देवपालेण रज्जं, सक्कत्तं कत्तिएणावि ॥१३०५॥
सिद्धपयं झायंता, के के सिवसंपयं न संपत्ता । सिरिपुंडरीयपंडव-पउममुणिंदाइणो लोए ॥१३०६॥
नाहियवायसमज्जिअ-पावभरोऽवि हु पएसिनरनाहो । जं पावइ सुररिद्धिं, आयरियप्पयपसाओ सो ॥१३०७॥
लहुयंपि गुरुवइट्ठं, आराहंतेहिं वयरमज्झायं । पत्तो सुसाहुवाओ, सीसेहिं सीहगिरिगुरुणो ॥१३०८॥

तत् श्रीपालचरित्रं श्रुत्वा श्रेणिकराजो नवपदेषु समुल्लसितो भावो यस्य स तथाभूतः सन् प्रकर्षेण भणति-कथयति, 'अहहे' ति आश्चर्ये ! एतेषां पदानां कीदृशं माहात्म्यं वर्त्तते ?, अचिन्त्यमित्यर्थः ॥ १३०४ ॥ ततः-तदनन्तरं गणोऽस्यास्तीति गणी-गणभृद् गौतमो भणति, हे नरवर- हे राजन् ! अर्हत्पदस्य प्रसादेन देवपालेन-श्रेष्ठिसेवकेन राज्यं प्राप्तं, कार्त्तिकेन श्रेष्ठिनापि शक्रत्वम्-इन्द्रत्वं प्राप्तम् ॥ १३०५ ॥ सिद्धपदं ध्यायन्तो लोके श्रीपुण्डरीकपाण्डवपद्ममुनीन्द्रादयः के के शिवसम्पदं-मुक्तिसमृद्धिं न सम्प्राप्ताः ?, बहवः सम्प्राप्ता इत्यर्थः, पद्मो-रामचन्द्रः ॥ १३०६ ॥ नास्तिकवादेन समर्जितः-सञ्चितः पापोत्कर्षो येन स तथाभूतोऽपि प्रदेशिनरनाथः-प्रदेशिनामा नृपो यत् सुरऋद्धिं-दैवर्द्धिं प्राप्नोति, स आचार्यपदस्य प्रसादः ॥ १३०७ ॥ गुरुणा-सिंहगिरिणा उपदिष्टं-निवेदितं लघुवयसमपि वज्रं-वज्रनामकम् उपाध्यायं-वाचनाचार्यं आराधयद्भिः (सिंहगिरिगुरोः शिष्यैः) सुसाधुवादः सम्यग्विनीताः शिष्या इत्येवंरूपः प्राप्तः ॥ १३०८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साहुपयविराहणया आराहणया य दुक्खसुक्खाइं । रुप्पिणिरोहिणीजीवेहिं किं नहु पत्ताइं गुरुयाइं ॥१३०९॥
दंसणपयं विसुद्धं, परिपालंतीइ निच्चलमणाए । नारीइवि सुलसाए, जिणराओ कुणइ सुपसंसं ॥१३१०॥
नाणपयस्स विराहणफलंमि नाओ हवेइ मासतुसो । आराहणाफलंमी, आहरणं होइ सीलमई ॥१३११॥
चारित्तपयं तह भावओवि आराहियं सिवभवंमि । जेणं जंबुकुमारो, जाओ कयजणचमुक्कारो ॥१३१२॥
वीरमईए तह कहवि, तवपयमाराहियं सुरतरुव्व । जह दमयंतीइ भवे, फलियं तं तारिसफलेहिं ॥१३१३॥

साधुपदस्य विराधनया आराधनया च क्रमेण रुक्मिणीरोहिणीजीवाभ्यां गुरुकाणि-महान्ति दुःखानि सुखानि च किं न हि प्राप्तानि ?, प्राप्तान्येवेत्यर्थः ॥ १३०९ ॥ विशुद्धं-निर्मलं सम्यग्दर्शनपदं परि-सामस्त्येन पालयन्त्याः, पुनः निश्चलं मनो यस्याः सा तथा तस्या नार्या अपि सुलसाया-नागपत्न्या जिनराजो-वर्द्धमानः सुतरां प्रशंसां करोति ॥ १३१० ॥ ज्ञानपदस्य विराधनाफले माषतुषः साधुर्ज्ञातो-दृष्टान्तो भवति, विद्यते आराधनाफले शीलवतीनाम सती आहरणं-दृष्टान्तो भवति ॥ १३११ ॥ शिवकुमारभवे भावतोऽपि चारित्रपदं तथा-तेन प्रकारेण आराधितं येन जम्बूकुमारो जातः, कीदृशः ?-कृतो जनानां-लोकानां चमत्कारो येन स तथा ॥ १३१२ ॥ वीरमत्या-नृपराज्ञ्या तथा-तेन प्रकारेण कथमपि तपःपदमाराधितं, यथा दमयन्त्या-नलनरेन्द्रपट्टराज्ञ्या भवे तत्तपः सुरतरुरिव-कल्पवृक्ष इव तादृशैः फलैः फलितम् ॥ १३१३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किं बहुणा मगहेसर !, एयाण पयाण भत्तिभावेणं । तं आगमेसि होहिसि, तित्थयरो नत्थि संदेहो ॥१३१४॥
तम्हा एयाइं पयाइं चेव जिणसासणस्स सव्वस्सं । नाऊणं भो भविया !, आराहह सुद्धभावेण ॥१३१५॥
एयाइं च पयाइं आराहंताण भव्वसत्ताणं । हुंतु सयावि हु मंगल-कल्लाणसमिद्धिविद्धीओ ॥१३१६॥
एवं तिकालगोअर-नाणे सिरिगोयमंमि गणनाहे । कहिऊण ठिए सेणिय-राओ जा नमवि मुणिनाहं ॥१३१७॥
उट्ठेइ तओ हरिसिय-चित्तो ता तत्थ कोवि नरनाहं । विन्नवइ देव! वद्धाविज्जसि वीरागमेण तुमं ॥१३१८॥

हे मगधेश्वर ! किं बहुना कथनेन ?, एतेषां पदानां भक्तिभावेन-भक्तिपरिणामेन त्वमागमिष्यद्भवे तीर्थङ्करो भविष्यसि, अत्रार्थे नास्ति सन्देहः ॥ १३१४ ॥ तस्मात् एतानि पदान्येव जिनशासनस्य सर्वस्वं ज्ञात्वा भो भविका ! भो भव्या ! वा शुद्धभावेन यूयमाराधयत ॥ १३१५ ॥ एतानि च पदानि आराधयतां भव्यसत्त्वानां-भव्यजीवानां सदापि हु इति निश्चितं मङ्गलकल्याणसमृद्धिवृद्धयो भवन्तु, मङ्गलं-विपदुपशमरूपं, कल्याणं-सम्पदुत्कर्षरूपं, समृद्धिवृद्धयः-परिवारादिवृद्धिरूपा भवन्तु इत्यर्थः ॥ १३१६ ॥ एवं-अमुना प्रकारेण त्रिकालगोचरं-त्रिकालविषयं ज्ञानं यस्य स तथा, तस्मिन् गौतमे गणनाथे-गणेश्वरे कथयित्वा स्थिते सति श्रेणिकराजो मुनिनाथं नत्वा यावत् ॥ १३१७ ॥ ततः स्थानात् उत्तिष्ठति, तावत् हर्षितं चित्तं यस्य स तथाभूतः कोऽपि पुरुषः तत्र प्रदेशे नरनाथं-राजानं विज्ञपयति, हे देव - हे-महाराज ! वीरस्य प्रभोरागमेन-अत्रागमनेन त्वं वर्द्धाप्यसे ॥ १३१८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं सोऊणं सेणिअ - नरनाहो पमुइओ सचित्तंमि । रोमंचकवचिअतणू, वद्धावणियं च से देई ॥१३१९॥
इत्थंतरंमि तिहुयणभाणू सिरिवद्धमाणजिणनाहो । अइसयसिरीसणाहो, समागओ तत्थ उज्जाणे ॥१३२०॥
देवेहिं समवसरणं, रइयं अच्चंतसुंदरं सारं । सिरिवद्धमाणसामी, उववेिट्ठो तत्थ तिजयपहू ॥१३२१॥
गोयमपमुहेसु गणीसरेसु सक्काइएसु देवेसु । सेणिअपमुहनिवेसु अ, तहिं निविट्ठेसु सव्वेसु ॥१३२२॥
सेणिअमुद्दिस्स पहू, पभणइ नरनाह ! तुज्झ चित्तंमि । नवपयमाहप्पमिणं, अइगुरुयं कुणइ अच्छरियं ॥१३२३॥

तद्वचनं श्रुत्वा श्रेणिकनरनाथः स्वचित्ते प्रमुदितो-हर्षितः, पुनः रोमाञ्चैः-रोमोद्गमैः कवचिता-कवचयुक्ता तनुः शरीरं यस्य स तथाभूतः सन् 'से' त्ति तस्य-तस्मै इत्यर्थः, वर्द्धापनिकां ददाति-यथोचितं द्रव्यं ददातीत्यर्थः ॥ १३१९ ॥ अत्रान्तरे-अस्मिन्नवसरे त्रिभुवनभानुः-त्रैलोक्यसूर्यः श्रीवर्द्धमानजिननाथः अतिशयश्रिया-प्रातीहार्याद्यतिशयलक्ष्म्या सनाथः-सहितस्तत्रोद्याने समागतः ॥ १३२० ॥ देवैः अत्यन्तसुन्दरं सारं-प्रधानं समवसरणं रचितं, तत्र-तस्मिन् समवसरणे त्रिजगत्प्रभुः श्रीवर्द्धमानस्वामी उपविष्टः ॥ १३२१ ॥ गौतमप्रमुखेषु गणीश्वरेषु-गणभृद्वरेषु शक्रादिकेषु-सौधर्मेन्द्रादिषु देवेषु चः - पुनः श्रेणिकप्रमुखेषु नृपेषु-राजसु सर्वेषु तत्र - समवसरणे निविष्टेषु-उपविष्टेषु सत्सु ॥ १३२२ ॥ श्रेणिकमुद्दिश्य - श्रेणिकनृपस्य नामोच्चारं कृत्वा प्रभुः-श्रीवर्द्धमानस्वामी प्रभणति-प्रकर्षेण कथयति, हे नरनाथ-हे राजन् ! इदं नवपदमाहात्म्यं तव चित्ते अतिगुरुकं-महत्तरमाश्चर्यं करोति ॥ १३२३ ॥

For Private and Personal Use Only

तं च इमेसिं पयाणं, कित्तियमित्तं इमं तए नायं । जं सव्वाणं मूलं, आराहणमिमेसिं ॥१३२४॥
एयाराहणमूलं, च पाणिणं केवलो सुहो भावो । सो होइ धुवं जीवाण निम्मलप्पाण नन्नेसिं ॥१३२५॥
जेवि य संकप्पवियप्पवज्जिया हुंति निम्मलप्पाणो । ते चेव नवपयाइं, नवसु पएसुं च ते चेव ॥१३२६॥
जं झाया झायंतो, अरिहंतं रूवसुपयपिंडत्थं । अरिहंतपयमयं चिय, अप्पं पिक्खेइ पच्चक्खं ॥१३२७॥

एषां पदानां तच्च इदं माहात्म्यं त्वया कियन्मात्रं ज्ञातम् ?, अल्पमेव ज्ञातमित्यर्थः, यद्-यस्मात्कारणात् एषामाराधनं सर्वेषां सुखानां मूलं वर्त्तते ॥ १३२४ ॥ एतेषां पदानामाराधनस्य मूलं-मूलकारणं प्राणिनां केवल एकः शुभो भावोऽस्ति, स शुभो भावो ध्रुवं-निश्चितं निर्मलमात्मा येषां ते निर्मलात्मानः तेषामेव जीवानां भवति, नान्येषामशुद्धात्मनाम् ॥१३२५॥ येऽपि च सङ्कल्पविकल्पवर्जिताः-त्यक्तसांसारिकशुभाशुभवितर्का निर्मलात्मानो जीवाः ते एव नवपदानि सन्ति, चः - पुनः नवसु पदेषु ते एव जीवाः सन्ति ॥१३२६॥ अथोक्तमेवार्थमुपपादयति, यद्-यस्मात्कारणात् ध्याता-ध्यानकर्ता पुमान् रूपसुपदपिण्डस्थं-रूपस्थं पदस्थं पिण्डस्थम् अर्हन्तं-परमात्मानं ध्यायन् प्रत्यक्षं-साक्षात् अर्हत्पदमयं-अर्हत्पदस्वरूपमेव आत्मानं प्रेक्षते-पश्यति, तत्र रूपस्थं सर्वातिशयोपेतं समवसरणस्थं, पदस्थम् अर्हमित्यादिपावनपदस्थं, पिण्डं-शरीरं तत्र तिष्ठतीति पिण्डस्थं, पूर्वं पिण्डस्थं ध्येयं, पश्चात् पदस्थं, ततो रूपस्थमिति क्रमः ॥१३२७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूवाईअसहावो, केवलसन्नाणदंसणाणंदो । जो चेव य परमप्पा, सो सिद्धप्पा न संदेहो ॥१३२८॥
पंचप्पत्थाणमयायरियमहामंतझाणलीणमणो । पंचविहायारमओ, आयच्चिअ होइ आयरिओ ॥१३२९॥
महपाणज्झायदुवालसंगसुत्तत्थतदुभयरहस्सो । सज्झायतप्परप्पा एसप्पा चेव उवज्झाओ ॥१३३०॥

रूपं पौद्गलिकं, रूपमतीतः अतिक्रान्तः स्वभावो यस्य स तथा, अत एव केवलाः-परिपूर्णाः सज्ज्ञानदर्शनानन्दा यस्य स तथाभूतो य एव परात्मा स सिद्धात्मा उच्यते, नात्र सन्देहः ॥ १३२८ ॥ पञ्चप्रस्थानमयो यः आचार्यसम्बन्धी महामन्त्रः-प्रधानमन्त्रस्तस्य ध्याने लीनं मनो यस्य स तथा, पुनः पञ्चविधो यः आचारः स प्रधानं यस्य सः तथाभूतः आत्मा एव आचार्यो भवति, पञ्च प्रस्थानानि च विद्यापीठ१ सोभाग्यपीठ२ लक्ष्मीपीठ३ मन्त्रयोगराजपीठ४ सुमेरुपीठ५ नामानि, एषामर्थस्तु सूरिमन्त्रकल्पात् ज्ञेयः, भावध्यानमालाप्रकरणे तु अन्यथा पञ्च प्रस्थानान्युक्तानि, तथाहि-अभयप्रस्थानम्१ अकरणप्रस्थानम्२ अहमिन्द्रप्रस्थानं३ तुल्यप्रस्थानं४ कल्पप्रस्थानं५ चेति, एषां पञ्चानां स्वामिनः पञ्चपरमेष्ठिनः इत्यादि ॥ १३२९ ॥ महाप्राणेन-ध्यानविशेषेण ध्यातं-चिन्तितं द्वादशाङ्गानां सूत्रस्य अर्थस्य तदुभयस्य च रहस्यं येन स तथा, पुनः स्वाध्याये-वाचनादिपञ्चप्रकारे तत्पर आत्मा यस्य स तथाभूत एष आत्मा एव उपाध्यायः ॥ १३३० ॥

For Private and Personal Use Only

रयणत्तएण सिवपहसंसाहणसावहाणजोगतिगो । साहू हवेइ एसो, अप्पुच्चिय निच्चमपमत्तो ॥१३३१॥
मोहस्स खओवसमा, समसंवेगाइलक्खणं परमं । सुहपरिणाममयं नियमप्पाणं दंसणं मुणह ॥१३३२॥
नाणावरणस्स खओवसमेण जहट्ठियाण तत्ताणं । सुद्धावबोहरूवो, अप्पुच्चिय वुच्चए नाणं ॥१३३३॥
सोलसकसायनवनोकसायरहियं विसुद्धलेसागं । ससहावठिअं अप्पाणमेव जाणेह चारित्तं ॥१३३४॥
इच्छानिरोहओ सुद्धसंवरो परिणओ अ समयाए । कम्माइं निज्जरंतो, तवोमओ चेव एसप्पा ॥१३३५॥

रत्नत्रयेण-ज्ञानदर्शनचारित्ररूपेण शिवपथस्य-मोक्षमार्गस्य संसाधने-सम्यगाराधने सावधानं योगत्रिकं-मनोवाक्कायरूपं यस्य स तथा, अत एव नित्यमप्रमत्तः-प्रमादरहितः एष आत्मा एव साधुर्भवति ॥ १३३१ ॥ मोहस्य क्षयोपशमात् 'परमम्' उत्कृष्टं शुभपरिणाममयं 'निजं' स्वकीयम् आत्मानं दर्शनं-सम्यक्त्वं 'मुणत' जानीत, कीदृशं दर्शनं ?-शमसंवेगादीनि लक्षणानि यस्य तत्तथा ॥ १३३२ ॥ ज्ञानावरणीयस्य कर्मणः क्षयोपशमेन यथास्थितानां-सद्भूतानां जीवादितत्त्वानां यः शुद्धः अवबोधो-ज्ञानं रूपं-स्वरूपं यस्य स तथाभूत आत्मा एव ज्ञानमुच्यते ॥ १३३३ ॥ षोडश कषायाः क्रोधादयः, नव नोकषाया हास्यादयः, तैः रहितम्, अत एव विशुद्धा-निर्मला लेश्या यस्य स, तं विशुद्धलेश्याकम्, ईदृशं स्वस्वभावस्थितं आत्मानमेव चारित्रं जानीत ॥ १३३४ ॥ इच्छानिरोधतः-स्पृहानिरोधात् शुद्धः संवरो यस्य स तथा, च - पुनः समतया-समभावेन परिणतः, अत एव कर्माणि निर्जरयन् एष आत्मा एव तपः स्वरूपमस्येति तपोमयोऽस्ति ॥ १३३५ ॥

एवं च ठिए अप्पाणमेव नवपयमयं विआणित्ता । अप्पंमि चेव निच्चं, लीणमणा होह भो भविया ! ॥१३३६॥
तं सोऊणं सिरिवीरभासियं सेणिओ नरवरिंदो । साणंदो संपत्तो, निययावासं सुहावासं ॥१३३७॥
सिरिवीरजिणोऽवि हु दिणयरुव्व कुग्गहपहं निवारंतो । भवियकमलपडिबोहं, कुणमाणो विहरइ महीए ॥१३३८॥
एसा नवपयमाहप्पसारसिरिपालनरवरिंदकहा । निसुणंतकहंताणं भवियाणं कुणउ कल्लाणं ॥१३३९॥
सिरिवज्जसेणगणहर-पट्टपहूहेमतिलयसूरीणं । सीसेहिं रयणसेहर-सूरीहिं इमा हु संकलिया ॥१३४०॥

एवं च-अमुना प्रकारेण स्थिते सति आत्मानमेव नवपदमयं विज्ञाय भो भव्याः ! आत्मनि-आत्मस्वरूपे एव नित्यं लीनं-लग्नं मनो येषां ते लीनमनसो यूयं भवत ॥ १३३६ ॥ तत्-श्रीमहावीरस्वामिनो भाषितं-वचनं श्रुत्वा श्रेणिको नरवरेन्द्रो-राजेन्द्रः सानन्दः सन् सुखस्यावासं-स्थानं निजकावासं-स्वकीयं गृहं सम्प्राप्तः ॥ १३३७ ॥ श्रीवीरजिनोऽपि दिनकरः-सूर्य इव कुग्रहपथं-कदभिनिवेशमार्गं निवारयन् भव्यकमलानां प्रतिबोधं-विकासं कुर्वाणो मह्यां-पृथिव्यां विचरति ॥ १३३८ ॥ नवपदमाहात्म्यं सारं-श्रेष्ठं यस्यां सा नवपदमाहात्म्यसारा एषा श्रीपालनरवरेन्द्रस्य कथा नितराम्-अतिशयेन श्रुण्वतां तथा कथयतां भव्यानां कल्याणं करोतु ॥ १३३९ ॥ श्रीवज्रसेनगणधराणां-श्रीवज्रसेनसूरीणां पट्टस्य प्रभवः - स्वामिनो ये हेमतिलकसूरयस्तेषां शिष्यैः श्रीरत्नशेखरसूरिभिरियं श्रीपालकथा संकलिता-रचिता ॥ १३४० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्सीसहेमचंदेण साहुणा विक्कमस्स वरिसंमि । चउदसअट्ठावीसे, लिहिया गुरुभत्तिकलिएणं ॥१३४१॥
सायरमेरू जा महियलंमि जा नहयलम्मि ससिसूरा । वट्टंति ताव नंदउ, वाइज्जंता कहा एसा ॥१३४२॥

तच्छिष्यहेमचन्द्रेण साधुना विक्रमादित्यसम्बन्धिनि चतुर्दशशतोपर्यष्टाविंशतितमे वर्षे लिखिता, कीदृशेन?-गुरोर्भक्तिर्गुरुभक्तिस्तया कलितो-युक्तस्तेन ॥ १३४१ ॥ यावन्महीतले-पृथ्वीतले सागरः-समुद्रो मेरुश्च-कनकाचलो द्वावपि वर्तेते, तथा नभस्तले-आकाशे यावत् शशिसूरौ-चन्द्रसूर्यौ वर्तेते तावदेषा श्रीपालनरेन्द्रकथा वाच्यमाना सती नन्दतु-समृद्धिं लभताम् ॥ १३४२ ॥

॥ इति श्रीपालचरित्रं श्रीरत्नशेखरसूरिवर्यविहितं समाप्तम् ॥

सिद्धान्तमहोदधि- श्रीमद्विजयप्रेमसूरीश्वरपट्टालङ्कार- श्रीहीरसूरीश्वरपट्टालङ्कार
श्री ललितशेखरसूरिवराणां शिष्येण श्री राजशेखरसूरिणा संपादितं
श्रीपालचरित्रं समाप्तम्

For Private and Personal Use Only